Shri Raghunatha Temple MSS. Library,
JAMMU

No. ८२ घ

Title वैयाकरणभूषणसार विवृतिः

Author महानन्द पण्डितः

Extent १६३ पत्र Age सं॰ १८६२

Subject व्याकरण

नं० ८१-घ

वैयाकरणभूषणसार-
विवृति:

पत्राणि ८६त:२४८
१६३

पत्र संख्या=१६३

कर्म्मणोत्वात्स्य॥ भावेकर्मण एव संप्रदानसंज्ञा पूर्वापेणस्यादित्यायादित्ते भाष्ये उ
द्देश्यत्वं च साक्षात्फलरूपेच्छात्वर्थे तदाश्रयत्वात्तंडुलादीनामपि रथो ग्रामं गच्छती
त्यादौ तु उद्देश्यत्वारोपेण निर्वाहः॥ न च कालिकादिसंबंधेन फलाश्रयोतिव्याप्तिः
फलतावच्छेदकसंबंधेन तदाश्रयस्य ग्रहणात् क्रियाजन्येतिकर्तुरिति संज्ञायां उ
द्देश्यत्वस्य नियामकत्वेपि लक्षणं तु क्रियाजन्यफलाश्रयत्वमेवेति भावः॥ ननु
तथापीच्छाघटितं लक्षणं किमर्थमुक्तमत आह॥ तथामुक्त॥ मितिद्वेष्योदासीन
योरपि कर्मव्यवहारस्य सार्वजनीनत्वात्साधारणमेव लक्षणमुचितं इच्छा
घटितस्य लक्षणत्वे तु द्वेष्याद्यसंग्रहः स्यादित्युभयसाधारणमेकमेव लक्षणं यु
क्तमिति भावः॥ एवमेव द्वित्यमेव ननु कर्मण उक्तरूपत्वे हर्यादेः कर्मण ईप्सि

भू॰सा ७६ ॰त्त्वेनाभानेन स्यादिति दोषमिष्टापत्त्यापरिहरति ॥ ईप्सितानीप्सितत्वयो
रिति ॥ मानाभावेनेति सर्वैरस्वीकारादित्यर्थः ननु तर्हि क्रियाजन्यफलशा
लि कर्मेत्येव सूत्र्यतामत आह संज्ञायामेवेति अयं भावः ॥ अग्नेर्माणवकं वारय
तीत्यादौ क्रियाजन्यफलाश्रयत्वेन कर्तुरिष्यमाणवकस्यापि विशेषविहिते
न वारणार्थानामीप्सित इत्यनेनापादानसंज्ञाप्रवर्तेत सूत्रं तु वारणार्थे भिन्ने
चरितार्थं ~~स्वरूपसंबन्धविशेषः मीप्सिततमे तु कर्मसंज्ञाया बाध्याते~~ ईप्सित
तमत्वमनुपद~~मेवोक्तं संयोगमनुकूलव्यापाराभाव~~प्रयोज्यं ॥ तद्वारणाय ईप्सि
ततमत्वस्य कर्मसंज्ञाविधायके निवेशः ॥ एवं चेप्सितेवारणार्थानामिति चारि
तार्थमीप्सिततमे तु कर्मसंज्ञाया बाध्याते ईप्सिततमत्वमनुपदमेवोक्तं संयोगा राम ७६

नुकूलव्यापाराभावश्चयोजकाव्यापारोवारयतेरयः कर्तृगतप्रकृतधात्वर्थ
व्यापार॥ प्रयोज्यफलाश्रयत्वान्माणवकस्यकर्मत्वं अग्नेश्चातथात्वात्रकर्म
त्वंतथावट्टेष्यादिसंग्रहायानीप्सितघटितंसूत्रमपिवक्तव्यमितितथानोक्तं
ननुक्रियाजन्यफलाश्रयरूपकर्मण्णिविहितद्वितीयायाः कथमाश्रयमात्रार्थ
कत्वमतआह॥तथात्वेति॥ एवेनविशिष्टव्यवच्छेदः ननुआश्रयतायाआश्र
यभेदेनभिन्नायाआश्रअननुगतत्वादनुगतधर्मस्यैवशक्यतावच्छेदकत्वान्त
द्वाचकत्वमनुपपन्नमतआह॥तत्वंचेति॥आश्रयत्वंचेत्यर्थः॥ अखंडशक्ति
रूपमिति:॥इतरपदार्थाघटितकर्मत्वशक्तिरूपधर्मेइत्यार्थः कर्मकर्मत्यनु
गतव्यवहारात्॥कर्मपदशक्यतावच्छेदकत्वाच्चतत्सिद्धिर्द्रव्यत्वादिवदिति

भू. सा ७८ भावः॥ कर्मणीति सूत्रस्वरसोप्येवमेव एवं सर्वासां विभक्तीनां तत्तत्कारक
शक्तिमद्बोधकत्वं बोध्यं तत्र च प्रकृत्यर्थो विशेषणं विशेष्यं धात्वर्थस्त
च्छक्तिनिरूपकत्वात्संबन्धन एवं च हरिं भजतीत्यादौ हरिरूपं यत्कर्म तन्नि
ष्ठा शक्तिनिरूपकप्रीत्यनुकूलो व्यापार इति बोधः॥ अत एव सप्तमीपंचम्यौ
कारकमध्ये इति सूत्रे कारकपदस्य धर्मप्रधानपरतया कर्तृत्वकर्मत्वश
क्तीगृह्येते इति भाष्ये उक्तं त्रयी शब्दानां प्रवृत्तिरिति मुख्यपक्षे संज्ञाशब्दैर
पि स्वप्रवृत्तिनिमित्तेनार्थनिष्ठधर्मेणैव बोधः॥ यथा डित्थत्वेनैव डित्थस्य
बोधः॥ कैयटेनोक्तः एवं चात्र सप्तसंज्ञाशास्त्रैस्तत्तत्प्रवृत्तिनिमित्तशक्त्यैव वा
श्रममबोधयइति दिक् उत्सर्गेर्धात्वर्थत्वादिति॥ तथा च कृञो यत्नमात्रार्थे एम ७८

कत्वस्यपूर्वं दूषितत्वादुत्पत्तिसहितस्यैवतस्यधात्वर्थत्वादितिभावः॥आ
वरणभंगेतिज्ञानानुकूलव्यापारोवाजानात्यर्थः॥ फलतावच्छेदकीभूत
विषयतासंबंधेनव्यापारव्यधिकरणज्ञानरूपफलाश्रयत्वाद्घटादेःकर्म
त्वंननुभाविविनष्टघटेनिराश्रयस्यावरणभंगस्यासंभवेनतस्यकर्मत्वा
नुपपत्तिरत॥आहातीतेतितस्येतिआवरणभंगस्येत्यर्थः॥तत्रावरणभंग॥
स्यानंगीकारेबाधकमाहान्यथेतियथा पूर्वेतिपूर्वमनतिक्रम्येत्यर्थः॥घट
स्यातीतत्वदशायामाधुनिकज्ञानस्यावरणाभंगाजनकत्वेनपू॥र्वोतिक्रम
स्यसत्वात्पूर्वानतिक्रांतज्ञानाभावस्यविषयस्याबाधात्तादृशप्रयोगस्यप्रा
माण्यापत्तेरित्यर्थः॥ अतीतेति॥अतीतघटादौज्ञानाधाश्रयतावंविषय

भू.सा
७८
78

तासंबंधेनेत्यर्थः विषयतातिरिक्तसंबंधेनव्यक्तिमत्त्वे एव सामानकालिकयोरा
धाराधेयभावनियमादिति भावः॥ अत्र संमतिमाह॥ नैयायिकानामिति अनुभ
वानुरोधउभयेषां समान इति भावः ननु तथाप्यावरणभंगाश्रयतायां किं सा
धकमत आह सत्कार्येति तमेव दर्शयति सत्कार्यवादमते सर्वे कुड्यादयो भावा
स्वोपादानकारणे संत एव परमतस्वीकृतकारणव्यापारेणाविर्भाव्यंते कारणा-
सामग्रीसमवधाने जायत इति व्यवहारः॥ एवं परमतसिद्धध्वंसे एतत्सामग्र्या तिरोभावे
जनिते नास्ति नष्ट इति व्यवहारः॥ तत्सामग्रीसमवधाने तु नरपत्तीति व्यवहारः
नोत्पद्यते न नश्यति आविर्भावतिरोभावावेव भवतः॥ कच्छपांगवत्॥ इति तत्सि राम
द्धांतः तथा च सूक्ष्मरूपेणावस्थिते घटे आवरणभंगाश्रयत्वं न दुर्वचमिति भा ७८

वः तटस्थः शंकतेनन्विति विभागस्येति तत्क्रियाजन्यविभागस्येत्यर्थः ॥ ननु
परत्वात्कर्तृसंज्ञायाबाधेपि वास्तवफलाश्रयत्वाद्द्वितीयास्यादत आह द्वितीये
ति ॥ इदं चप्रकृताभिप्रायेण ॥ अन्यथेति ॥ शास्त्रमर्यादांपरित्यज्यलक्षणासंगम
नमात्रेण द्वितीयादिविधाने द्वितीयापत्तेरिति ॥ णिजर्थव्यापारजन्यप्रकृत्यर्थव्या
पाररूपफलाश्रयत्वेनपाचयतिकृष्णेनेत्यत्रापि कृष्णपदाद्द्वितीयापत्तेः तस्मा
च्छास्त्रानुसरणमेवज्याय इति भावः शाब्देति चैत्रनिष्ठसंयोगजनकश्चैत्रीयो
व्यापार इत्याकारक इत्यर्थः ॥ विषयत्वाबाधादिति भावः ॥ तथेति सामान्यतोधा
त्वर्थफलविशेष्यकशाब्दबोधे आश्रयोपस्थितेर्हेतुत्वादिनामित्यर्थः ॥ इष्टेति
बोधस्यस्वस्यव्युत्पत्त्यनुसारित्वादिति भावः स्वनिष्ठसंयोगजनकस्वीय

व्यु०सा
पु९
19

व्यापारविषयकशाब्दबोधस्य सर्वानुभवविरुद्धत्वादाह उच्यतां वेति प्रकारतासं
बंधेनैतादृशबोधआश्रयो मे उपस्थितिविषयत्वमपि तत्रैव तथा च प्रकृत्यर्थवृत्तित्व
विशिष्टसंयोगस्य क्रियायां स्वजनकत्वाश्रयनिष्ठभेदप्रतियोगितावच्छेदकत्वोभ
यसंबंधेनान्वयोपगमान्न चैत्रश्चैत्रं गच्छतीति बोध इति भावः॥ धात्वर्थेति धातु
शक्यं शक्यतावच्छेदकं वा यत् फलमित्यर्थः॥ उक्तप्रायत्वादिति धात्वर्थविक्लित्त्याश्रा
यत्वात् कर्मत्वेत्यादिग्रंथेन विशिष्य गमेरनुपादानात्स्यादिति नैयायिकमतं दूषयि
तुमुपन्यस्यति॥ नैयायिकास्त्विति आद्येति चैत्रश्चैत्रं गच्छतीति प्रयोगवारणायेत्य
र्थः॥ द्वितीयेति प्रयागात्काशीं गच्छति चैत्रे प्रयागं गच्छतीति प्रयोगापत्तिरूपेत्यर्थः
वच्छेदकत्वमिति फलावच्छिन्नव्यापारस्य तन्मते धात्वर्थत्वात्॥ तन्मते परस्समवे राम पु६

तत्वंक्रियान्वयिएकोहितीयार्थः॥आधेयत्वंफलान्वय्यपरोर्थःकारणभावांतरेति
परसमवेतत्वस्यविशेष्यतासंबंधेनशाब्दबोधंप्रतिभावनात्वावच्छिन्नत्वात्तुजन्यो
पस्थितेर्हेतुत्वांतरकल्पनादित्यर्थः॥ननुचैत्रक्रियाया अपिमैत्रान्यसमवेतत्वा
त्तद्व्यांगीकारेप्युक्तदोषतादवस्थ्यमतआहपरत्वंवेति॥प्रकृत्यर्थस्यद्वितीया
र्थैकदेशेपरत्वेव्युत्पत्तिवैचित्र्यादन्वयः॥एवंचचैत्रसंयोगजनकक्रियायांचै
त्रभिन्नसमवेतत्वाभावान्नचैत्रश्चैत्रंगच्छतीतिप्रयोगः॥परसमवेतत्वाविषयकप्र
कृत्यर्थनिष्ठसंयोगजनकत्वमात्रविषयकबोधोनांगीक्रियतइतिनोक्तदोषदव
स्थ्यंवस्तुतः॥उभयत्वावच्छिन्नभेदमादायोक्तदोषतादवस्थ्यवारणायानुपदोक्त
दिशापरसमवेतत्वस्यसंबंधविधयैवभानमंगीकरणीयमितिनैयायिकाः॥यथा

भू॰ सा श्रुतं तन्मतं दूषयति तन्नेति ननु अतिप्रसंगावारणाद्गौरवमदोषायेत्यत आह अतिप्र

८० संगः॥ किमिति तावदिति परसमवेतधात्वर्थतावच्छेदकफलशालित्वस्य द्वितीयार्थ

40 त्वस्वीकारेप्यतिप्रसंगतादवस्थ्यमित्यर्थः अतिप्रसंगमेव दर्शयति गमयति कृष्णमि

त्यादिना तथा च संज्ञाया एव द्वितीयोत्पत्तौ नियामकत्वं वाच्यं एवं च तत एवातिप्रसं

गति बु गभंगसंभवे कृतं तत्र द्वितीयाशक्त्येति भावः ननु णिजसमभिव्याहृतधातुघ

द्धीति ६ टितप्रयोगे तादृशकर्मत्वमेव द्वितीयानियामकमत आह तंडुलं पच्यत इति॥

तंडुले भवद्वृत्तिद्वितीयातियामकत्वस्य सत्वात्तदापत्तिर्मन्मते तु कर्तृसंज्ञया कर्मसं

ज्ञाया बाधान्न तदापत्तिरिति भावः॥ तंडुलीन्येति॥ एतेन परसमवेतक्रियाजन्य रा म

त्वं विवक्षितं वस्तीति सूचितं॥ अर्थाश्रयत्वादित्यनेन तंडुलस्य कर्तृत्वं मावेदितं उ ८०

त्क्रीत्वेवेति तथा व्युत्पन्नानामित्यादिनेत्यर्थः॥ ननु नास्मन्मतेप्युक्तप्रयोगापत्तिः
तत्र कर्मकत्वेन व्यापारमात्रस्यैवसत्वात्॥ विक्लृतेर्धात्वर्थतानवच्छेदकत्वेन तत्
दाश्रयस्य कर्मत्वाभावात्॥ आह परसमवेतत्वस्येति द्रष्टेति॥ प्रकृत्यर्थस्य निरूपित
त्वसंबंधेनाधेयतायां प्रतियोगितासंबंधेन भेदे भेदस्य चानुयोगितायाः क्रिया
ये आधेयतायाः फले आश्रयत्वेनान्वयभानादित्यर्थः॥ अनेकशब्द इति॥ प्रकृत्यर्थ
प्रकारकशाब्दबोधं प्रति द्वितीयाधीनाधेयमोर्वस्थितेरिव तदधीनपरसमवेतत्वो
पस्थितेः एवं द्वितीयार्थाधेयत्वप्रकारकशाब्दबुद्धिं प्रति धातुजन्यफलोपस्थि
तिरिव परसमवेतत्वप्रकारकबोधे धातुजन्यभावनोपस्थितेर्हेतुत्वकल्पनेना
तिगौरवादित्यर्थः॥ हरिर्भक्तं कर्मविभागमाह॥ तत्रैवेति क्रियाजन्यफलाश्रयस्वरूपं

भू·सा
८१
४।

कर्मेत्यर्थः॥ यदसज्जायतइत्यसत्कार्य्यवादमवलंब्यसदित्यादितुसांख्यमतेन
प्रकाशनइत्यनंतरं प्रकृतेस्तु विवक्षायां विकार्यं कैश्चिदन्यथातन्निर्वर्त्यमितिवा
च्यपदीमपाठः कैश्चित्तावाय्यैः प्रकृतिविवक्षायां तत्प्रयोगे निष्पाद्यं क्रियया यत्
तद्धि कार्यमित्युच्यते अन्यथा तन्निवर्त्यमिति त्रिघटं करोतीत्यादौ सत्या अपि मृदा
दि प्रकृतेः परिणामित्वेन विवक्षाभस्मकरोतीत्यादौ असत्या एव तस्यास्तत्वेन
साम्यमपि निर्वर्त्यते निष्पाद्यतेइति व्युत्पत्त्या निर्वर्त्यत्वं निष्पाद्यत्वं तंडुलानोदनं
पचतीत्यादावोदनादौ विकार्यकर्मण्यपि ख्यास्ति तथापि प्रकृतिवाचकपदस्य सम
भिव्याहृतपदोपस्थाप्यत्वे सति निष्पाद्यत्वस्वरूपपारिभाषिकनिर्वर्त्यत्वस्य वि राम
चक्षणान्नदोषः तदुक्तं सतीवाविद्यमाना वा प्रकृति परिणामिनी॥ यस्यनाश्रिय ८१

ते तस्य निर्वर्त्यत्वं प्रवक्ष्यते इति यस्य विकृतिकर्मणः नाश्रियते न प्रयुज्यते घ
टं करोतीत्यादौ मृदादिप्रकृतेस्तत्र सत्त्वं भस्म करोतीत्यादौ तु तदुपादानस्य का
ष्ठादेः ॥ तत्रासत्त्वं प्रकृत्युच्छेदसंभूतमिति तत्र प्राप्यं कर्म क्रियाजन्यफलशा
लि गम्यादेर्ग्रामादिः ॥ ज्ञानादेर्विषयश्च क्रियया निष्पाद्यं यन्न तद्विकृतिरूपं
प्रकृतिसमभिव्याहारे यथा पाकादेरोदनादिः ॥ यथा वा ह्रमैमीत्यादिः का
शादिश्च प्रथमे तण्डुलादिरूपपूर्वद्रव्यं विनाश्य ओदनादेर्निर्वर्तनं द्वितीये तु ॥
ष्ठादिरूपपूर्वद्रव्यमविनाश्य तत्रैव संदर्भादिरूपविशेषनिष्पादने न विशि
ष्टस्य मात्यादेर्निर्वर्तनं तृतीये चकाशादिरूपपूर्वधर्मिणमविनाश्य तत्रैव
कटादिरूपधर्मिनिष्पादनं क्रिययाऽऽदृशमेव प्रकृतेरसमभिव्याहारस्थले

भू: सा निर्वर्त्यमुच्यते क्रमेणोदाहरणान्याह घमितिनिर्वर्त्यमित्यर्थः देवदत्तादिनि
८२ ष्ठो घटनिष्ठोत्पत्त्यनुकूलो व्यापार इति बोधः॥ इतीममिति॥ प्रकृतिरूपक
४२ र्मवक्रियमावस्त्वं तत्र निष्पत्तये पूर्वभावविशिष्टस्य यस्यास त्वरूपो विका
रो निर्वाह्यते तत्र तंडुलानोदनं पचति काष्ठं भस्म करोतीत्यादौ नाशप्यानुकूलो
स्यनुकूलो व्यापारो धात्वर्थः॥ तंडुलनाशप्रयोज्यौदननिष्ठोत्पत्त्यनुकूल एक
देवदत्तादिनिष्ठयत्नादिव्यापार काष्ठनिष्ठनाशप्रयोज्यभस्मनिष्ठोत्प॥
त्त्यनुकूलो देवदत्तादिनिष्ठयत्नादिव्यापारः काशो त्कटं करोति मौक्तिका
निमुजं करोतीत्यादौ काशोपादनत्वप्रयोजककूटनिष्ठोत्पत्त्यनुकूलो देव
दत्तादिनिष्ठयत्नादिव्यापारः॥ मौक्तिकनिष्ठोपादानत्वप्रयोज्यविना ए म ८२

सारिनिष्ठोसत्त्वनुकूलोदेवदत्तादिनिष्ठोयत्नादिव्यापारइतिबोध्यः अ
त्रसर्वत्रप्रधानकर्मणित्यादयः प्रधानकर्मण्याख्येयेत्यादीनाऽदुहादिकर्मणा
मितिभाष्ये। त्तेः प्रधानकर्मत्वंचकर्तृप्रत्ययसमभिव्याहारे॥ प्रधानभूतव्या
पारेसाक्षादविशेषणफलाश्रयत्वेनोपेतविषयोप्येतादृशप्राधान्यस्यैवग्राह्य
त्वात्तत्त्वोक्तोदाहरणेनिर्वर्त्यमानौदनभस्मनोरेवातत्सत्कर्मैवाख्याता
दिभिरभिधीयतेततीयमितिलौकिकविषयिताशालित्वाक्षुषत्वावच्छिन्ना
नुकूलोव्यपारोर्थः॥ नुकूलोव्यापारोदृश्यार्थः घटनिष्ठंलौकिकविषयिता
शालिचाक्षुषंतदनुकूलोदेवदत्तादिनिष्ठोव्यापारः अतः सौरभादौचा
क्षुषोपनीतभानविषयतासत्त्वेपिनसौरभंपश्यतीतिप्रयोगप्रसंगः घ्राधातो

भूः सा गंधलौकिकप्रत्यक्षानुकूलो व्यापारोऽर्थः पुष्पं जिघ्रतीत्यादौ पुष्पनिष्ठगंधवि
८३ षयकलौकिकसाक्षात्कारानुकूलो देवदत्तादिनिष्ठो व्यापारः वह्निमनुमिनो
९३ तीत्यादौ विधेयिताशाल्यनुमित्यनुमित्यनुकूलो व्यापारो धात्वर्थः वह्निनिष्ठ॥
विधेयतानिरूपितविधेयिताशाल्यनुमित्यनुकूलो देवदत्तादिनिष्ठो व्यापा
र इति बोधः ग्रामं इच्छतीत्यादौ इच्छानुकूलो व्यापारो धात्वर्थः॥ ग्रामपदं ग्रा
मस्वत्वपरं मुख्यविशेष्यत्वसंबंधेनेच्छारूपफलस्य कर्मत्वन्वितत्वं देवदत्तादिनि
ष्ठा नाम स्वत्वमुख्यविशेष्यकेच्छानुकूलो व्यापार इति बोधः॥ अतो वृद्धिसा
ध्यं सुखं भवत्विच्छायां न वृद्धिं इच्छतीति प्रयोगः॥ तंडुलं पिपक्षतीत्यादौ इच्छास एम
नर्थः तस्यां स्वकर्तृकर्तृकत्वस्वविषयकत्वोभयसंबंधेन पाकादेः प्रकृत्यर्थः ८३

स्मान्यान्यपापच्यते तंडुलोंमत्सादौयङ्गेऽर्थः पौनःपुन्यं तच्च तदानीं तन्नप्रकृत्यर्थ॥ सजा
तीयक्रियांतरध्वंसकालीनत्वे तच्चपाकेन्वेतितत्कालीनपाककृत्सा श्रयो देवद
त्त इतिबोधः॥ वृक्षात्पर्णंपततीत्यादौ अधः संयोगावच्छिन्नानुकूलोव्यापारोऽर्थः
धात्वर्थसंगृहीतत्वादधोदेशस्यनकर्मत्वं अग्निसंयोगावच्छिन्नक्रियानुकूलो
व्यापारोजुहोत्यर्थः॥ अत्रापदग्रे धात्वर्थांतर्गततयानकर्मत्वं वृक्षावधिकपर्णनि
ष्ठोधः संयोगानुकूलोव्यापारः घृतनिष्ठाग्निसंयोगानुकूलाक्रियातदनुकूलो
देवदत्तादिनिष्ठोव्यापारः धनंददातीत्यादौस्वस्वत्वध्वंसानुकूलपरस्वत्वप्रका
रेच्छादददात्यर्थः॥ धननिष्ठस्वस्वत्वंध्वंसानुकूलपरस्वत्वप्रकारेच्छारूपव्यापा
रोदेवदत्तादिनिष्ठ इतिबोधः धनंप्रतिगृह्णातीत्यत्रस्वस्वत्वजनकेच्छारूपःस्वी

भू॰सा कारस्रूपो व्यापारो धात्वर्थः धननिष्ठं यत्स्वस्वत्वं तज्जनकेच्छारूपो व्यापारो
८४ देवदत्तादिनिष्ठ इति बोध्यः॥ संज्ञांतरैरनुक्तमिति आ॰पादानत्वादि तत्तद्रूपेणावि
वक्षितमित्यर्थः॥ अत्राकथितशब्दो कीर्तितपरो नाप्रधानपरस्तथासति पाणि
नाकास्यपाण्यादेः धीसत्राधिकरणस्यापि कर्मसंज्ञाप्रसज्येताधिकरणसंज्ञा
याश्चासादियोगे चरितार्थत्वात् एवं च पूर्वकं तदविवक्षायां सर्वथापूर्वविधे
रप्रसक्तौ वैतत्स्वव्याप्तिरिति बोध्यं अपादानत्वादिविवक्षायां पंचम्याद्येव अविव
क्षिता। मपिप्रधानकर्मयोपपेक्षितं योगश्चाप्रकृतधात्वर्थात्स्वाकृतदनंतरं वा तत्र
त्वविशास्यतिरिक्ते धात्वर्थव्यापारास्यागेवत तत्संबद्धत्वं ग्राह्यं ते। नस्यात्यादेर्नी
नेकर्मत्वमधिकरणत्वेनाविवक्षायामपि गांदोग्धीत्यादावितिबोध्यं अवि सम ८४

वक्षाप्यपादानाधिकरणसंप्रदानत्वानामेव संभवति करणस्य हस्तादेः कर्मयु
क्ताभावात् यद्यपि गौः पयस्य जति गवा गोपस्त्वाजयतीति प्रतिस्वाविगभागा
नुकूलव्यापारानुकूलव्यापारस्यापि दुह्यर्थत्वेन कर्तुरीप्सिततमत्वेनैव क
र्मसंज्ञासिद्धाति प्रधानकर्मत्वं पूर्वोक्तं गवादीनामिति तत्रैव बलादिसिद्धिः प्रकृते
च पयोनिष्ठव्यापारानुकूलो यो गोनिष्ठो व्यापारस्तदनुकूलव्यापारस्य शब्दतः ॥
प्राधान्यादित्यन्यथासिद्धमिदं सूत्रं तथापि दुहियाचिरुधिप्रछिभिक्षिचिञ्ब्रुवि
शासयः इति भाष्योक्तानां दुह्यादीनां यदा पयोनिष्ठविभागानुकूलव्यापारादि
रेक एव व्यापारोऽर्थस्तदापादानत्वाविवक्षायामन्येनासिद्धकर्मत्वार्थमि
दमावश्यकं तदा चाप्रधाने दुहादीनामित्युक्तेरप्रधाने गावादावेव लादयः

भू॰ सा अप्रधानत्वं चोक्तप्रधानकर्मभिन्नकर्मत्वं तच्च गवादीनामस्त्येव फलानाश्र
८५ यत्वात् तथा चैतत्कत्वं ततः स्थितद्रवद्रव्यनिष्ठविभागानुकूलव्यापारो दुहेर
85 र्थः॥ तत्र गोरपादानत्वाविवक्षायामनेन कर्मत्वं तद्विवक्षायां पंचमी गोः पय
स्य ज्ञ्वये षष्ठी एवं च गोकर्मकपयोनिष्ठविभागानुकूलगोपकर्तृको व्यापार इ
ति बोध्यव्यापारद्वयाविवक्षायां तु पयोनिष्ठविभागानुकूलगोनिष्ठव्यापारा
नुकूलगोपकर्तृको व्यापार इति वलिं याचते वसुधामित्यत्र यदा स्वत्वनिवृ
त्तिस्वस्वत्वोत्पत्त्युभयानुकूलो व्यापारो याचेरर्थः॥ स्वत्वे वलेर्निरूपकतया राम
न्वयस्तदानेन कर्मत्वं पूर्वविषयस्य कस्याप्यभावात् न चापादानत्वप्रसक्तिः ८५
विभागस्य धात्वर्थत्वाभावात् न याचनादेवापायो भवति माचिन्त्वाय दिद

दानितदपायं न युंज्यात इति भाष्योक्तेः वालिमिरूपितं वसुधानिष्ठं यत्स्वत्वं
तन्निवृत्तिस्वस्वत्वोत्पत्त्युभयानुकूलो व्यापारो मवकनिष्ठ इति वोधः॥ व्या
पारद्वयार्थत्वेनु कर्त्तुरितिकर्मत्वं तदाश्वोदेश्यकदानेच्छामावत्त्वर्थः स्वसंप्रदा
नकदानानुकूलव्यापारानुकूलशासनार्थकदंडे उक्तार्थेकपचेश्च कर्तुरित्य
नेनैव कर्मसंज्ञा व्रजं गां रुणद्धीत्यादौ निर्गमप्रतिबंधपूर्वकयत्किंचिदधिक
रणकचिरस्थित्यनुकूलव्यापारो वरुध्येनर्थः॥ अधिकरणत्वाविवक्षायामने
न कर्मत्वं देशांतरसंयोगानुकूलव्यापारविरोधिव्यापाररूपव्यापारद्वयार्थ
कत्वे पूर्वेत्तौ व कर्मत्वं विरोधित्वं च संचारानुत्पादप्रयोजकत्वं अनुत्पादे
प्रधानकर्मणोरन्वयः॥ भेदे व व्रजमित्यस्यान्वयः जिज्ञासाविषयार्थाज्ञा

भूः स
८६

ननुकूलः॥केनपथागंतव्यमित्यादिशब्दरूपो व्यापार पृच्छेरर्थः॥ज्ञानविषय-
त्वेनपथ्यः कर्मत्वंमाणवकेनवज्ञानस्याश्रयत्वंसंबंधः॥अत्रान्यस्याप्रसक्तिः
व्यापारद्वयार्थत्वे पूर्वेणाव्रक्षंफलमवचिनोतीत्यादौविभागपूर्वकादानं
विन्नर्थः धर्मंब्रूते ज्ञानानुकूलशब्दप्रयोगरूपो व्यापारो ब्रूञर्थः शाशे
सएवधर्मंकुर्वित्यादिविधिघटितोपदेशरूपः॥नयत्यादेः संयोगानुकूल
व्यापारस्यानुकूलव्यापारोर्थः॥अन्यसंज्ञाबाधकसूत्रांतरविहितमित्यर्थः॥क्रू-
रमभिक्रुध्यतीत्यत्रक्रुधद्रुहेतिप्राप्तसंप्रदानसंज्ञायाः क्रुधद्रुहोरितिसूत्रेण
बाधनात्कर्मत्वंदेवदत्तादिनिष्ठः क्रूरविषयकः क्रोधानुकूलो व्यापारः

राम ८६

क्रोधस्य द्वेषविशेषरूपत्वात्ज्ञानविशेषरूपत्वाद्वा सविषयकत्वमिति वो
ध्यं चैकुंठमध्यास्ते धिनिष्क्तीत्यादौ द्वितीयायाः स्थलत्वा अधिशयिते त्यादौ पूर्व्वा
श्चविधानार्थमधिशीङादिसूत्रप्रणयनात् अथ व्यापारांतरं धात्वर्थे तर्भाव्यप्रश
यनादिरूपफलावच्छिन्नव्यापारार्थकाधिशीङादिधात्वर्थफलाश्रयत्वात्कर्म॥
त्वनिर्वाहात् सूत्रप्रणयनवैयर्थ्यमिति चेन्न धातूनां मुख्यार्थपरत्वेपि दर्शितप्र
योगनिर्वाह तथा सूत्रप्रणयनात् वैकुंठवृत्तिदेवकर्तृकशयनस्थित्यादिरित्यर्थः
एवं कुरून्स्वपिति मासमास्ते इत्यादावपि विशेषणीभूताभिव्यापनक्रियां तर्भावे
ण कर्मत्वतत्प्रयुक्तद्वितीयादेश्च निर्वाहः यद्यपि मासमधीते इत्यादावप्यनयैव मु॥
क्त्या निर्वाहे कालाध्वनोरित्यस्य वैयर्थ्यं ॥ तथापि मासं रमणीया क्रोशं कुटिला

म्०स
८७
87

नदीत्यादौ क्रियानध्याहारेपिद्वितीयाद्यर्थे सूत्रमिति तत् सार्थकं अयकेयमभि
व्याप्तियोत्यंतसंयोगाद्दत्सुच्यते॥ उच्यते॥ अत्यंतसंयोगोभावदव्यपस्वसंबंधः य
त्समुदायोमासादिस्त एवतदवयवाः॥ एवंवमासपदेनत्रिंशद्दिनसमूह उच्य
ते त्रिंशद्दिनसंबंधश्चादिनपर्याप्तत्रिंशत्वव्यापकत्वंत्रिंशत्वस्यमासान्यदादे
वत्वाभावद्व्यापकत्वं द्वितीयार्थः प्रकृते व्यापकत्वं च त्रिंशत्ववान्निरूपितयो
गिव्यधिकरणात्यंताभावप्रतियोगितानवछेदकावधिन्नत्वं प्रथमाभावे
प्रत्नेषैयोगिवैयधिकरण्यनिवेशात्रिंशद्दिनेष्वेव किंचित् किंचित्कालाव
छेदेनयत्राध्यीतंतेत्तुदिवांतरदंडादावपि अध्ययनाभावसत्वान्नमासमध्यी
तेतिप्रयोगाम्य उपपत्तिः मासपदंननावद्दिनस्थौरवेडवस्वंतरपरं तथासति

राम
८७

पप

एकदिनाध्ययनस्थलेपि तादृशाखंडकालेध्ययनभावेन न मासमधीते इति प्रयो
गापत्तिः तदघटकदिदिनपदं सूर्योदयावधि सूर्योदयांतरपर्य्यंतावस्थाप्यखं
डवस्तुरूपं न तु क्रियादिपरवयेः तथा सत्येकैकक्रियाव्यक्तेरपि मासत्वाधि
करणात् तथा तत्राध्ययनाभावसत्वेन व्यापकत्वरूपद्वितीयार्थस्य बाधापत्तेः
दिने स्वपितीत्यादौ दिनपदं त्रिंशद्दंडकूटपरमेव अतो नैकदंडादिमात्रस्वा
पे तथाप्रयोगः अवयवानतिरेकेण भानेपि एकवचनांतत्वं समूहे संख्यारो
पात् ध्ययनाभावसत्वेन मासव्यापकतामानाध्ययने बाधः इति दिक्॥ कोशं
कुटिला नदीत्यादौ यत्किंचित्कोशत्वावच्छिन्नप्रतियोगिकव्यधिकरणाभा
वप्रतियोगितावच्छेदकानवच्छिन्नकौटिल्यवदभिन्ना नदीति बोधः को
शत्वादिकं संख्यावद्दंडादिपरिच्छिन्नदेशत्वं शत्रून्स्वर्गं गमयति शिष्यं शा

स्त्रं वेदयति देवदत्तं आसमयति देवानमृतमाशयतीत्यादौ गतिबुद्धीति सूत्रेण वि
हितद्वितीयाया अपि कर्मत्वशक्तिमदाश्रयोर्थः॥ यद्यपि शब्दादीनामपि प्रधा
नीभूतणिजर्थव्यापारजन्यप्रकृत्यर्थ॥ व्यापाररूपफलाश्रयत्वात्कर्तुरित्येव
सिद्धा कर्मसंज्ञा न त्वापादितन्यायेन पाचयत्योदनं सहायेनेत्यत्रापि प्राप्तकर्मसं
ज्ञानिवृत्तिफलकनियमार्थं तत्र नियमश्च णिजर्थव्यापारजन्यप्रकृत्यर्था
श्रयस्यैव कर्तुरिति सूत्रेण कर्मसंज्ञा न हि गत्याद्यर्थव्यापाराश्रयस्यैव तेन पच्या
द्यर्थव्यापाराश्रयस्य न कर्मसंज्ञा किन्तु स्वव्यापारे॥ स्वातन्त्र्यात्कर्तृसंज्ञैव तदु
क्तं गुणक्रियायां स्वातन्त्र्यात्प्रेषणे कर्मतां गतः॥ नियमात्कर्मसंज्ञायाः स्वधर्मे
णाभिधीयते इति स्वधर्मेण तृतीयया वाचकतासंबंधेन स्वनिरूपितया वृत्
स्वर्गनिष्ठसंयोगानुकूलो यः शत्रुनिष्ठो व्यापारस्तन्निर्वाहको हर्यादिनिष्ठः

प्रेरणादिव्यापारः॥ एवमन्यत्राप्यूह्यं कर्मप्रवचनीययोगविहितविभक्तेस्तु
लक्ष्यलक्षणभावादिसंबंधद्योतकत्वमिति वक्ष्यते उपपदविभक्तीनां तु ष
ष्ठ्यपवादकत्वात्संबंधोर्थ इति दिक् द्वितीयार्थं निरूप्य तृतीयार्थं निरू
पयति कर्तृतृतीयायामा इति तृतीयांतरस्य भिन्नार्थकत्वादिति भावः॥ आश्रय
इति कर्तृत्वशक्तिरूपकेवलाश्रयतावेनित्यर्थः॥ तत्र मानमाह तथाहीत्यादि
नाननुस्वातंत्र्यं त्र्यंकासमभिव्याहृतक्रियाकारकांतस्यनधीनत्वे सति का
रकत्वं तच्चेश्वराधीने जीवेप्यास्तं देवदत्ताद्यधीने काष्ठे पचतीत्यादौ काष्ठा
दावप्यव्याप्तमत आह स्वातंत्र्यं चेति व्यापारतावच्छेदकसंबंधेन तद्धात्वर्थ
भावनाश्रयत्वं सर्वेषां स्वव्यापारे स्वातंत्र्येऽपि युगपत्सर्वेष्वभावात्रयुगपत्स

र्वेषां कर्तृत्वमिति भाववः ॥ तद्धात्वर्थभावना तद्धात्वर्थक्रियानुकूला कृतिः
सा तिसं भवेग्राह्या कृतिश्च चेतननिष्ठा चेतनेष्वेव कर्तृत्वशक्तिप्रवृत्तिनिमि
त्तक कर्तृत्वपद व्यवहारस्य स्वारसिकत्वात् तत्क्रियानुकूलव्यापारवत्त्वेन
लक्षणो प्रवेशफलं तु ज्वलनतंडुलधारणादिव्यापारवत्त्वेन सौकर्यातिश ॥
या दिद्योतनाय काष्ठादीनामपि कर्तृत्वसिद्धये तत्क्रियाकर्तृत्वं च तदुद्देश्य
कृतत्क्रियानुकूलकृतिमत्त्वं अत एवान्योद्देशाक्षिप्तनाराच वहतेव्राह्मणादे
र्नब्राह्मणवधकर्तृत्वं अत एव तादृशास्य फलेन संपूर्णब्रह्मवधप्रायश्चि ॥
त्तं अत एव तत्र मत्तोभूतेन तु मया कृतमिति व्यपदेशः अत्रैव हरिवाक्यं

प्रमाणयति धातुनेति धातुवाच्येत्यर्थः एवंच धातुवाच्यक्रियाश्रयस्य स्वतं
त्रस्य कर्तृत्वशक्तिमत्त्वे हरिणापि बोधनान्मदुक्तोर्थोऽभियुक्तसंमत इति
भावः ॥ अत एवेति धात्वर्थव्यापाराश्रयस्य स्वतंत्रस्य कर्तृत्वे देवकेवलक्ष
स्याश्रयस्यैव कर्तृत्वे तदसंगतिरिति भावः स्वयमेवेत्यादिपदेन रथोग
च्छतीत्यादिसंग्रहः स्वोक्तं दृढयितुं पृच्छति नन्वेवमिति ॥ एवंविवक्षायां प्र
योगनियामकत्वेन कर्मादीनामपि सर्वेषां कर्तृत्वे मनोमयस्य मनोमयपद
प्रतिपाद्यस्य जीवत्वे मनोलिंगात् अंतःकरणप्रतिबिंबितचैतन्य कर्तृत्वरू
पव्यावहारिकब्रह्मभिन्नपरत्वे रहितः शरीरात्प्रेत्य निर्गत्य एतच्छरीरं परि
त्यज्येति यावत् ॥ एतं सर्वज्ञानानंदस्वरूपमात्मानं अभिसंभावितास्मि प्र

मू. सा स्तास्मीत्यर्थः॥ कथमिति त्वन्मते विवक्षाभेदेन कर्तृत्वकर्मत्वयोरेकस्मिन्नपि
६० संभवात् एवं च तत्सिद्धान्तव्याकोप एतस्मिन्मते इति भावः॥ उत्तरमेति इत्थम
90 तरस्यादिना ज्ञेयत्वे अनेन प्रपदकेन जीवस्यैवोपास्यत्वकथने प्राप्तिकर्मत्व
मिति एकजीवकृत उपासनाया अन्यजीवस्य प्राप्यकर्मत्वमित्यर्थः आ
ख्यातेनेति अभिसंभावितास्मीत्यत्र त्वेनेति भावः॥ कर्मेति॥ आकडारीये
न कर्मसंज्ञत्वमित्यर्थः॥ यथापत्तिरिति इदं त्वापाततः प्राप्यकर्मणि तदभा
वस्योक्तेः शब्दविरोधपरिहाराय एकदा संज्ञाद्वयप्रयुक्तकार्यानुत्पत्तिद्वारासः
संज्ञाद्वयविरोधः तत्र कर्तृत्वकर्मत्वव्यवहारभेदहेतुरित्यर्थः॥ नत्वन राम
योः पारमार्थिकं भोक्तृभोग्यभेदमादायेति भावः॥ नन्वेतावता व्यापाराश्रयस्य कर्तृ ६०

त्वमायातं न त्वाश्रयत्वमात्रस्येत्यत आह एवं चेति धातूपात्तव्यापाराश्रयस्यक
र्तृत्वे चेत्यर्थः॥ आश्रयमात्रमिति अनन्यलभ्यस्येति व्यापारादिर्भावः लक्षणां तम
मन्येषां दूषयति कारके ति अव्याप्तमिति अचेतनेषु बाधादिति भावः इदं च
वास्तवाभिप्रायेणोक्तं यथा स्यात्तादि व्यापारस्य धात्वर्थत्वविवक्षया कर्तृ॥
त्वनिर्वाहो मुख्यमते तथा कारकवाचकप्रत्ययकत्वस्य लक्षणावादिमतेप्यारो
पितं तदाश्रयकर्तृत्वनिर्वाहस्य स्वरूपपादनात् कर्त्वाश्रयत्वस्यापि कर्तुर्न नहे
कारास्य दचैतन्यविषयस्य मध्यमपुरुषस्य श्रुतौ तग्रावाणइत्यादावारोपा
न्निर्वाहवदत्राप्यचेतने ष्वारोपात्कर्तृत्वविहिततृतीयायानिर्वाहाच्च अ
चेतनेषु लक्षणेतितु न सम्यक् हृष्टिमन्तो न लक्षणेति सिद्धांतात् कर्तृविभा

भू.सा गमाह॥अयं चेति अनुपदोक्तः शुद्धेति हेतुकर्तृकर्मकर्तृ-भिन्नत्वमित्यर्थः॥हेतुशिणि
२१ णिजंतार्थकर्तृत्वसर्थकर्मकर्तृत्वेति णिजर्थापेक्षया कर्मत्वेपि प्रकृत्यर्थव्यापाराश्रय
त्वादेवमुक्तिः कुसुमादेः कर्मसंज्ञोपयोगाय करणादीनां कर्त्रधीनत्वेन प्रयोज्य व३
९१ स्य प्रयोजकाधीनत्वं प्रयोज्यस्य स्वार्थसिद्ध्यर्थं प्रवृत्तेः॥नहि करणादीनां तादृशी प्रव
त्तिः तदुक्तं निमित्तेभ्यः प्रवर्त्तंते सर्व एव स्वभूतये॥अभिप्रायानुरोधोपि स्वार्थ
स्यैव प्रसिद्ध्ये इति क्रमेणोदाहरणान्याह भवयाहरीत्यादिना व्यापार॥इति तिङं.त
स्थले दीक्षितादिभिः॥व्यापारविशेषकबोधस्वीकारादेवमुक्तं पचकस्तंडुल इत्या
द्यनुरोधेन कर्मप्रत्ययमात्रे फलविशेषको बोधस्तु नवीनमतारूढः एवं राम
भिर्हितैः कर्षति गृहीत्यादौ अंतर्भावितण्यर्थमादाय कर्तृत्वं एवमेकस्यैवापाधि ६१

भेदेन कर्तृत्वकर्मत्वकरणत्वानि भवंति यथात्मानमात्मना स्वजसीतित
दुक्तं एकस्य बुद्ध्यावस्थाभिर्भेदेन परिकल्पनात्कर्मत्वं करणत्वं च कर्तृत्वं
चोपजायत इति ॥ आश्रयव्यापाराविति ॥ आश्रयश्च करणताशक्तेः स्वा
र्थव्यापारस्य च अयं च व्यापारो धात्वर्थव्यापाराद्भिन्न एव एतस्यापि शा
ब्दबोधे भानं न तज्जन्यपरशक्तिं विना न निर्वहतीति तत्रापि तृतीयायाः श
क्तिः स्वीक्रियते केचित्तु तृतीयार्थः करणताशक्तिमानेव तत्र प्रकृत्यर्थस्या
भेदेनान्वयः ॥ तस्य च स्वनिरूपव्यापाराव्यवहितोत्तरक्षणोत्पत्तिकत्वसं
बंधेन धात्वर्थेऽन्वयः ॥ तथा च संबंधघटकतयैव करणव्यापारस्य भा

भू. सा
९२
92

नंशान्न किंतु आश्रये एवेत्याहुः ॥ अत्र केचित् ॥ करणस्य व्यापार एव
न्वयो न फलांशे तच्छक्तिस्वभावात् ॥ अत एवोद्भिदा यजेतेत्यादौ मत्वर्थल
क्षणाभिया नामधेयत्वं सिद्धांतितं ॥ अन्यथा व्यापारं प्रति करणत्वेनान्वि
तेधा[illegible]र्थे लर्थफलांशे करणत्वेनान्वयोपपत्तौ लक्षणाया अप्रसंग एव
व्यापारे तदन्वये तु फलस्यैव करणत्वेनान्वयात्करणावरुद्धे करणांतर
स्यान्वयायोग्यतयासावश्यकीति वदंति परे तु ॥ फलेप्यन्वये युगपत्फलांश
स्य भावनानिरूपितं करणत्वं स्वकरणनिरूपितं साध्यत्वं चेति वैरूप्यं स्या
दिति सावश्यकीति प्राहुः ॥ उक्तमर्थं सप्रमाणं कर्तु एतत्संज्ञाविधायकं सू

एम
९२

त्रमाह तथाहीत्यादिनाप्रकर्ष इति प्रकर्षश्च कर्तृपराधीनस्थापनकरणोत्तरा
पेक्षः किंतु कारकांतरापेक्ष एव कारकासामान्यवाचिसाधकशब्दादुत्पद्य
मानेन तमपा तदवधिकप्रकर्षस्यैव बोधनात् अत एवाश्वेन पथा दीपिक
याव्रजतीति प्रयोगसंगतिः अन्यथाकरणांतरावधिकप्रकर्षस्य करणांतरे
भावात्तमपो करणत्वानुपपत्तिरेवेति ताद्रशोति फले त्वन्त्यव्यवहितपू
र्वक्षणावर्त्ती स्पर्धः व्यापारवद्विति व्यापारवत्त्वेन विवक्षितत्स्पर्धः ॥ तत्र
हरिसंमतिमाहोक्तं चेति ॥ क्रियायाः फलरूपाया वाणेन हतः काब्वेनपव
तीत्यादौ करणव्यापारानंतरं प्राणवियोगादिरूपफल जननाद्धक्षणासं

म० सा गतिः विवक्ष्यतेऽत्रानेन विवक्षैवप्यकरणांगं न चास्ति विकरणत्वादिस
६३ ते ऽस्युक्तं अएव तदाऽन्नाधनादरेण वलस्थलत्वविवक्षायां वलेन लुनातीत्या
६३ दि भवति तदाह वस्तुत इति॥ इदमेव वस्तुकरणं अयमेव कर्त्तेति न नियमः
निश्चितताधिकरणत्वापि स्थालीतनुतरकपालत्वात् शीघ्रतरपाकसाधनत्वे
नानुभवति वैवक्षिकं करणत्वं तथा तद्व्यापारस्य धात्वर्थत्वविवक्षायां कर्त्तृ
त्वं चानुभवतीत्यर्थः॥ अवकाशमिति तंडुलस्याऽत्यां पचतीत्यादौ कर्तृत्वक
रणत्वाविवक्षायां तत्संज्ञाप्रयुक्तसप्तम्यादेरवकाशमित्यर्थः॥ एवमिति एक॥ एम
कस्मिन्नपि धर्मिणि कर्तृत्वकरणत्वयोरंगीकारे न घोरविरोध इतिया ६३

वत्शक्तिविपर्ययादिति ॥ एवं हि श्रोतानुमंता विज्ञानात्मा पुरुष इत्यादीनां त
थाकर्तुः कर्तृत्वविशेषप्रतिपादकानां यजेत जुहुयादित्यादीनां च सार्थक्या
य जीवस्य कर्त्ता शास्त्रार्थवत्त्वादित्यनेन कर्तृत्वे बोधिते बुद्धिव्यपदेशाद्विज्ञान
मेवास्तु कर्त्रीत्याशंकायां विज्ञानस्य कर्तृत्वाभ्युपगमे लोके समर्थस्यापि क
र्तुः करणांतरसापेक्षस्यैव कार्यकारित्वदर्शनेन बुद्धेः करणशक्तिहान्यापत्ति
रतस्तदतिरिक्तजीवस्यैव कर्तृत्वमुचितमित्यर्थप्रतिपादकेन शक्तिविपर्य
यादिति सूत्रेणेत्यर्थः ॥ न युज्यत इति कर्तृकरणशक्त्योरविरोधस्यैव भवन्मि
रभिधानादिति भावः ॥ समाधत्ते तदेतेषामिति प्राणानामिंद्रियाणां विज्ञानेन
विज्ञानशब्दवाच्यबु — विज्ञानं ग्रहणशक्तिं आदाय गृहीत्वा स्वापे ग छ

भ॰ता तीतिश्रुत्यर्थः करणतमेतिविज्ञानेनेत्यत्र करणतमात्क्लृप्तस्येत्यर्थः निःप्रमा
णेतिकर्त्तरिकरणशक्तिस्वीकारेपिद्वयोः शक्त्योरेकदाविवक्षायाअसंभवे
९४ नविज्ञानंयज्ञंतनुतइत्यादौकर्तृत्वविवक्षायांकरणशक्तिविवक्षाप्रयु
94 क्ततृतीयांतनिर्देशापादनासंभवेनतद्विपर्ययप्रसंगाभावादित्याशयादि
त्यर्थः॥एतदितिशक्तिहान्यापत्तिरूपंदूषणं॥ मात्रपदेनतात्पर्यविषयत्व
वच्छेदः अभ्युच्चयत्वंउपेक्षाविषयत्वंयथाचेतिचशब्दः परामिमतबुद्धेःक
र्तृत्वनिरासायतथाचशक्तिविपर्यायादित्यस्यपराभ्युपगतबुद्धिकर्तृत्वनि
रासेतात्पर्यंनतुबुद्धेः॥कर्तृत्वेनकरणशक्तिपरित्यागइतिनतद्विरोधइति
भावः वास्तविकंकर्तृत्वंनित्यशुद्धमुक्तस्वभावस्यदुर्घटंअविद्योपस्था राम ९४

पितंतु तत्स्वरस्यापि संभवतीति सर्वमनवद्यं॥ केन हेतुनावसतीत्यादौ हेतु
पदं स्वस्वरूपयोग्यपरं विभक्तिः फलोपधानपरा अतोन पौनरुक्त्यं विभक्ते
रन्यार्थतायां अप्यन्यत्र इष्टत्वान्निरुक्तार्थेन तस्य योगात् प्रकृत्या चारु
रित्यादौ प्रकृतिर्यावदाश्रमभावी धर्मविशेषः॥ तत्संबंधि चरुत्ववानि
तिबोधः प्रायेणयाज्ञिक इत्यत्र संभावजर्थः प्रायः शब्दः संभावनावि
षययाज्ञिकत्ववानितिबोधः नाम्नासुतीक्ष्ण इत्यत्र नामत्वाप्यसुतीक्ष्ण
त्ववानितिबोधः एवं चरितेन दांतर इत्यादौ नाम्नाचंद्रकलेत्यादौ नामभू
तचंद्रकलाशब्दाभिन्नेत्यर्थः॥ एवमवच्छेदकत्वादीनां संबंधत्ववि
वक्षया घटत्वेन जन्यत्वप्रकारकत्वं अभाव इत्यादावनेनैव तृतीया।

भूः सा
६५
65

अह्नानुवाकोधीतइत्यत्रतृतीयार्थः संवंधः॥अनुवाकविषयकमहः
संवंध्यतीतमध्ययनमितिवोधः तेनफलप्राप्तिपूर्वकतत्त्यागोव्यज्यते
पुत्रेणसहागतइत्यादौसहार्थश्चसमभिव्याहृतपदार्थसमानकालि
कत्वरूपंसाहित्यंतत्तृतीयार्थश्चक्रियासमभिव्याहारेप्रतीयमानतत्तत्क्रि
याकर्तृत्वादिकमेवद्रव्यगुणसमभिव्याहारेसहार्थवलात्प्रतीयमान
तत्तत्पदार्थसंवंधएवपुत्रकर्तृकागमनसमानकालिकागमनवान्॥
पितापुत्रेणस्थूलइत्यत्रपुत्रवृत्तिस्थौल्यसमानकालिकस्थौल्यवान्
इतिवोधः॥प्रासोष्टशत्रुघ्नमुदारचेष्टमेकासुमित्रासहलक्ष्मणेन॥ राम
नेत्याद्यनुरोधेनसमानकालिकत्वं स्थूलकालघटितमपियथाप्र ६५

योगरूढ्यं अत एव विभिन्नस्थले भुंजानमपि ह्येकत्वेन सह भुज्यत इ
ति प्रयुज्यते तत्रैकशालारूपभोजनाधारोपि सहार्थेंतर्भावनीयः एवं या
जने योनिसंबंधं स्वाध्यायं सह भोजनस्य सः प्रतीतिं कुर्वाणः पतितेन न सं
शयः॥ इह त्वैकदैकपात्रभोजनस्यैव पातहेतुत्वात् स एव सहार्थः ज
टाभिस्तापस इत्यादौ इत्थंभूतलक्षणे तृतीया लक्षणत्वं व्यावर्त्तकत्वं
२१ तच्च विधेयतावच्छेदकसमानाधिकरणाभावप्रतियोगित्वं तदाश्रय
श्च धर्मो हि द्विविधो विशेषणमुपलक्षणं च विशेषणत्वं दं आदि उपलक्षणं
कालांतरीमजटादिस्तापसादेः विशेषणसंबंधे मतुबादिभिः प्रत्याय्य
ते अनया तु विद्यमानस्येवाविद्यमानस्यापि संबंधः॥ प्रत्याय्यते ना

भू. सा
२६
५८

यमानत्वेनोलिंगं करणमित्यादौ आधेया जटाभिरित्यादौ हितीयान्ताप्य
त्वं तृतीयार्थः ॥ जटाज्ञाप्यतापसत्ववानित्यर्थः प्रकृतशब्दप्रयोगाधिक
रणकालस्यैव विधेयांतरसमभिव्याहारस्थाले तदधिकरणकालावधि
न्नसंबंधस्यापि मतुवादिभिः प्रत्यायनात् दंडवानयमासीदंडीगतवानि
त्यादौ मतुवादेः ॥ पादेन खंज इत्यत्र विकारप्रयुक्तसंस्थानवैधुर्यव
च्चरणवानित्यर्थः ॥ विकारप्रयुक्तत्वरूपः संबंधस्तृतीयार्थः ॥ अक्षण
इत्यत्र अक्षिपदार्थो गोलकं गोलकविकारप्रयुक्तचक्षुर्नाशवानित्य
र्थः ॥ दंडेन घट इत्यत्र दंडाभिन्नहेतुजन्यो घटः कारणताखंडोपा
धिः अध्ययनेन वसतीत्यत्र फलस्याध्ययनस्य ज्ञानद्वारा हेतुत्वं उक्तं च

एम
२६

अनाश्रिते तु व्यापारे करणं हेतुरिष्यते इति दास्या संयच्छते इत्यत्र संयच्छतेर्दा
नपूर्वको भोगोर्थः॥ सतस्यर्थमाह सतस्या अपीति॥ ननु सूत्रादाधारस्य वाच्य
त्वं प्राप्यते नाश्रयस्येत्यत आह तच्चेति आधारत्वं चेत्यर्थः॥ विशेष्ये एव शक्तिर्ला
घवान्न तु विशिष्टे तत्प्रकारकशाब्दबोधे धर्मिशक्तिज्ञानस्य हेतुताकल्प
नेनैवातिप्रसंगभंगादित्याशयेनाह तत्राश्रयांशः शक्य इति तत्त्वे आश्रय
त्वरूपमधिकरणत्वशक्तिः॥ आश्रयत्वमात्रेणेति शक्यतावच्छेदकस्यक
र्त्रादिसाधारण्यादिति भावः॥ अस्या अधिकरणसंज्ञायाः॥ कर्तृकर्मद्वारे
ति यद्यपि लोके द्रव्यगुणक्रियादिविषयकमप्यधिकरणं तथापि शा
स्त्रे कारकाधिकारात्क्रियाविषयमेव तत्साक्षात्क्रियाश्रययोः

भू॰सा
५७

कर्तृकर्मणोः संज्ञे बाधिके परत्वादित्यनवकाशमिदं सूत्रं सत्परं सत्स्वरंप
रस्याः क्रियाश्रयस्याधिकरणसंज्ञां विधत्ते परंपराघटकेव कर्तृकर्मणी एवय
द्यपि कालः साक्षात्क्रियाधारः संभवति तथापि कारकाधिकारे पुरुषार्थयोगो नास्ती
ति स्वरितत्वप्रतिज्ञया तमवगृह्णेन वा बोधितत्वात्परंपरया क्रियाधार
स्यापि ग्रहणं व्यवहिताभिसुक्तेप्य साक्षादित्युक्तिर्लोकानुसारेणान्वयोपिप
रंपरयैवेति सूचनाय मनवमोक्षे रद्धास्तीतिवत् मोक्षे रद्धातिभवतीत्यस्याप
त्तिः अंतरंगत्वेन परत्वेन च कर्मत्वस्यैव प्रवृत्तेः पूर्वोत्रास्ति क्रियामामन्व
यस्याविवक्षितत्वेनाधिकरणत्वं ॥ एतद्विति अधिकरणमित्यर्थः ॥ तदुक्तं हरि णम
णा उपश्लेषस्यवाभेदस्तिलाकाशकटादिषु ॥ उपकारास्तु भिद्यंते संयोगिस ५७

मवायिनोस्त्रिष्वप्यधिकरणेषूपश्लेषोस्त्येव उपकारः संबंधस्तद्भेदात्तु त्रि
त्वेन व्यवहारः कटे आस्ते इत्यादौ संयोगिन्याधारे कतिपयावयवव्याप्त
त्वे च संबंधः तिलेषु तैलमित्यादौ समवायिनि समस्तावयवव्याप्त्या सः ॥
खे शकुनय इत्यत्राकाशस्य तात्विकावयवाभावेन कल्पितदेशता
द्वैषयिकत्वं कल्पितापेक्षया चात्राप्युपश्लेषः ॥ गुरौ वसतीत्यत्र शिष्य
स्य गुर्वधीनायां वृत्तौ वैषयिकमधिकरणं गुरुः ॥ उपश्लेषोत्र बौद्धः पु
द्धे सन्नह्यतीत्यत्र युद्धोद्देशेन कवचादीनां प्रवृत्तेर्युद्धं विषयः ॥ गंगायां
घोषः गंगायां गावः कूपे गर्गकुलमित्यादौ गंगाशब्दः सामीप्याद्देशवृत्ति
रित्यौपश्लेषिकमेवं तत् ॥ वैषयिकं तु संयोगसमवायेतरभिन्नसंबंधेन

म.सा
४८
48

यदधिकरणं तत्पथाखेशकुनय इत्यादि अंत्यं तु यत्र सर्वावयवावच्छेदेन
व्याप्तिस्तत् ॥ यथा तिलेषु तैलं दध्नि सर्पिरिति अंत्यमेव मुख्यमधिकरणं स्वाव
च्छेदं स्वरितेनाधिकार इत्यादौ अस्यान्याय्यत्वं च प्रकृतस्यैवाधिकरणत्वभाना
त् नवैकदेशः प्रकृतस्यार्थः गौणाधारेपि कारके गौणमुख्यन्यायानवतारा
द्विभक्तेः शक्तिरिति बोध्यं करोतेरित्यत्र परं परमाकरा भिन्नाश्रयकः
शयनानुकूलो व्यापार इति बोध्यं कारकाणां भावनान्वयव्युत्पत्तिरप्येतत्
च्छास्त्रवलादीदृशपरंपरान्वया विषयापि अत एवाक्षशौण्ड इत्यादौ सम
र्थो समासः एवमन्यत्राप्यूह्यं संहितायामिति त्रेतेहि अयं योगः शाब्दो वक्तुं
अधिकरणं नाम त्रिप्रकारं व्यापकमौपश्लेषिकं वैषयिकमिति इक्शाब्द

एम
४८

स्यात् शब्देन कोन्योभिसंबंधो भवितुमर्हेत्यन्यदतः॥ उपश्लेषात् तत्रांतरे
ण संहिताधिकारे संहितायामेव भविष्यतीत्युक्तं अत्र उपश्लिष्टपदाव्या
हारेण सप्तमीत्यर्थे इदमेव भाष्यं मानं॥ अधीति व्याकरणे अत्र कर्मसप्त
म्यर्थः॥ अत्रापि क्तन्तपूर्वावङ्गावक्रांतादधीतशब्दादिष्टादिभ्यश्चेती
नि: व्याकरणकर्मकाध्ययनकर्त्रीतिबोधः चर्मणि द्वीपिनमित्यादौ फ
ले सप्तम्यर्थः चर्मणः फलत्वं च हननक्रियायास्तद्व्याभादिविषयके धा
धीनत्वादिति बोध्यं रुदतिरुदतो वा प्राव्राजीदित्यत्र त्ताप्यत्ताप्यज्ञापकभा
वः॥ विभक्त्यर्थः॥ षष्ठी चानादरे विशिष्टं प्रव्रजनमर्थे वैशिष्ट्यं च सा
मानाधिकरण्यसंबंधेनोत्तरकालिकत्वाभ्यां रोदनकर्तृपुत्रादिज्ञाप्यमना

भः स्ता
५६
९९

दनविशिष्टप्रव्रजनमितिबोधः नृणां नृपवा द्विजः श्रेष्ठः नराणां क्षत्रिये
षु शौर्यमित्यादौ निर्द्धारणविभक्तेर्व्यावृत्तत्वमेवार्थः व्यावृत्तत्वं चाधिवि
धेयसमभिव्याहारस्थलेऽन्योन्याभावप्रतियोगित्वं भेदान्वयितत्स्थले च्चा
त्यन्ताभावप्रतियोगित्वं तस्य च विधेयतावच्छेदकावच्छेदेनान्वयः॥ अभावेव
प्रकृत्यर्थस्य नरादेः क्षत्रियत्वादिरूपोद्देश्यतावच्छेदकावच्छिन्नभेदविशि
ष्टप्रकृत्यर्थतावच्छेदकनरत्वादिव्यापकाधिकरणतानिरूपिताधेयता
संबंधेनान्वयः द्विजेतरनरभिन्नः श्रेष्ठ इति फलितोऽर्थः माथुराः पा
टलिपुत्रकेभ्य आढ्यतरा इत्यत्र अत्र निर्द्धारणावधिव्यावृत्तिकरण
के निर्द्धारणविषयभावरूपः संबंधः पंचम्यर्थः पाटलिपुत्रकावधि एम ५६

कतद्यावृत्त्यान्यतरत्वकरणकनिर्द्धारणविषयामाथुरा आढ्यतरा इतिवा
धः मूलेनावाहयेद्देवीमित्यादौ आधाराधेयभावसंबंधो विभक्त्यर्थः
मूलनक्षत्रयुतकालाधिकरणकं देवीकर्मकभावाहममितिबोधः अ
घ भुक्त्वा अयं द्यहे द्याता द्वा भोक्ता अत्र विभक्त्यर्थः स्वानंतरकालवृत्ति
त्वं एतद्दिवसाधिकरणक भोजनोत्तरकालिकमेतद्दिवसानंतरद्व्यहा
नंतरकालवर्त्तिपीजनाश्रय इत्यर्थः॥ पंचम्यर्थं निरूपयति अवधी
ति॥ अवधित्वरूपादानत्वशक्तिमानित्यर्थः अत्रप्रमाणं दर्शयति अपा
दान इतितच्चेति अपादानत्वं वेत्यर्थः॥ विश्लेष इति विभागइत्यर्थः॥ अ
पादानत्वं च प्रकृतधातूपात्तकभावस्य च संसर्गमर्यादयैव भानात्वि

भू.सा
१००
100

भागआश्रयश्च पंचम्यर्थः प्रकृत्यर्थस्य विभागे आधेयतया आश्रये भेदेना
न्वयः विभागस्य धात्वर्थे जनकत्वेनान्वयः यत्र विभागस्य धातुत एव ला
भो वृक्षादि भजइत्यादौ तत्रानन्यलभ्येति न्यायादवधिरूपाश्रय एव पंच
म्यर्थ इत्यर्थे नचैवमपीति अत्रापि पंचम्यर्थे विभागस्य जनकत्वेन धात्व
र्थेन्वयसंभवादित्यर्थः स्पन्दतेने विभागोर्थो वृक्षेस्पन्दत इत्येवप्रयोगः॥
वलन्तेस्वासनाच्चलित इति दर्शनादस्यैव विभागोर्थ इति नव्याः॥ एतेनेष्टपत्ति
स्वीकारेणेत्यर्थः॥ नचैवमपीति अत्रापि धात्वर्थे विभागे वृक्षादेरवधित्वरू
पाश्रयत्वसंभवादित्यर्थः वृक्षात्पर्णं पततीत्यत्र यतेर्विभागजन्यसंयोगोर्थः अ
धःसंयोगानुकूलव्यापारो वार्थः पंचम्यर्थश्चोक्त एव॥ वृक्षनिष्ठविभागजन

रा म
१००

कपर्णेनिष्ठोव्यपारः वृक्षात्स्फलं स्रजतीत्यः दौ विभागजन्यसंयोगानुकूलो
व्यापारोर्थः वृक्षाद्धि भजत इत्यत्र विभागजन्यपूर्वदेशसंयोगनाशोर्थः॥ व
लाहकेति एवं च विभागजन्यसंयोगानुकूलक्रियारूपनिःसरणे विद्योतने
र्वृत्तिः वलाहकायदानकविभागजन्यसंयोगानुकूलक्रियोत्तरकालिक
विद्युत्कर्तृक विद्योतनमितिबोधः॥ इदमिति अपादानमित्यर्थः त्रिविधमि
त्यनेनान्वयः वलाहको नाम धूमज्योतिः सलिलमरुतां संघातः ततो वयव
भूतज्योतिषो भेदविवक्षायां विभागविवक्षणात्सोवधिः॥ अंन्यमिति अपे
क्षितक्रियमित्यर्थः वृक्षैकदेशन्यायेनात्रप्रयोगः यथा भिन्नद्दलादावय

नेनैवापादानत्वंसूत्रेमायपशब्देन भेदस्यापिग्रहणात्तन्मूलसंबंधविवक्षायां
षष्ठीयोभेदइत्यपिव्याघ्राद्बिभेतीदस्युभ्यस्त्रायतेइत्यादौभीत्र्यर्थसपादान॥
त्वंभयंपरतोनिष्टसंभावनात्राणंचनिष्टनिवृत्त्यनुकूलोव्यापारःपंच
म्यर्थः॥प्रयोज्यत्वंव्याघ्रप्रयोज्यंयदनिष्टंतद्विषयकंदेवदत्तादिनिष्टसं
भावनंदस्युप्रयोज्यंयदनिष्टंतन्निवृत्त्यनुकूलोदेवदत्तीयोव्यापारः॥
अध्ययनात्पराजयतइत्यादौक्लेशसाध्यत्वधीसमानाधिकरणास्तद्विष
यकेत्साहाभावोधात्वर्थःविषयःपंचम्यर्थःअध्ययनविषयकउत्सा
हाभावइत्यर्थः॥मालुर्निलीयतेकृष्णइत्यादौस्वकर्मकदर्शनाभावप्र

योजकदेशविषयस्थितिर्धातोरर्थः कर्त्तापंचम्यर्थः मात्रेकर्तृकं यत् स्वक
र्मकं दर्शनं तदभावप्रयोजकदेशविशेषस्थितिः कृष्णनिष्ठा इति बोधः
उपाध्यायादधीते इत्यादौ आख्यातोपयोगे त्वपादानता कर्त्तापंचम्यर्थः
उच्चारणाधीनश्रवणोच्चारणार्थविशेषज्ञानादिर्धात्वर्थः उपाध्यायाभि
न्नकर्तृकोच्चारणाधीनोच्चारणार्थविशेषज्ञानं देवदत्तादिनिष्ठमिति बो
धः हिमवतो गंगाप्रभवतीत्यादौ भुवः प्रभवे त्वपादानत्वं हिमवदादिस्त
दाधारोत्रायादानं हिमवदपादानको गंगाकर्तृकः प्रथमः प्रकाश इति बो
धः प्रासादात्प्रेक्षतेक्षते इत्यादौ आरोहणकर्मपंचम्यर्थः प्रसादाभित्र

भू०सा कर्मकारोहणोत्तरकालिकंदेवदत्तादिकर्तृकंप्रेक्षणमितिबोधः॥ वना

१०२ द्ग्रामोयोजनेयोजनंवासदो अव्यवहितोत्तरत्वंपंचम्यर्थः॥स्वाव्यवहितो

102 त्तरवृत्तित्वंप्रथमासप्तम्योरर्थः॥वनाव्यवहितोत्तरयोजनाव्यवहितो

त्तरदेशवृत्तिग्रामइतिबोधः॥ कार्त्तिक्याग्राहयणीमासेइत्यत्रस्वावयव

कत्वंपंचम्यर्थः॥स्वाव्यवहितोत्तरकालवृत्तित्वंसप्तम्यर्थः॥कार्त्तिक्य

व वयवैकत्रिंशत्तिथ्यात्मकमासाव्यवहितोत्तरकालवृत्तिराग्रहायणीति

बोधएवमन्यत्राप्यूह्यं॥ चतुर्थ्यर्थंनिरूपयति उद्देश्येति उद्देश्यपष्ठ्या राम

१०२

ञ्जनतत्तज्ज्ञात्वर्थकर्मनिष्ठफलनिरूपकत्वेनेच्छाविषयोयः सः अत्रपू
त्रं प्रमाणयतितथाहीत्यादिनासंप्रदानमितिसंप्रदानमितिसंप्रदानत्वश
क्तिमानित्यर्थः॥ इदमेवेतिउद्देश्यत्वमेवेत्यर्थः॥ शेषित्वंउपकार्यत्वंशेष
त्वंउपकारकत्वंप — परार्थः सशेषः परार्थ्यं चव्रीह्यादिद्रव्याणांयागार्थ
त्वंयागस्यफलंप्रतिफलस्यपुरुषंउत्तरोत्तरंशेषित्वंपूर्वंपूर्वंशेषत्वमिति
वाद्रव्यत्वं अतएवेति कर्मणश्चतुर्थीनिमित्तत्वप्रदर्शनात्कर्मैश्चसपे
क्षयाचतुर्थीश्रुतेर्वैलत्वादेवेत्यर्थः॥ प्राशनवदितिज्योतिष्टोमेश्रूयते
नीतासुदक्षिणासुचात्वाले कृष्णविषाणांप्रास्यतीतियजमानः ऋत्वि

भ्यः दक्षिणां दत्वा स्वहस्ते स्थितं कृष्णमृगस्य शृंगं चात्वालनामके गर्ते त्यजेत् ॥ १
सोयं परित्यागोऽर्थकर्म सप्रयोजनत्वात् प्रतिपत्तिकर्मत्वेऽपूर्वाभावेन निरर्थकः स्या
दिति चेत् ॥ मैवं कृष्णविषाणया कंडूयतीति तृतीयाश्रुत्या यजमानशिरःकंडूयना
योपयुक्तस्य प्रतिपत्त्यपेक्षत्वात् न च प्रतिपत्तौ सत्यामपूर्वाभावः प्रासनापूर्वाभा
वेऽपि चात्वाले एवेति नियमापूर्वसत्वात् ॥ मैत्रावरुणेति ॥ ज्योतिष्टोमे श्रूयते
क्रीते सोमे मैत्रावरुणाय दंडं प्रयच्छतीति तद्दत्तदंडदानं प्रतिपत्तिकर्म यजमानो हि
अध्वर्युणा दीक्षासिध्यर्थं दत्तदंड आसोमक्रयाद्धृह पतितः ततः प्रयच्छति तस्माद्दी
क्षाग्रहणेऽउपयुक्तस्य दंडदानस्य प्रतिपत्तिकर्मैव युक्तमिति प्राप्ते आह दंडे भविष्य

उपयोगस्यापिसंभ्दावीयदामैत्रोवरुणः प्रैषानानुपदत्तितदानीयवलंवनायदंडो
पेक्षितः दडीप्रैषानन्याहेत्याम्नानात् तस्मायतियन्तिकर्मरूपादुपयुक्तसंस्काराद्द
र्थकर्मरूपः उपयोक्ष्यमाणः संस्कारः प्रतास्तः उपयोजयितुमेवहिसर्वत्रसंस्कार
स्यप्रवृत्तिः उपयुक्तेतुतिपन्तिरूपस्यसंस्कारस्यसत्वानमाप्रयर्यवसायित्वेनका
र्यपर्यवसानाभावादेप्रशदत्वं तस्मान्मैत्रावरुणसंस्कारायनतुर्थीश्रुत्याच
तद्दानमर्थकर्मेतिसिद्धांतः अर्थकर्मप्रयोजकंचरोषित्वंतच्चचतुर्थीश्रुत्यामै
त्रावरुणस्यवोध्यतेरत्याहचतुर्थीश्रुत्येति॥ विप्रायगांददातीत्यादौस्वस्व
त्वनिवृत्तिपूर्वकपरस्वत्वोत्पत्तिप्रकारकत्यागविशेषोददात्यर्थः॥उद्देश्य

रूपसंप्रदानंचतुर्थ्यर्थःतस्यचनिरूपितत्वसंबंधेनस्वत्वेन्वयः विप्राभिन्नसं
प्रदाननिरूपितगोनिष्ठस्वत्वनिवृत्तिपूर्वकपरस्वत्वप्रकारकस्त्यागोदेव
दत्तादिकर्तृकइतिबोधः दद्यादहरहःश्राद्धंपितृभ्यइत्यादौस्वत्वेपितृनिरू
पितत्वस्याबाधेपिस्वत्वनिवृत्तिव्यक्तिपूर्वकपरस्वत्वापत्त्यनुकूलत्यागरू
पेदाधात्वर्थेपितॄणामुद्देश्यत्वसत्वान्नदोषः स्वत्वहेतुश्चत्यागएवअतएव
एवंविदेशस्थपात्रमुद्दिश्यत्यक्तधनस्वीकारमंतरेणैवोद्देश्यमरणेपितृसुता
दिभिरेवतद्धनंगृह्यतेउपेक्षायांतुनपरस्वत्वोत्पादकत्यागः विक्रयोपितत
थामूल्यदानपूर्वकस्वीकाररूपक्रयस्यैवतत्रस्वत्वजनकत्वात्दानादि

नाश्यप्रतिग्रहादिजनमस्वत्वस्यैवददातेरर्थघटकत्वात्तद्रंजकेतिभावोत्रददा

तितत्कोर्तृकनिर्णेजनेच्छाध्यात्वर्थः देवदत्तादिनिष्टरंजककर्तृकनिर्णे

जनेच्छेतिवोध्यः रवंडिकेतिसंयोगविशेषानुकूलोव्यापारोददात्यर्थः शिष्य

निनिरूपितचपेटानिष्टसंयोगानुकूलोव्यापारउपाध्यायनिष्टेतिवोध्यः

शेषत्वविवक्षायांरंजकस्यत्वपि भवति आश्रयतयाफलाश्रयस्यपरयक

र्मसंज्ञंयावाध्यादजांग्रामंनयतीत्यादौनसंप्रदानतायत्स्येशेतेरस्यादौश

यनादिक्रियायाअपिसंदर्शनप्रार्थनादिजन्यारंभक्रियानिरूपितंक

र्मत्वंगम्यमानक्रियाया अपिकारकत्वप्रयोजकत्वदर्शनात्तपतिसंप्र

मू॰सा
१०५
105

दानकमारंभकर्मकभूतंपत्नीकर्त्तृकंशयनमितिबोध्यः॥ इतिस्पष्टंहरि
ग्रंथे अतिप्रसंगस्त्वनभिधानान्नक्रियायामभिप्रैतिससंप्रदानमितिवार्त्तिक
मतेपतिसंप्रदानकंशयनमितिबोध्यः॥ वर्णायंतइतितन्मतेमुख्यार्थेकद
दातिसमभिव्याहारे एवसंप्रदानतामुख्यश्चार्थः पूर्वोक्तादानमेवइद
मितिसंप्रदानमित्यर्थः॥ अनिएकारणादितिकर्त्तुः संप्रदानेनप्रवृत्ति
निवृत्त्यन्यतरव्यापारानुत्पादनादित्यर्थः॥ कर्त्तुरित्यस्योभयत्रान्व
यः कर्मणोत्सनेनानिराकरणादित्यनेनचेतिबोध्यंप्रेरणेतिद्रव्यसाधन
त्वेमवुद्धाप्रवृत्तस्यकर्त्तुः तद्बोधयित्वाप्रवर्त्तनंप्रेरणां अनुमतिस्तुक

राम
१०५

र्मनिष्ठस्तत्ताभ्युपगमः॥ अत्रेति कर्मणि द्वितीयेत्यादिविहितद्वितीया
र्थं तस्य त्वे इत्यर्थः॥ संसर्ग इति संबंध इत्यर्थः सच भेदारूपेण द्विविधः
द्विविधोपि विशिष्टबुद्धिनियामको विशेष्यविपशेषणभावनियामक
श्च अस्तित्वाभेदो नापि विशिष्टबुद्धिः नीलविशिष्टो घट इत्यनुभवात्
राह्वोः शिर इत्यादौ औपाधिकभेदमादाय भाष्ये षष्ठ्युपपादनान्नाभेद
संबंधनिबंधना षष्ठीति भावः॥ ननु नैयायिकादीनिये विभक्तीनांक
र्मत्वाद्यर्थवाचकत्वात्कथमभेदान्वयो बाध्यादात आह विभक्तीनामि
ति कारकविभक्तीनामित्यर्थः॥ धर्मीति कर्मत्वादिशक्तिमदित्यर्थः ननु

मं॰सा
१०६

धर्ममात्रवाचकत्वेपि को विरोधोत आह धर्ममात्रेति धर्ममात्रस्य द्वितीया
द्यर्थत्वेभीप्सिते तथैव वदेदिति भावः॥ ननु कर्मणीत्यस्य विषयसप्तमीत्वा॥
त्कर्मत्वशक्तिमत्युक्तस्यर्थे प्रतिपादनीये प्रातिपदिकाद्द्वितीये सर्वाद्विभक्ते
र्धर्मवाचकत्वेपि न सूत्रस्वरसभंग इत्यत आह कर्मार्थ इति पक्षस्तु तुल्यः
शेत्योऽश्व इत्यादौ धर्मिवाचकतायाः सर्वैरपि स्वीकारादिति भावः ननु
तत्र नामार्थयोरभेदान्वयादस्तु धर्मिवाचकत्वं प्रकृते तु न कस्याप्यनुरो॥
ध इत्यत आह बहुव्रीहाविति प्राप्तेति कारकविभक्तीनां धर्मवाचकत्वे
तदर्थे विहितसमासस्यापि धर्मवाचकत्वापत्त्या प्राप्तानंद इत्यादौ समा

राम
१०६

108

नाधिकरणे देवदत्तादिपदोपस्थाप्यदेवदत्तादौ समासार्थस्याभेदान्वयाऽनु
पपत्तेर्धर्मिज्वाचकत्वमावश्यकमिति भावः ॥ ननु बहुव्रीह्यर्थे बहुव्रीहौ यदि
तावत्तदा सर्वमतत एव बहुपदार्थेस्स्वसंबंधवत्तायाः ल क्ततया हर्योर्द्विपदार्थयो
तरसामानाधिकरण्योपपत्तये लक्षणया एकार्थीभावस्य वाऽस्वीकरणी
या. तया प्रकृतेपि तद्वारैव निर्वाहे कृतं स्वपो धर्मिवाचकत्वेनेत्यत आह स
पांकर्मेति यदि धर्मवाचकत्वमभिप्रेतं स्यात्तथैव वदेत् तस्यान्मुनित्रयाल
क्त धर्मवाचकत्वमप्रामाणिकमिति भावः ॥ सप्तमीपंचम्यौ कारकमध्येद्रत्व
त्रोपदर्शितभाष्यकारोक्तपक्षमवलंब्याह आश्रयस्यापीति आश्रयत्वेनाभा

भ॰ सा
१०८
107

नैपिनक्षतिरितिभावः वाच्यमित्यादिद्वितीयातृतीयासप्तमीनामितिशेषः ॥ नन्वा
श्रयत्वस्यशक्यत्वे आश्रयतावच्छेदकं वाच्यं तत्राश्रयेतत एवेति॰
त्वेसतिसकलाश्रयवृत्तित्वरूपमतिगुर्विंत्यस्मिन्पक्षे दोषइत्यत आह तदे
वेति आश्रयत्वमेवेत्यर्थः ॥ अनेकशक्यस्यानुगमार्थमेवानुगतंशक्यताव
च्छेदकमपेक्ष्यते शक्तेस्त्वखंडत्वेननानुगमकधर्मान्तरापेक्षेतिभावः व्यापा
रोपीति व्यापार एवेत्यर्थः विभागमात्रमिति मात्रपदेनाश्रयत्वमवच्छेदः पं
चम्यर्थविभागे प्रकृत्यर्थस्यावधित्वरूपस्वरूपसंबंधेनान्वयः ॥ आधेय
तासंबंधेनवेत्युक्तं अत एवेति कर्मत्वादिशक्तेर्वाच्यत्वादेवेत्यर्थः नविरू एम १०८

द्युत इति शाब्दबोधे जातिव्यक्त्योर्भाने पि जातिरेव शक्यानागृहीतविशे
षणान्यायात् व्यक्तेर्वाच्यत्वे व्यभिचारानंत्यादिदोषादितित्रोक्तं तदप्य
नुकूलं भवतीभावः॥ षष्ठ्यामपीतिकारकाणामित्यर्थः॥ मूलेसंबंधइत्य
नेनोक्तं षष्ठ्यर्थं विशदयति शेषेषष्ठीति संबंधमात्रमितिपक्षद्वयेपीति भा
वः सर्वसामान्यरूपेणमात्तु॥ स्मारतीत्यादौ विषरूपेणराज्ञः पुरुष इत्या
दौ बोध्यः अतएव संबंधांतरसत्वेपिपुरुषोनराज्ञः॥ इतिप्रामाणिकः प्रयो
गः षष्ठीवाच्यसंबंधोपि क्रियकारकभावमूलक एव राजा पुरुषाय ददाती
ति संप्रत्ययाद्राजाकर्त्ता पुरुषः संप्रदानं एवं वृक्षस्य शाखेत्यादौ वृक्षोधि

करणं वास्तविकसंबंधस्याविवक्षणेतन्मूलकसंबंधस्यविवक्षणेषष्ठी
भवतिकारकेतिकर्तृकर्मणोःकृतीतिसूत्रविहितषष्ठ्याइत्यर्थः॥दर्शना
दितिरथ्याचायमपिपक्षः भाष्यसंमतइतिभावः कारकशब्देनधर्मिग्रह
णेघभुक्त्वायंव्रजतेभोक्तेत्यादौधर्मिणः॥कर्तुरैक्यान्नमध्यव्यपदेशोनसंभव
त्यपार्थकंसूत्रमितिशंकायांधर्मिणएक्येपिकालभेदाद्भिन्नभुजिक्रियाकर्तृ
त्वादिभेदमादायतन्निमित्तमध्यव्यपदेशोनानुपपन्नइतितत्रोक्तं अतएव
ग्रामादेआक्षेपकत्वं भुक्तेइत्यादौकारकस्यैक्येनकर्मोधिकरणयोरभिधाने
पिविभिन्नक्रियानिरूपितकर्मत्वाधिकरणत्वयोर्भेदादेकस्याभिधानेप्यनभि

हितद्द्वितीयशक्तिमादायद्वितीयाद्युपपत्तिः मौलंयथायथपदंव्याचष्टेउक्त
प्रकारेणेतिपदार्थवोध्येयाविभक्तिःसमर्थातस्यासोर्थोवसेयः तथैवोक्तं
प्रागितिभावः अत्रेतिकारकविभक्तिनांधर्मिवाचकत्वेइत्यर्थः॥वहूनांकु
लंवहुविरुद्धं ननुविषयतायांलक्षणायांनपूर्वोद्धं भाष्यंप्रतिकूलमतउक्तम
ईदृप्रदर्शितनियमंवाधकमितिप्रदर्शनाशयंप्रकाशयत्ययंभावइत्यादिना
वार्त्तिकेपिनाशक्तिःकारकमितिपक्षोपिसूचितः॥तथेतिसुपवत्तिङमपिसं
ख्याकर्मादिवाचकत्वमित्यर्थः तत्रसुप्तिङःसुप्रकृतेषु अर्थेष्वित्यर्थः॥ए
कवाक्या तयेतिस्तत्संख्येतिकर्मादिनिष्ठैकत्वादिसंख्यायाश्चेत्यर्थः॥क

भू.सा
१०९
10.9

र्मण्येवेतिएत्वंचविशिष्टकर्मण्येवद्वितीयैकवचनमम्नकरणादावमित्य
र्थः॥मादिरितिकर्मादियोग्यार्थकप्रातिपदिकाद्वेत्तद्धितस्वार्थेप्रथमेत्येव
वमादिरित्यर्थः प्रातिपदिकसूत्रेमात्रग्रहणाकरणाप्रयुक्तलाघवेनार्थनि
यममाहकर्मणिद्वितीयेवेतिविशेषानुशासनाभावेनान्याविभक्तिरित्य
र्थः॥उभयथेतिशब्दार्थेसिद्धनियमेत्यर्थः निषेधविषयद्वर्जितयाचविषय
तायानिरूक्तकर्मात्वानात्म.कतयात्रद्वितीयायाः शास्त्रेणाविधानातद
र्थतात्पर्येणतदुच्चारणस्यान्तत्वान्निषेधविषयद्वत्यर्थः॥अतएवविभ
क्तौलक्षणायांमुनित्रयविरुद्धत्वादेवेत्यर्थः ननुव्याकरणंयथाशक्ति

राम
१०९

ग्राहकंतयानिरूढलक्षणाग्राहकमपितयाचमुख्यार्थबाधादिसत्वेलक्ष
णास्वीकारेपिबाधकाभावः॥विभक्तौनलणेतिप्रवादस्त्वेकविभक्त्यर्थ
परविभक्तेर्नलक्षणेत्येतत्परएतएवव्युत्पत्यानुशासनवैयर्थ्यमपिनेत्यतआ
हदिगितिदिगर्थस्तुमुख्यार्थमादायशास्त्रचारितार्थ्यगौणेतत्त्वव्युत्पत्तौमाना
भावः॥भवतिचमुख्यार्थमादायघटंजानातीत्यादौद्वितीयोपपत्तिर्यथात
थोपपादितंप्रागितिविषयतासंबंधावच्छिन्नप्रीत्यनुकूलस्तत्समानाधि
करणोव्यापारोस्त्यर्थः॥नत्फलभूतप्रीतेःसमवायेनाश्रयोहरिःसमवाय
संबंधावच्छिन्नप्रीत्यनुकूलोव्यापारोप्रीधातोरर्थः॥अतएवहरिंप्रीणाय

तीत्यादिसिद्धिः रूच्यर्थीतिसूत्राभावे हरेर्षष्ठी प्राप्तातस्माच्छेषषष्ठ्यपवादो
त्रचतुर्थीहरयेरोचते भक्तिरित्यादौ हरिसंप्रदानिका भक्तिकर्तृकारुचि
रितिबोधः हरिनिष्ठाया भक्तिविषयाप्रीतिस्तदनुकूलो भक्तिनिष्ठो व्या
पार इति यावत् प्रीधातुसामार्थकत्वेतु प्रीधातुप्रीधातुयोगे चतुर्थीवार
णं प्रीयमाण इति निर्देशात्कर्तव्यमिति गौरवं अभिलषतेश्च प्रीतिव्यभिधि
करणोव्यापारोऽर्थः॥ अतस्तद्योगेपिद्वितीयागोपीस्मरात्कृष्णायश्लाघ
तेर्बोध्यविषयास्तुतिरर्थः बोधश्च आश्रयतयाहर्यादिवृत्तिः स्तुतिश्च गुण
वत्वप्रतिपादकशब्दप्रयोगः॥ बोध्याश्रयस्यश्लाघेतिसूत्रेणसंप्रदानतात्ती

स्पमानपदेनएप्यर्थेकर्मणोगुहणंप्रकृतस्यार्थस्यवा आद्येगोपीकस्मरहेतुकर्थेत्वंकृ
ष्णवृत्तिवोध्यविषयास्तुरितिवोध्यः द्वितीयेवोध्यविषयमितरादर्शनयोग्यदेशस्था
पनमर्थः॥ आत्मानभिसादेरध्याहारः सपत्नीभियावात्मनस्तथास्थापनंएवं
चगोपीकर्तृकात्कृष्णसंप्रदानिकात्कृष्णवृत्तिवोध्यविषयात्मकर्यकतथाचस्था
नानुकूलाक्रिमेतिवोध्यः तिष्ठतेः स्वाभिप्रायवोधानुकूलास्थितिरर्थः शेषशा
पेः स्वाभिप्रायवोधानुकूलशापथकरणमर्थः॥ कृष्णसंप्रदानकवोधानुकूल
स्थितिस्तत्कर्मकवोधानुकूलशापथकरणमितिवोध्यः वृह्मणापशांतंधारयती
त्यादौद्रव्यांतरदानाभ्युपगमपूर्वकपरदत्तद्रव्यादान— न्याद्दृष्टविशेषएव

भ॰सा धारयतेरर्थः तद्घटकदानान्वयिकर्तृत्वं चतुर्थ्यर्थः॥ परद्रव्यादानेन दुरदृष्टं ज
१११ न्यते सोऽधनेन नाश्यते ब्राह्मणकर्तृकं द्रव्यांतरदानाभ्युपगमपूर्वकदानकर्म द्रव्या
दानजन्यदुरदृष्टमधमर्णे निष्ठमिति बोध्यः ऋणशब्देनावश्यदेयमुच्यते तेन भ
क्ताय धारयति मोक्षमित्यपि भवति हरये कुध्यति द्रुह्यतीर्ष्यत्यसूयतीत्यादौ कु
धद्रुहेति संप्रदानता तत्र क्रोधो द्वेषविशेषो ज्ञानविशेषो वा द्रोहो द्(?)हितेच्छा ई
र्ष्या परोत्कर्षगोचरो द्वेषः दोषारोपानुकूलश्चित्तवृत्तिविशेषोऽसूया चतुर्थ्य
र्थः संप्रदानं तस्य विषयत्वादिसंबंधेनान्वयो यथायथमूह्यः हरिसंप्रदानकः राम
क्रोधद्रोहादिरित्यन्वयबोधः एते ज्ञानविशेषरूपकोपमूलकाः वाढ्कृच १११

स्वव्यापारेण परेणानुमीयंते पाकाय व्रजतीत्यादौ तुमन्नंतेन स्वेच्छाधीनेच्छाविषयत्वं व्रज
नेवोध्यते भाववचनाविनोद्यग्रआदयोपि तत्र विध्यामं ते तदंताश्चतुर्थ्या तुमर्थेति विधीयंते
फलेभ्यो यातीत्यत्र फलकर्मकाहरणकर्मकं यानमिति वोध्यः॥ नलोंन्तरणाय तृणं वा
मन्येदत्यत्र हितीयाचतुर्थ्यौ: कर्मोर्थकत्वं तत्कर्मकत्वेन सदृशकर्मकमहन्ति ज्ञाना
भाव इति वोध्यः॥ तद्विशेषणत्वेन सदृशप्रकारे केतियावत्॥ भूपामदारु विप्राय भो
जनमित्यादौ तादर्थ्ये चतुर्थी तादर्थ्यमुपकार्योपकारकभावसंबंधः॥ विप्राय द
धीत्यत्र विप्रकर्तृकभोजनोपकारके दध्यनि विप्रोपकारकत्वारोपात्सुयोगः॥ सुखा
यपुण्यं नरकाय पापमित्याद्यपि साध्वेव तुमर्थाच्चेति सूत्रं तु द्यजातादर्थ्ये स्यो ना त्वा
द्धिहितं मे तु सुखाय पापमिति नेच्छेतित न्मे तादर्थ्यं तदिच्छाधीनेच्छाविषयव्यापारा

भूः ता अथ यत्वं इच्छाधीनेच्छाव्यापारा अथ यत्वं चतुर्थ्यर्थः॥ व्यापारः लक्षणादिः एतन्मते या
११२ गाययातीत्यादावप्राप्त्यानुमर्थेतिसूत्रं भक्तिर्ज्ञानायकल्पतेयूपेरूपस्तत्प्रार्थेकत्वंप्र
थमापवादः क्लृपिसंपद्यमाने वेत्यनेन विकारवाचकाच्चतुर्थी विकारेच प्रकृतिस्व
पारोपः भक्तिरूपज्ञानकर्तृकोत्पत्तिरित्यर्थः॥ भक्तिर्निदिध्यासनरूपा प्रकृ
तिविकृत्योर्भेदविवक्षायां तु जनिकर्तुरिति भक्तिपदात्पंचमी ज्ञानस्य कर्तृत्वेन प्र
थमा भक्तिर्ज्ञानात्मना परिणमते इत्यत्र क्लृपसशब्दस्तद्वृत्तिधर्मपरः ज्ञानत्वविशि
ष्टरूपांतरप्राप्तिर्भक्तिकर्तृका इति बोध्यः॥ प्रकृत्यादित्वादत्र तृतीया नमः स्वस्त्यादि
योगेनमः स्वस्तीति चतुर्थी नमः॥ शब्दार्थस्यागीनमस्कारश्चएषोर्थः शिवायनम राम ११२

इत्यादौ त्यागोर्थः॥ चतुर्थ्यां प्रकृत्यर्थस्य शिवादेरुद्देश्यत्वं प्रत्याय्यते स्वत्वभागितया
त्यागविषयत्वमेव तदुद्देश्यत्वं विषयता विशेष उद्देश्यत्वं चतुर्थ्यर्थः॥ त्यागश्चोक्तोद
दास्यर्थ एव शिवोद्देश्यकत्यागविषयो द्रव्यमिति बोध्यः त्यागश्च देशनादेशितोद्देश्य
स्व५ कत्वं प्रयोक्तृपुरुषकर्तृकत्वोपरागेणैव नमः पदेन बोध्यते अन्योच्चारितनमः॥ पदेना
न्वदीयत्यागाबोधनात्॥ अत एव त्यागे त्यज्यमानद्रव्ये च न शंसयः॥ अत एवाहं ददे
इति वा तन्नाहं न म इति प्रयुज्यते शब्दशक्तिस्वभावात् न वा परकीयत्वबोधनाय चैत्रो
नम इत्यादि प्रयुज्यते यजमानद्रव्ये स्वीयत्वमारोप्यैव नमः॥ पदं प्रयुज्यते आहार्यारो
पोऽपि देशनादेशितत्वात्सफलप्रदो भवति देशनेत्युक्तेर्न नीवोद्देशेन प्रयोगः॥ शिवोद्दे

भू·सा
११३
113

शोनत्वमुक्तं शिवस्त्वंनप्रतिगृह्णीयादित्यादिविषयंनतिरूपोनमः॥ पदार्थश्चस्वापकर्षबो
धनानुकूलः स्वीयव्यापाररूपश्च तुर्थ्या चापकर्षोन्यप्यवधित्वं प्रत्याप्यते स्वमुच्चार
यितातथावचैत्राद्युच्चारितान्नमोहरयेइतिवाक्याद्धर्यवधिकचैत्रापकर्षबोधनानु
कूलश्चैत्रीयव्यापार इतिबोधः॥ प्रजाभ्यः स्वस्तीत्यत्रप्रजासंबंधिमंगलमर्थः॥ स्वाहा
स्वधावषट्शब्दास्त्यागार्थाः॥ व्याख्याता एव अलमाद्यर्थः सामर्थ्यवान्देत्यमारणा
दिसंबंधिसामर्थ्यवानितिबोधः॥ इति भूषणसारविवृतौ सुबर्थनिर्णयः॥ ॥ प्रत्यया
र्थनिरूपणक्रमप्राप्तं तत्र कृत्तद्धितस्यार्थनिरूपणमित्याशयेनाह नामार्थ इति जातिरिति
प्रवृत्तिनिमित्तमित्यर्थः॥ तेनाभावत्वाकाशत्वादीनां नैयायिकोक्तजातिलक्षणा

ए म
११३

भावेपिनक्षतिः॥ तस्मा एवेतिएकजातेरित्यर्थः नवावकतावच्छेदकानुपूर्व्याएक
त्वेनवाच्यतावच्छेदकरूपवाच्यस्याप्येकरूपमेवन्माय्यमितिभावः॥ ननुव्यवहारस
ह्यव्यक्तावेवशक्तिनिर्णयेनकथंजातौनत्सिद्धिरत आह अनेकव्यक्तीनामितिव्य
वहारेणव्यक्तौशक्तिग्रहेप्यानंत्यव्यभिचारादिशाङ्काभयाज्जातावेवशक्तिर्निर्णी
यतेइत्यर्थः॥ ननुसकलव्यक्तीनांग्रहणपक्षेआनंत्यादिदोषोव्यक्तिशक्तिग्रहेगौ
रवमुद्भावयन्प्रतिवध्नातुएकव्यक्तिशक्तिग्रहस्तुजातिसमानएवेत्याशयवान्शं
कतेनचेतिविनिगमने॥ त्येकत्रपक्षपातसाधिकायुक्तिर्विनिगमनात् दभावादि
त्यर्थः॥ एवं व्यक्तिविषयकशक्तिग्रहादपरव्यक्तिविषयकशाब्दबोधस्वीकारेघटव्य

भू॰सा
११५
114

क्तिशक्तिग्रहान्यटविषयकशाब्दबोधापत्तिरितियद्विषयकशक्तिग्रहस्तद्विषयकशाब्द
बोधजनकइत्याकारकनियमस्यावश्यंस्वीकरणीयतयैकघटव्यक्तिशक्तिग्रहादपरघ
टव्यक्तिबोधः कथंस्यात्तद्बोधार्थंव्यक्तिःस्वीकरणीयेत्यादिनीत्यासमाधत्ते एवंहीतिल
क्षणायामिति असंबद्धार्थस्यभानाभावादितिभावः स्वसमवेतेति स्वं घटव्यक्तिः त
त्रसमवेतं घटत्वं तदाश्रयत्वमशक्यघटव्यक्तौ तरेपि सर्वथा गौरवान्नमुच्यतीति
जातिशक्तिवाद एव लाघवादादरणीय इति भावः॥ ननु जात्यनुगतानां सकलव्य
क्तीनामेका शक्तिः॥ स्वीक्रियते एवं च नानन्त्यादिदोषेत आह किंचैवमिति न्यायमा
पितिविशेष्यविषयकत्वस्य विशेषणविषयकत्वानियमादितिभावः॥ एवं च विशि

ए म
११५

वशक्तिवादे विशेषणशक्तिग्रहस्यावश्यकतया विशेष्येपि शक्तिग्रहस्य तेन वक्तव्यत
माउभयत्र शक्तिस्वीकारे गौरवबाधकाभावाज्जातिरेव शक्तिः सिध्यतीति भावः
ज्जात्याख्यायामेकस्मिन्निति सूत्रे सवर्त्तिणग्रहणमपरिभाष्यं आकृतिग्रहणात्॥ सि
द्धमिति वार्तिकं चास्मिन्पक्षे प्रमाणं नन्वेवं घटमानय गामानयेत्यादौ गोघटा
दौ वानयनकर्मत्वाद्यन्वयानुपपत्त्या जलाहरणादौ हनवाहनादितत्फलीभूता
र्थबाधाच्च जातिशक्तिवादो नरमणीयः॥ आक्षेपाद्व्यक्तिबोधोपि तथैव आक्षे
पस्यानुमानरूपत्वेन अनुमानादिप्रमाणोपस्थितानामर्थानां शाब्दबोधे भानाभा
वात्॥ शब्दाद्यनुपस्थितानामर्थानामेव शाब्दबोधे भानादन्यथातिप्रसंगात्

मू:सा अर्थापत्तिस्तरूपत्वेप्ययमेव दोषो दुरुद्धरः॥ किंच अनुपपत्तिमंतरेणापि गोरस्तीसत्तोगो
११५ त्वविशिष्टबोध्यादि सत आह व्यक्तिवेध्य स्तित्तिलक्षणयेति स्वशक्यं गोत्वाद्याश्रयत्व
115 रूपलक्षणयेत्यर्थः॥ एवं च व्यक्तेरपि पदवृत्तिजन्योपस्थितिविषयतया शाब्दबोधो
नानुपपन्नः पूर्वोक्तानुपपत्तिश्च नेति भावः॥ एवं चेति लक्षणाभ्युपगमे चेत्यर्थः॥ त
त्र व्यक्तौ उपपद्यत इति॥ अन्यथाप्रत्ययानामिति व्युत्पत्तेः सन्नोपपद्यत इत्यर्थः॥ न
नु व्यक्तौ लक्षणाभ्युपगमे युगपद्वृत्तिद्वयविरोधो न आह दिगिति तदर्थस्तु तद्वित्ता
र्थेति सूत्रभाष्ये स्फुटतावालंभनादीनां संभवो नास्तीति कृत्वा तत्सहचरिते द्रव्ये भवि
ष्यति यथा। याग्निरानीयतामित्युक्ते रवौदितमपि पात्रमानीयते इत्युक्तत्वात्सति एम

तात्पर्यविषयीभूतमपिप्रतीयते गंगायांघोषमत्स्यौपथ्येतिप्रयोज्यप्रयोजकत्वद्रूव्यव
हारादानयनादिक्रियाकर्मत्वयोग्यानुगतसंस्थानविशिष्टघटत्वाश्रयकिंचिद्घ
टव्यक्तौशक्तिग्रहसमयेसमानानुगतसंस्थानेनघटत्वादिसमानधर्मेणैवासादृ
श्यादुपस्थितसर्वघटव्यक्तिशक्तिग्रहः॥ अतएवव्यक्तिपक्षमवलंब्यरूपसामान्या
द्वासिद्धमित्यणादिसूत्रे उक्तमितिव्यभिचारः॥ आनंत्यमप्यसाधारणधर्मस्यैक्या
न्नदोषावहंलक्ष्यतावच्छेदकेलक्षणाभाववद्वशक्यतावच्छेदकेपिशक्यभावेन
क्षतिकरमित्याहयद्वेतिननुव्यक्तिः॥ पदार्थइत्यत्रकिंमानमतआहकेवलव्यक्तीति
जातिपक्षेएकेनशब्देनतात्पर्यवशादेकानेकव्यक्तिप्रसायनात्तदनर्थकंस[illegible]

व्यक्तिपक्षत्वापकमित्यर्थः॥ ननु आग्रहणस्य भाव्यप्रत्याख्याना त्सरूपसूत्रस्य
च व्यक्तिपक्षे एव उपयोगाद् तत्र दृढतप्रमाणाभावाद्व्याह युक्तं वैतदिति केवल
व्यक्तेरेव एकपदेन गृहणं संयुक्तिकमित्यर्थः वेन सरूपसूत्रस्य भाष्यमपि द्रव्या
भिधाने प्रमाणमिति सूच्यते युक्तिमेवाह व्यवहारेणेति॥ प्रयोज्यप्रयोजकवृद्धव्यव
हारेणानयनादियोग्यव्यक्तावेव शक्तिग्रहो भवतीत्यर्थः॥ एतत्काले आनंत्यादिदो
षं परिहरति संबंधीति सामान्येन पुंसकं शक्तिरूपसंबंधस्य संबंधितावच्छेदकगो
त्वादिजात्यनुगतीकृतनानाव्यक्तिष्ववच्छेदकधर्मैक्यादेकत्वादेव शक्ते
रूपगमान्नानंत्यव्यभिचारदोषप्रसक्तिर्नतस्मृमुक्तं गौरवं चेति भावः॥ अत्र कस्य

शाब्दबोधाविषयत्वादबुद्धस्य चानुगमकत्वमुपलक्षणत्वं चन भवतीति शंकते नचै
वमिति ॥ व्यक्तौ शक्तिस्वीकारे घटत्वादेः तदवच्छेदकत्वस्वीकारे चेत्सर्वः ॥ नागृही
तेतिहेतुकथनमिदं तदेव गोत्वाद्येव वाच्यं शक्यं समाप्यते अकारणत्वेपीति अन्यथा
सिद्धत्वाद्दंडत्वादेरकारणत्वेपि कारणतावच्छेदकत्वस्य [illegible]ख्या तथा शक्यपरासंबं
धित्वेन तीरत्वादेरलक्ष्यत्वेपि लक्ष्यतावच्छेदकत्वस्य सर्वतंत्रसिद्धत्वात्तद्रूपेणा
शक्यस्यापि घटत्वादेः शक्यनिष्ठावच्छेद्यतानिरूपितावच्छेदकतास्वरूपशक्य
तावच्छेदकत्वस्वीकारे ॥ बाधकाभावात् शक्यस्यैव शक्यतावच्छेदकत्वमितिनि
यमेमानाभावादिति भावः ॥ स्वोक्तार्थे संमतिमाह उक्तं चेति ॥ भावानां व्यक्तीनां

नानात्वादनेकत्वात्॥ एकं अनुगतं घटत्वादिकं उपलक्षणं अशक्यत्वेपि शक्यानु
गमकं कृत्वास्वीकृत्याशब्दोघटादिः सुकरसंवंध्यः सुग्राह्यघटादिनिष्ठशक्तिस्व
पसंवंध्यः॥ नचेति॥ शक्तिग्रहाविषयव्यक्तिवोध्योनभविष्यतीत्यर्थः॥ एकव्यक्तौ
शक्तिग्रहसमयेघटत्वादिनीसामान्य॰लक्षणाधीनसर्वव्यक्त्युपस्थितौसत्यांस
र्वघटत्वाश्रयव्यक्तिषुशक्तिग्रहःसुलभइतिभावः॥ ननुजातिशक्तिवादेनर
मणीमतनरइतिप्रागेवप्रतिपादितं किंचजातिशक्तिवादेगौरस्तीतिवाक्यद्घाग
वादिव्यक्तीनामपिसंप्रत्ययोभवतिएवंगोत्वमस्तीतिवाक्यादपिगवादीनांसंप्र
त्ययोभवितुमर्हतिगोत्वशक्तिग्रहस्यविशिष्टवोध्योपयिकत्वस्यसत्वात्॥ अम

विध्यस्य सहचरितत्वादेनपि तुल्यत्वात् ॥ व्यक्तिमात्रबोध्योपि न विचारसहः सर्वेषां
शव्दानां पर्यायतापत्तेः ॥ व्यक्तिमात्रबोधस्य गोनील इत्यादीनां समानत्वात् ॥ किंच य
द्व्यक्तौ संबंधग्रहः शव्दस्य तस्या एव बोध्यो भवति कालांतरीय देशांतरीय घटादि
व्यक्तौ संबंधाग्रहात्तेन शव्देन न बोध्यो न स्यात् सामान्यलक्षणाधीन पूर्वोक्तप्रका
रस्तु न सर्वसंमत इत्यात इमं पक्षं स्वस्कापक्षांतरमाह वस्तुतस्त्वित्यादिना विशिष्ट
मिति जातिविशिष्टा व्यक्तिरेव वाच्येत द्वाख्यादत्रेभ्यते इत्यर्थः ॥ ननु व्यक्तिविशि
ष्टजातिरिति जात्यतिरिक्तपदार्थानां किं विद्धर्मपुरस्कारेण भाने जातेस्तु स्वरूप
तयैव भानमिति नियमविरोधात् ॥ तथैव सर्वेषामनुभवात् ॥ यद्यप्येतद्भाष्यं

मु॰ सा जातिव्यक्त्योर्विशेषकत्वेतशक्तिग्रहबोधकत्वेपिस्वयोजनंतथाप्युक्तंतत्रभाष्यादि
११८ शिष्टेशक्तिग्रहएवयुज्यतेअन्यथाकारकसंसर्गयोरिवकर्तृकालयोरिवजाति
118 व्यक्त्योर्विशेष्यविशेषणभावानापन्नमोः॥ शाक्यत्वेगोपदाद्गोत्वंव्यक्तिश्चेतिबोधा
पत्तेःयद्धर्मावच्छिन्नेशक्तिग्रहःतद्धर्मावच्छिन्नपदार्थोपस्थितिस्तद्धर्मप्रकारकएवशाब्द
बोधइतिनियमादन्यथातिप्रसंगात्मनुगतस्त्रसर्वैकद्गतिपक्षोतआहकेचित्तस्यैवेतिघटप ए. ५
दंघटबोधकमित्याकारकशक्तिग्रहघटकबोध्यप्रकारतावच्छेदकशक्त्याश्रमघट
त्वाद्यभ्युपमाद्यायेत्यर्थः॥ननुघटपदंघटबोधकमित्याकारकशक्तिज्ञानात्स्वरूपतो
घटत्वप्रकारकविशिष्टबुद्धेरिवजातित्वेनघटत्वप्रकारकमिमानघटइत्याकारक रा.म
११८

विशिष्टबुद्धेरप्यापत्तिः कार्य्यतावच्छेदकाक्रांतत्वादत आह तथा चेति घटत्ववि
शिष्टबोध्ये स्वरूपतो घटत्वप्रकारकबोध्ये कार्यकारणेति तथा च पूर्वोक्तस्थले घ
टत्वांशे जातित्वप्रकारकत्वान्न कार्य्यतावच्छेदकाक्रांतत्वं तत्र भिन्न एव कार्य्यका
रणभाव इति भावः॥ प्रपंचितमिति निरवच्छिन्नप्रकारताकत्त द्विशिष्टबुद्धिं प्रति नि
रवच्छिन्नप्रकारताकतद्व्यक्तिज्ञानस्य सावच्छिन्नप्रकारताकविशिष्टबुद्धिं प्रति सा
वच्छिन्नप्रकारताकशक्तिज्ञाने हेतुरित्यादि प्रपंचितमित्यर्थः॥ तदिति विशिष्टशक्य
त्वमुपगम्येत्यर्थः॥ जातीति जातिविशिष्टव्यक्तिरित्यर्थः उभयोर्वाच्यत्वेऽपि पश्चा
द्विशेष्यविशेषणभावाद्वैशिष्ट्यलाभ इति भावः॥ लिंगानीति गुणगतावस्थो वि

भू॰सा
११९
119

शेषः सामान्यतो लिंगविशेषमाह स्वलक्षजेति स्वाभाविकसाम्यवस्थेत्यर्थः ॥ आधिक्यमि
ति स्वाभाविकादित्यादिः ॥ आधवा तेषां मध्ये यस्य कस्यचिदाधिक्ये इत्यर्थः ॥ एवमन्य
त्रापि तत्तच्छब्दनिष्ठमिति जातिगुणक्रिया द्रव्यपदच्छाभेदाभिन्नशब्दनिष्ठं स्वाश्र
यवाच्यमित्यर्थः ॥ पुल्लिंगः शब्दस्त्रीलिंगः शब्द इत्यादिव्यवहारात्स्वमोर्नपुंसका
दित्यादिसूत्राच्च शब्दनिष्ठमेव लिंगमिति भावः ॥ एकार्थे शब्दान्यत्वाद्दृष्टं लिंगा
न्यत्वमिति शेषः स्वरस्थत्तभाष्यस्य तु एकस्मिन् धूल्यादिरूपेर्थे धूली पांशूरजा इति
लिंगनानात्वदर्शनादन्यदेव शब्दनिष्ठं लिंगमित्यर्थः ॥ कथमन्यथा विरुद्धाव
स्थानमेकस्मिन् भवेत् वस्तुतोर्थनिष्ठत्वेपि न वाच्यकमस्ति न वपुंल्लिंगः शब्द राम
११९

इतिप्रतिरेववाधिकेतिवाच्यंपुंस्त्वविशिष्टार्थवाचकत्वेनतथाप्रतीतिसंभवात्तत्स्येवा
र्थस्यपुंस्त्वाद्युपाधिभेदान्द्देदंपरिकल्प्यपुंल्लिंगस्त्रीलिंगइतिव्यवहारात्॥स्वयोर्नपुं
सकादित्वादेरपिनपुंसकत्वविशिष्टार्थवाचकादित्यर्थोऽन्यथाऽत्रदोषः॥सर्वोपिद्र
व्यस्वरूपोर्थोलिंगत्रयभाग्भवतिपरंतुकेनचिच्छब्देनपुंस्त्वविशिष्टएवसोऽर्थउ
च्यतेऽन्येनस्त्रीत्वविशिष्टइतितस्मादर्थगतपरिभाषिकलिंगस्वीकारेपिनक्षतिरि
तिप्रतिभातितमेवेतिसमानानुपूर्वीकत्वेपिविरुद्धावस्थारूपलिंगभेदाद्यादायेत्यर्थः
भिद्यंतइतिपुंस्त्वादिलिंगकानुमितौइतरभेदाश्रयाभवंतीत्यर्थः॥ननुविरुद्धानां
लिंगानामेकत्रसमावेशाभावादनेकलिंगकोयमितिप्रवादोनसंगच्छतइत्यतआह

केषांचिदिति पात्रादिशब्दानामित्यर्थः ॥ वस्तुतो भिन्नत्वेपि समानुपूर्विकत्वरूपदोषवशा
द्भेदाध्यासादिति भावः ॥ लौकिकं स्तनकेशवत्वादिरूपं लिंगं तु न शास्त्रप्रवृत्त्युपयो
गी दारादिशब्दे व्यभिचारात् ॥ अत एव तत्र पुंसीति नकारः ॥ एवं चेति पारिभाषिकलिं
गस्य व्यवहारोपयोगित्वेवेत्यर्थः ॥ यद्यर्थनिष्ठं लिंगं भवेत् व्यक्तौ वस्तुपदपदार्थपदे
न व्यवहारो न स्यादिति भावः ॥ ननु शब्दनिष्ठलिंगस्यैव व्यवहारोपयिकत्वे पशुना य
जेतेत्यत्र पशुस्त्रीकर्तृकयागादप्यदृष्टसिद्धिः स्यात् तदुक्तलिंगस्य व्यक्त्यादिशब्दो
क्तलिंगवत् स्त्रीपुंसादिसाधारण्येनार्थोपरिच्छेदकत्वादत आह तच्चेति शब्दनिष्ठ
येवेत्यर्थः ॥ अर्थेति अर्थमपि परिच्छिनत्तीत्यर्थः ॥ विशेषणत्वेनान्वयादिति भावः

पश्वादीतिलिंगमितिशेषः॥ पशुस्त्रीतिपशुरूपस्त्रियोनास्तीतिभावः॥ यदिस्त्री
साधारण्येनपशुशब्दोऽर्थंबोधयेत्॥ तर्हिस्त्रीलिंगपशुशब्दमेवोच्चारयेत्तुहिंम
गपशुपशब्दोच्चारणाद्यस्त्रीपशुर्नयालोगंगामितिनिर्णीयतत्रस्यर्थः॥ ननुव्यक्त्या
दिशब्दानामिवर्थेनियतलौकिकलिंगानादरेणपुंव्यक्तिवत्पशुशब्दस्यापितथै
वास्त्वित्युक्तदोषोदुरुद्धरइत्याशंक्याहनच्चेतिसाधारण्यंस्त्रीपुंसव्यक्तित्वंननु
पशुनेतिवैदिकप्रयोगात्तस्यापिनित्यपुंस्त्वमेवास्तीत्यतआहपश्वानयेतितथा
चवेदेएवपशुशब्दस्यास्त्रीलिंगस्यापिदर्शनान्नव्यक्त्यादिशब्दवदजहल्लिंग

भू॰ सा
१२१
121

त्वमिति भावः॥ स्त्रोक्तेः संमतिमाह मीमांसेति ननु प्रत्समांतानां नित्यपुंस्त्वेऽपष्वेत्यादि वैदि
कप्रयोगाणां कथं निर्वाह इत्यत आह वेदे भाष्येऽपीति तथो व्यक्त्यादिवत्पशुशब्दस्या
प्यजहल्लिंगत्वान्नतस्यार्थपरिच्छेदकत्वमिति भावः॥ ननु नहि पुंस्त्वपशोरेवमा
गां गत्वं कथमित्यत आह छागो वेति एवः। लिंगस्य परिच्छेदकत्व निरासार्थकः। त
त्रेति मंत्रवर्णे इत्यर्थः॥ असंभावितमिति छागशब्दस्य व्यक्त्यादिवदजहल्लिं
गकत्वाभावादिति भावः॥ प्रपंचितमिति अथाऽवा पुंस्त्वादिजातिविशेषः॥ ति
स्रो जातय एवताः केषांचित्समवस्थिता॥ अविरुद्धाविरुद्धाभिर्गोमहिष्यादि। राम
१२१

जातिभिरित्यादिभिरुक्तत्वात्॥ इदमत्रानुसंधेयं स्तनकेशवती नारी लोमशः

पुरुषः स्मृतः॥ एतयोरंतरं यच्च तदभावेन पुंसकमिति स्मृत्युक्तलक्षणलक्षितलौ

किकलिंगस्य समानाधिकरणपारिभाषिकभाष्योक्तयार्थगतलिंगाश्रयणेन सतिसं

भवे पश्वादिशब्देषु शास्त्रीयकार्यनाभावादिविधानं न तु संभवस्थलेपि सर्वथा

नुभूयमानः लौकिकलिंगपरित्यागः॥ तेन न स्त्री पशोर्यागांगत्वं लौकिकलिंगासं

भवदारस्वद्व्यादिशब्देषु केवलं पारिभाषिकमेवार्थगतं लिंगं समाश्रित्य नत्वदा

वादिविधायकशास्त्रप्रवृत्तिः॥ अत एव दारादीन् शब्दानुद्दिश्यैव पारिभाषिक

भू॰ सा लिंगमाश्रितं भाष्ये पारिभाषिकलिंगस्यार्थनिष्ठत्वे प्रधानदोषस्तथोक्तं प्राक्।। अ
१२२ त एव सामान्येन पुंसकमिति तत्र तत्रोक्तं संगच्छते उत्कर्षादेरविवक्षायामिति तद्धी
122 रिति लिंगादित्रयस्य नामार्थत्वं व्यवस्थापयितुं शक्यते अन्वयव्यतिरेकाभ्यामि
ति।। टाबादिसमभिव्याहारसत्वे ङ्जादिभ्यः स्त्रीत्वबोधात्तदसत्वे च तदबोधा
देवं सत्यपि तेषां प्रत्ययस्यैव लिंगादिवाच्यमिति न प्रातिपदिकस्येति बोधादिति लिंग
त्वं व्याकरणानां बोधादित्यर्थः।। एवं व्यभिचारादन्यलभ्यत्वाच्च न तेषु प्र
त्ययवाच्यत्वमिति भावः।। लिंगां प्रोक्ता साधकांतरमप्याह लिंगेति लिंगस्य प्रत्यया राम
१२२

र्थत्वसाधकं न किमपि प्रमाणमिति भावः ॥ अत एवेति अन्यतरस्यां वाचकत्वे मुक्ति
साम्यादेवेत्यर्थः ॥ निर्बन्ध इति इदमेव मतं मुख्यमिति साग्रह इत्यर्थः ॥ तदेवाहप्र
त्ययस्यैवेति मुक्तत्वादिति ॥ अनंतानां प्रातिपदिकानुपूर्वीणां शक्ततावच्छेदकस्वी
कारापेक्षया कतिपयप्रत्ययानुपूर्वीणामेव तत्कल्पने प्रयुक्तलाघवादिति भावः
इदं त्ववधेयं टावादिकं विनापि गवादिवागादिशब्देभ्यः स्त्रीत्वस्य कलत्रमकुला
दिशब्देभ्यश्च ॥ पुंनपुंसकत्वयोर्बोधस्यानुभवसिद्धत्वाल्लिंगस्य प्रातिपदिकार्थ
त्वमेव संख्याकारकयोस्तु लुप्तविभक्तिस्थलेपि यः शिष्यते स लुप्यमानेति न्या

भू: सा
१२२
122

येनान्यत्रचप्रसमसङ्गांवादेवप्रसमार्थत्वमेवेतिप्रातिपदिकार्थसूत्रंतुद्विक
मित्यभिप्रायेणप्रवृत्तंपसङ्कयेपिहसिसंमतिमाहद्योतिकेतिसमभिव्याहृतपद
गतशक्त्यबोधकत्वमेवद्योतकत्वंवाचकत्वंशक्त्याश्रयत्वंकारकस्यविभ
क्त्यर्थत्वमेवोचितं अन्यथानामार्थव्याख्यर्थयोः॥साक्षादभेदातिरिक्तसंबंधे
नान्वयोनान्यथाज्ञानेदेवदत्तस्तंडुलः पचतीत्यस्यापिप्रामाण्यापत्तिरितिव्यु
त्पत्तेरभिधानानभिधानव्यवस्थाया॥अप्यनुपपत्तिरेवस्यात्॥यदिचतंडुलः
ती पचेत्यस्यतंडुलः प्रकारककर्मत्वसंसर्गकपाकविशेष्यक बोधोद्वितीयांततं राम
१२२

डुलपदासमभिव्याहृतत्यच्चत्तास्याद्यानुव्वीविशेषज्ञानस्य हेतुताकल्पनेनवा
र्यते तद्देतत्कल्पनादिकमेवपौरवंशास्त्रेरितिकारिकायांवहुबुस्यात्लेद्ध्यि
तिभाष्यव्याख्याकग्रंथयेष्विस्पष्टं॥ कंजपितुंकारिकायांशास्त्रेरसुक्तमितिशे
षः॥ शाब्दबोधेवद्वाविषयकत्वंकहृवादिसंमतमितितत्साधयन्नाहशब्दसा
वदितिप्रतिज्ञायांप्रमाणमाहनसोत्तींप्रत्ययः॥ शाब्दात्मकः शब्दानुगमाच्छ ति ३
ब्दविषयकत्वात्॥ शाब्देनअनुविद्धंशब्दविशिष्टार्थविषयकानुव्यवसायादि
त्यर्थः॥ अतएवघटपदश्रवणानंतरं घटंशाब्दयामीत्येवभवतिनकलशंक्के

भू: सा
१२४
124

भंवाकूटंवाइदानींशब्दस्यपदजन्यप्रतीतिविशेष्यत्वमपिदर्शयतिविस्मुमिति
सोपीतिशब्दोपास्यर्थः॥प्रातिपदिकार्थः॥शक्त्युपस्थितस्यैवप्रातिपदिकार्थस्य
विशेष्यत्वंतत्रैवप्रथमापिभवतीतिभावः॥शंकतेनचेतिलक्षणेतिवाच्यकत्व
संबंधरूपयेत्यर्थः॥निरूढेतिअनादितात्पर्यवल्लक्षणायान्त्यर्थः स्वश
क्यसंबंधरूपलक्षणायायत्रसंभवोनतादृशस्थलंदर्शयतिजवगउदशमि
ति॥अत्रसमुदायस्यशक्त्यभावादितिभावः॥अग्रहादितिमन्मतेतुतादृशसमु
दायस्यशक्यत्वान्नबोध्यानुपपत्तिरितिभावः॥ननुप्रत्येकवर्णेशक्तिः कोक्ष राम

१२४

शास्त्रे प्रतिपादितार्त्तितन्मूलत्वलक्षणाया: ॥ सुग्रहत्वमेवेत्यत आह अज्ञाते
तिकोशादौ समुदायशक्तेरप्रतिपादनात्स्वल्पेकशक्तेर्वासत्त्वविकल्पेपि तस्या ॥
अग्रहेणोऽज्ञातामाएव बोध्यजनकत्वेनोपयोगितया तदभावादुक्तानुपप
त्तिरसंदवस्थैवेति भावः ॥ ननु व्युत्पत्तेः शाब्दबोधाव्यवहितप्राक्कालेऽग्रहे
पि यदा कदाचिज्ज्ञातव्युत्पत्तिग्रहजनितसंस्कारस्योद्बोधाज्झवगडेत्यादौ
शाब्दबोधोपपत्तिः ॥ सुकरोत्यत आह गामिति भाषाशब्दानामप्यनुकरणे
साधुतासंपत्तेः ॥ सर्वमतसिद्धतयातन्मते भाषाशब्दानामशक्ततयातन्मूल

भ॰ सा कलक्षणाया अपि वक्तु मशक्यतया व्युत्पत्तिमत्त्वनिर्बन्धनप्रातिपदिकत्वाद्यनुप
१२५ पत्तिरिति भावः॥ संप्रतिपत्तेरिति निरुक्त्यादिस्यर्थः॥ स्वीकारादिति यावत् षोढा
125 पीति स्वार्थे द्रव्यलिंगसंख्याकारकुशब्दात् इत्यर्थः॥ क्वचित् अनुकरणस्य लेश
वत्प्रतीतो विशेष्यतया भासत इत्यर्थः॥ तदातस्य नामजन्यप्रतीति मुख्यविशेष्य
इत्यर्थः॥ नो चेत् न भेदविवक्षा भेदविवक्षेति॥ अर्थार्थकत्वशब्दार्थकत्वाभ्यां भे
दविवक्षेत्यर्थः॥ मूले र्थोपि भासत इत्यत्र वशब्द इवार्थकः॰ तथा च भेदपक्षे
यथानुकार्यो रूपोर्थो विशेष्यतया शाब्दबोधे भासते तथा द्द भेदपक्षेनुकार्योपि राम

१२५

न्नानुकरणे शाब्दोपीत्यर्थः॥ अभेदांशपक्षे वृत्त्यनुपस्थितस्य कथं भानमित्याकां
क्षायामाहुः श्रोत्रादि मिति इति आदिना लिप्याद्यनुसंहितस्य ग्रहः पदा॰ वृत्त्युप
स्थित एवार्थो शाब्दबोधे भासत इति न नियमः अन्यथा संसर्गभानमपि न स्यादि
ति भावः॥ पूर्वोक्तमभिप्रायं प्रकाशयन्नाह अयं भाव इति अनुपस्थितत्वादिति
एवं च शाब्दबोधे भानानुपपत्तिरिति भावः॥ तदसिद्धये वृत्त्यापदजन्यपदा
र्थोपस्थितये तस्माव शाब्दबोधोदयादिति भावः॥ अभेदं विवक्षामामिति शेषः
वृत्तेश्च संबन्धत्वेन तस्य च भेदनिबन्धनत्वेनैतादृशस्येतन्न संभवतीति भावः

भू॰सा
१२६
126

हेतुत्वादिति सैभि जन्यतान्वयीत्येति अनुकरणप्रत्यक्षस्वरूपमित्यर्थः॥ शाब्देति शाब्द
मात्रे एव पद-जन्यपदार्थोपस्थितेर्हेतुत्वादेवं रीत्या सर्वत्रैव शाब्दस्योपस्थितत्वा
द्दानसिद्धिनत्वभेदोऽनुकरणमात्रे इति भावः॥ शाब्दश्रवणानंतरं शब्दार्थोभय
विषयिण्युपस्थितिर्भवति इह शास्त्रे शास्त्रीयं कार्यमर्थस्य न संभवतीत्यर्थाद
र्थस्य निवृत्तिर्विशेष्यतया भवति लोके जलाहरणादिकं शब्दस्य विशेष्यत्वेन
संभवतीत्यर्थात् तन्निवृत्तिर्भवतीत्यादिकं स्वंस्वरूपमिति सूत्रेउक्तं भाष्ये भाष्ये
अतिप्रसंगेति॥ समवायेन शब्दसंबंधात्काशादेर्घटोत्पत्त्यादौ बोध्यवारणाये एम

१२६

त्यर्थः॥ वृत्तिजन्येतिवृत्तिजन्यापदविषयिण्युपस्थितिरित्यर्थः॥ तथाचपदंश
रथ्यिस्वादावेवतादृशोपस्थितिसम्भवात्सदविषयशाब्दबोधोनत्वाभेदेनुकर
णेसर्वत्रान्यत्रापिशाब्दभानमितिभावः॥ आश्रयतयेतिवृत्तिश्चसंबंधः संबंध
श्चद्वयोर्भवतितत्रैकत्रनिरूपकत्वेनान्यत्राश्रयत्वेनवर्ततइतिभावः॥ द्वयोरपि
शाब्दर्थयोर्वृत्तिमत्वाच्छाब्दबोधविषयतानानुपपत्तेरितिभावः॥ एतदेवस्पष्टयतिनि
रूपकतेति अनवद्यमिति उभयथाप्यभेदपक्षेऽनुकरणेवृत्त्यभावान्नप्रातिपदि
कत्वप्रसक्तिरितिभावः॥ ननुशाब्दप्रतियोगिकत्वविशिष्टसंबंध्याश्रयत्वेनशाब्दे

भू. सा

१२७

127

किंत्वर्थे एवेति कथं शाब्दस्य वृत्तिमत्त्वेन शाब्दविषयत्वमत आह संबंधस्येति भा
च्यहयोर्दिग्रामाण्याच्छब्दप्रतियोगिकत्वविशिष्टसंबंधस्यैवार्थप्रतियोगिकत्ववि
शिष्टसंबंधस्याविवृत्तित्वेन स्वीकारात्तदाश्रयत्वस्य शाब्देसत्वात्तस्य शाब्दबोधो
पपत्तिरिति भावः॥ तद्बोधकत्वेनेति श्रुतशब्दबोधजनकत्वेनेत्यर्थः॥ ज्ञानसंभ
वात् शाब्दबोधसंभवात्॥ स्वोक्ते हरिसंमतिमाह॥ उक्तं चेति ग्राह्यत्वं बोध्यत्वं ग्राह
कत्वं बोधकत्वं एते ग्राह्यत्व ग्राहकत्वे पृथगवस्थिते इत्यनेन कुत्रचिन्नमोरस
मन्ने मत्सं दर्शयति तद्ध्याविषयसन्निधानाभावे ग्राह्यत्वमेवमध्याते जसः॥ तथा

राम

१२७

प

र्थो बोधशक्तिग्रहमसत्त्वेपि तद्ग्रहोपि एकैव शक्तिरिति तस्यैव श्लोकांतरमाह वि

षयत्वमिति स्वस्य विषयत्वं संवादित्वे च शब्देरर्थो बोध्यते इत्यर्थः॥ शब्दार्थयोस्ता

दात्म्यं स्वीकर्तॄणां मते त्वर्थविषयकत्वे शब्दविषयकत्वमपि सूपपादं तादात्म्यं

च तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वं तादात्म्यमेवानयोर्मुख्यः संबंधः॥

तत्राह कानि संकेतादीनितीदं सोपपत्तिकमाकरे भे मंजूषायां स्पष्टं एवं च शब्द

स्य शाब्दबोधविषयत्वमस्मिन्मते स्पष्टतरमिति भावः॥ परे तु संसर्गस्य च पदस्या

पिपादादनुपस्थितस्य सर्वत्रैव शाब्दे भानं भवति अत एवालंकारिकैः पर्मा

भू-सा
१२८
128

यप्रक्रमभंगस्यदोषत्वोत्कीर्त्तनंकृतं उदेति सविता ताम्रस्ताम्र एवास्तमेति चेत्या
दौ भिन्नप्रकारकप्रतीतिजननं दूषकतावीजं पर्यायांतरोपादाने भवतीति तहृ
दयं अत एव चाप्रसिद्धनलरामामादिपदे भ्रमे नलत्वादिधर्मोनुपस्थितौ विशि
ष्यशक्तिग्रहासंभवेन सामान्यरूपेणोपस्थितव्यक्तौ नलादिपदं क्वचिच्छक्तं सा
साधुपदत्वादित्यनुमानेन जलादिपदवाच्यत्वप्रकारकश्चिदर्थोस्ति। त्साका
रकशक्तिग्रहात् पदात्प्रकारको नलादिपदवाच्यः कश्चिदर्थ इत्याकारको बो
धो भवतीत्यादौ तु जातिपदप्रकारको बोध इत्याहुः॥२६॥ अभेदपक्षे तु करणाद राम १२८

नुकार्योपस्थितिस्तत्सादृश्यपाख्याऽव्रत्त्या निर्वहति शक्तिलक्षणासादृश्याऽसंबं
धेनपदजन्यपदार्थोपस्थितेः॥शाब्दबोधेकारणत्वाभ्युपगमात् अर्थवत्सू
त्रेणतुशक्तिलक्षणान्यतरसंबंधेनार्थः॥बोधकानामेवशब्दानांप्रातिपदिक
संज्ञाविधानान्नविभक्त्युत्पत्तिः॥नचातन्निबंधनेपदत्वं अतएवगवित्ययमा
हेत्यादौनवलोपः॥अन्वयेतिभेदाऽपक्षस्यैवोपगमेइत्यर्थः॥प्रत्ययःपरश्चेतिप्र
त्ययपरैवप्रकृतिः॥प्रयोक्तव्यसत्तायांयोग्यतायामेतदर्थकप्रत्ययः॥परश्चेत्येतत्सू
लकस्यापदंनप्रयुंजीतेतिविधेहध्रंघनात्स्रस्यप्रयोग्यस्यप्रत्ययंविनाप्रयोगेह

साधुत्वास्यादि सर्थः ॥ अभेदपक्षेनुयोग्यत्वाभावान्निषेध्यविषयत्वमाएवाभावा
त्तदतिक्रमणीप्रसक्तौर्न विधेराकोपः ॥ साधुत्वादेव वाचादिविधायकशास्त्रोद्दे
श्यता अन्यथाभावाचत्तदनुद्देश्यत्वमेव स्यादिति भावः ॥ इति भूषणसार विव
तौ नामार्थनिरूपणं ॥ ॥ नामार्थविचारप्रसंगात् नामसमुदायात्मक समासा
र्थं विचारयन् ॥ तद्विभागप्रदर्शनमित्यनुशाय चानाह समासानिति समासत्वं
च पाणिनीयसंकेतसंबन्धेन समासपदवत्त्वं समर्थ ॥ पदविधिरित्येकवाक्य
तापन्नसह सुपेत्यादिभिः ॥ समाससंज्ञाविधानात् सामर्थ्यं चाकांक्षादिवशा

समस्यमानत्वमबोधकत्वात्मकव्यपेक्षारूपं न किन्त्वेकार्थीभावः॥ अत्रमानं
च किं पुनः समर्थं नाम पृथगर्थानामेकार्थीभावः॥ क्व पुनः पृथगर्थानि क्वैका
र्थानि वाक्ये पृथगर्थानि समासे पुनरेकार्थानीति समर्थसूत्रस्थस्थं भाष्यं च
क्ष्यमाणमुक्तान्यश्चेति सर्व एकोपस्थितिविषयार्थकत्वं विशेष्यविशेषण॥
भावावगाह्येकोपस्थितिजनकत्वं वा संसृष्टार्थं समर्थमिति भाष्योक्तेः॥ अत
एव राजपुरुषैकदेशे राज्ञि न ऋद्धस्यत्यस्यान्वयः देवदत्तस्य गुरुकुलमि-
त्यादौ तु गमकत्वाद्वसेव वृत्तिः॥ एवं राजपुरुषादौ विशेषणपदे राजादौ

संख्यानवगमोप्येकार्थीभावबहुकृतः॥ संख्याविशेषप्रकारेणतत्तदर्थभानेपयग
पस्थितेस्तत्रलात्तबहुत्वेनत्रित्वचतुष्टयादीनांभावेनेत्सतितात्पर्यएकानेक
व्यक्तिभानंराजत्वादिनेवनलेकलत्वादीनात्वएवंतावकीनोमोक्षाकीणर्
त्वादौसंबोध्यत्वेनैवैकानेकव्यक्तिभानंनलेकलबहुत्वादिनागमकत्वादेव
शिवस्यभगवतोभक्तद्रूपार्थ॥ शिवभागवतरसमः॥ श्लोकेमितिसूत्रेभाष्यप्र
योगः॥ परंतत्रव्युत्पत्तिरेवनतुशिवस्यभागवतदृत्तिवाक्यंसाध्युभगवद्वाद
एशिवपदेनभगवच्छब्दस्यसमासोयुगपदेवेतिबोध्यं॥ एवंचलृप्तशक्तिता

गे मानाभावात्प्रत्येकशक्तिसहकृतमासमुदायशक्त्यात्तथोपस्थितिः॥ अथमे
वच्चैकार्थीभावः॥ जहत्स्वार्थी वृत्तिः पदानामानर्थक्यमिति तु नमुक्तं महावा
हुः सुपंथ्यादस्यादावात्वाद्यनापत्तेः भूतपूर्वगत्याश्रयणं तु सत्त्वांगतावमुक्तं त
दुक्तं जहत्स्वार्थातु तत्रैव यचरूढिर्विरोधिनीति अथमवार्थे विरुद्धोमत्रसमु
दायार्थस्तत्रैवसेतितदर्थः॥ यथा गौधरवरकृ[illegible]हृमसर्पोदाविति तदर्थः अयं
चार्थः॥ शक्तिः पंकजशब्दवदिति वदतो मूलकृतोपि संमतः॥ पंकजशब्दे परै
र्योगरूढाभ्युपगमेन तदृष्टांतोपन्यासस्यतथात्वेवसार्थक्यादधिकमग्रेभि

भू॰सा॰ ध्यास्यते॥ अनु व्यचलदिति अनोर्व्यचलदित्यनेन व्येष्वावलदित्यनेन युगप
१३१ देवसमासः अन्यथेति पदद्वयेपि तत्स्वीकारे इत्यर्थः॥ अन्यथा कुत्सितेति सूत्रो
131 क्त भाष्यरीत्या टाबुत्पत्त्यनंतरमेव सुबुत्पत्त्या च महतीति ङीप्न स्यादिति भा
वः॥ भाष्ये इति तत्र हि सह इत्येतद्योगविभागेन सामासविध्यानार्थः॥ सुपा इत्ये
तदप्यधिकारार्थो विशेष्यविध्यभावे समासार्थश्चेत्याद्युक्तं प्राचीनेति पूर्वप
दार्थप्राधान्यादिकं भाष्येपि क्वचिदुक्तं तथापि तत्र नादरो नापि लक्षणं त
दिति तत्रैव स्फुटं लक्षणस्येति॥ व्या व्ब जित्व्यवहारो बाल लक्षणस्य प्रयोजनं व्या एम

वत्ति रितर भेदानुमितिः॥ केवलान्वयिलक्षणं नव्यावर्तकं तु व्यवहारमात्रो
पयोगि अन्वयव्यतिरेकिणोरुपयोगीति वो ध्वंसलक्षणस्येति विभागस्य विशेषणं
प्रायोवाद इति सोऽयं समासश्चतुर्द्धेति प्रायोवाद इत्यन्वयः॥ अव्याप्त्यादिदोष
दुष्टत्वादिति भावः॥ तथा तेन प्रकारेण सोपरः॥ पूर्वपदार्थादिप्राधान्यविषमोयः
सोपीति असंग्रहादिति अव्ययीभावाद्यधिकारबहिर्भूत सहसुपेति सूत्रेणवा
र्त्तिकेन वेषु समासविधानादिति भावः॥ पूर्वपदार्थेति उत्तरपदार्थे निरूपित
विशेष्यतावदर्थकमित्यर्थः॥ उत्तरेति पूर्वपदार्थप्रकारतानिरूपितविशेष्य

स॰टी

भू॰सा १३२ 132

तावदुत्तरपदार्थकत्वमित्यर्थः॥ उभयेति समासघटकीभूतपदार्थनिष्ठविशे
ष्यतानिरूपकत्वाभाववदर्थकत्वं समासघटकीभूतपदशक्यार्थनिष्ठप्र
कारतानिरूपिततदशक्यनिष्ठविशेष्यतावदर्थकत्वमित्यर्थः॥ प्रायिक
मितिलक्षणेन तावच्छेदकसमनियतासाधारणधर्मस्यैव लक्षणत्वाने
मानि लक्षणानीति भावः॥ एकदोषेणैव लक्षणं दुष्टं भवति किमुत दोषद्व
येनेत्युपहसनीयान्येतानि लक्षणानीति भावः॥ परस्परव्यभिचारमेव दर्श
यति तथाहि साक्षिना उन्मत्तगंगेद्यव्ययीभावत्वसाधने पूर्वपदार्थप्रधा

राम १३२

न त्वस्वरूपहेतोरसत्त्वेन स्वरूपासिद्धिः॥ उपकुंभादौ साध्यने तु व्यभिचारः॥ इति
वोध्यं किं तर्ह्यव्ययीभावादेर्लक्षणमित्यत आह सिद्धांते त्विति वास्तविकतद्ध
त्ति धर्मस्यैव लक्षणत्वमित्यभिप्रायेणाह। संभवश्चेति रेखागवमेति रजतत्वे
न मुक्त्यादेर्बोध्यनेऽपि न शुक्तेरजतत्वं लक्षणमिति भावः॥ लांगूलेति अलक्ष
णेति लोमवद्धांगूलमवत्वं हि पशोर्लक्षणं यथा गवमादाववियमानेरेव
खा गवमनिवरेखा क्षतिपुच्छं न गवमलक्षणं वोध्यनं तु साहश्यमूलकाध्या
वसायाद्गवमादो भेवतित था समासेह विद्यमानमपि विग्रहवाक्यनिवपूर्व

पदार्थादिप्राधान्यं स्यादृश्यात्समासस्याधिगमयतीति भावः॥ अजहत्स्वार्थावृ
त्तिपक्षे पूर्वपदार्थादिप्राधान्यं तद्दुर्घटमित्यभिसंधायमूलमवतारयति न
न्विति अनेकधाक्तेष्विति अथ तेषां ब्रुवतां किं जहत्स्वार्था॰वृत्तिराहो
स्विदजहत्स्वार्थेत्यादिनेति भावः॥ मूलेतेपुनरिति ते जहत्स्वार्था॥ जहत्स्वा
र्थप्रत्येकं त्रिविधेइत्यर्थः॥ त्रैविध्यमेव दर्शयति भेदेति भेदो वाच्य एकः प
क्षः संसर्गो वाच्य इत्यपरः॥ उभयं च वाच्यमिति तृतीयः॥ पक्षः इत्यर्थः॥ तां वि
वृणोति जहतीति स्वत्यजति अमं भाव इत्यादिना व्याद्यादीतिशक्तताव‌च्छेद

कानुपूर्व्यवच्छिन्नघटकस्यतु न शक्ततावच्छेदकाश्रयत्वं घटकत्वं च स्वा
विषयकप्रतीत्यविषयसमुदायकत्वं इदं च दृष्टान्तकथनं दार्ष्टान्तिकं च रा
जपुरुषत्वादिनन्वेवन्मते समुदायस्यैवार्थवत्त्वात्प्रातिपदिकत्वात्तद्भावा
देवराजादिपदानां नलोपाद्यनापत्तिः॥ किंच सुपंथामहाबाहुरित्यादा[illegible]ट
त्वाभावापत्तिरिति चेन्न भोतपूर्व्याश्रयेण सुसाध्यत्वात्॥ अन्यथेति वक्तौ
एकार्थीभावानंगीकारे आपत्तेरिति अस्मन्मतेनुशासनः पदार्थैकदेशत्वान्न
द्वयाभेदेनान्वयः॥ व्यपेक्षांसामर्थ्यमेके इति भाष्योक्तएकीमसमतमवलंब्या

म॰सा ह्रयमभिप्रायइतिनातिरिक्तेति मू सावयवशक्त्यैव निर्वाहादिति भावः ॥ कल्पका
१३५ भावादिति अनुपपत्त्यभावादित्यर्थः ॥ ननु विशिष्टार्थधी उपपत्तिरेव तत्कल्पि
134 काभविष्यतीत्यत आह मू सेति तत्कल्पनस्य विशिष्टशक्तिकल्पनस्येत्यर्थः ॥ न
न्वेकार्थीभाववादिमते ह्यवयवशक्तिनिरपेक्षसमुदायशक्तिरेवैकास्वीक्रिय
ते तत्सहायेनैवार्थबोधः ॥ तव मते तु शक्तिद्वयेन बोधो निर्वाह्यः ॥ च क्लृप्तेत नम
ते गौरवमत आह मू तशक्तीति व्युत्पत्तिप्राक्काले मू सामाः ॥ प्रत्येकशक्तेः त्या
गइत्यर्थः ॥ आत्मनलोपादिव्यवस्थार्थं तेनापि प्रत्येकशक्तिस्वीकारस्यावश्य राम
१३५

कत्वादिति भावः॥ प्रत्येकशक्त्या कथं विशिष्टार्थबोध इत आह तथा चेति राज
विशिष्टपुरुषबोधे राजपदाव्यवहिते पुरुषपदस्समाकांक्षेवशादित्यर्थः॥ अ
यमेवेति॥ अयमभिप्राय इत्यादिनानुपदोक्त इत्यर्थः॥ भाष्यकारैरिति परस्पर
व्यपेक्षां सामर्थ्यमेके इत्यादिनेत्यर्थः॥ पणितिरिति इदं च पूर्वपदे लक्षणानंगी
कर्तृमते बोध्यं वार्त्तिकादिति आपत्त्यभावादिति शेषः॥ प्रसंगादिति उक्तप्रसं
गसंगतेरित्यर्थः॥ भेद इत्यादीति भेदसंसर्गौ वा सामर्थ्यमिति भाष्यादिति भा
वः॥ वस्तुतो नेदं भाष्यं भेदस्य वाच्यत्वप्रतिपादकं भेदबोधानुभवात्

भ: सा द्वंद्वेन तदसंभवाच्च किंतु राजपुरुषपदाद्धि विशिष्टशक्त्या विशिष्टार्थबोधप्रतिपा
१३५ दकं अत एव राजपुरुषो देवदत्तस्येति वाक्यादिकं त्वहमभितिरीत्या न बोध्यः
135 विशेषणमात्रे इव विशेष्यमात्रेऽपि पदार्थांतरानन्वयात् ॥ विशिष्टवैशिष्ट्या
वै ५ वगाहिबोधस्यैकार्थीभावेन जननाच्च अराजकीयेति राजकीयभिन्न
दे भेवाभिसर्थः ॥ तद्विरोधादि त्तिराजभिन्नीयत्वनन्द्दिन्नत्वयोर्वि
रोधादिति भावः ॥ उत्तरकालमिति भेदमूलत्वात्संबंधस्येति भावः ॥ अस्वा
मीति भेदमात्रस्य वाच्यत्वे अराजकीयभेदसत्वात्तस्याप्यस्वेतादृशप्रयो राम
१३५

गापत्तेरित्यर्थः॥ अपेक्षावादस्येति अव्यवहितोक्तविध्यभाववर्त्तितस्येत्यर्थः
एवंयुक्तिभाष्येति उक्तवक्ष्यमाणयुक्तिसमर्थसूत्रभाष्ये इत्यर्थः॥ परंपरयेति सा
दृश्यमूलकयेत्यर्थः॥ उपलक्षणमिति वृत्तिपंचकमपि प्रत्येकशक्तिसहकृ
तसमुदायशक्त्याबोधकमित्यर्थः॥ भाष्यादित्यस्य समर्थानांपदवचनमि
त्यादिभाष्यादित्यर्थः॥ साधकमिति॥ विशिष्टशक्तिसाधकमित्यर्थः॥ पंक
जशब्दवदितीति सप्तम्यंताद्वतिः॥ उपमेयेसत्समीदर्शनात्पंकजशब्देमथा
वयवशक्त्यतिरिक्तसमुदायशक्तिः स्वीक्रियतेतथावृत्तिमात्रेसमुदायश

क्तिस्वीकार उचितइतिभावः॥ ननुपंकजपदेपिरूढिस्वीकारेमानाभावः॥अ
वयवशक्त्यैवपद्मत्वावच्छिन्नस्यबोधनिर्वाहादितिचेन्नअवयवशक्ता
त्यनुसंधानाभावदशायामपिपंकजमानयेत्यादिवाक्यात्पद्मत्वाव
च्छिन्नस्यबोधात्तत्रैवनिः॥कंमप्रवृत्तेश्चशैवालकुमुदादेरबोधात्तदान
यनेप्रवृत्तेश्चमानत्वात्रूढ्या उपस्थितेर्थे यौगिकार्थः संबंधोपिवा
स्तविकश्चेन्नबोध्यपरिसत्तो भवतिकेवलयोगशक्त्याबोध्येतुरूढेः मणि
मंत्रादिन्यायेनप्रतिबंधकत्वकल्पनात्॥यत्रयोगार्थबोध्य एवतात्पर्यंत

त्रतात्पर्यात्स्यानुपपत्त्यालक्षणामस्तुबोध्यः॥ ननुकुमुदादौशक्तिरितिध्ये
यंयोगादेवेतिपंकजनिकर्तृत्वेनरूपेणावयवशक्त्यैवपद्मस्यापिबोध्या
दित्यर्थः॥ एवंचराजपुरुषादिवत्पंकजादावप्यवयवशक्त्यैवपरस्परा
कांक्षावशाद्बोधनिर्वाहेरूढेस्तवमतेउच्छेदएवस्यादितिभावः॥ तत्रा
पिपंकजादिपदेपितत्रविशिष्टशक्तिस्वीकारेनिर्वध्यमजेसर्वत्रैवजनो व३
विशिष्टशक्तिः॥ स्वीक्रियतामितिभावः॥ तत्कल्पनेतिसमुदायशक्तिक
ल्पनेत्यर्थः॥ सालक्षणारयकाराधिकरणविरोध्योपितवमतइत्याहए

वमितिलक्षणामितिशक्तिसमभूतनिरूढलक्षणामित्यर्थः॥योगेनेति अवयव
शक्त्युपस्थाप्यस्यकर्तृत्वेनेत्यर्थः॥उपपन्नाविति स्त्रीशूद्रौ नाधीयातामित्या
दिसामान्यशास्त्रसंकोचं विनाप्येतद्वचनोक्तकर्मानुष्ठानसिद्धावित्यर्थः॥
कल्पनामिति रूढिं कल्पयित्वेत्यर्थः॥जातिविशेषस्येति रथकारस्तु माहिष्या
त्करण्यां यस्य संभव इति स्मृत्युक्तसंकरजातिविशिष्टस्येत्यर्थः॥अपूर्वे
तिविधिसामर्थ्यादिविति भावः॥अमुक्तमिति॥शास्त्रसंकोचमंतरापि विध्ये
श्चारितार्थ्यादिति भावः॥ननु पंकजशब्दवदिति प्रतिबंदिकथनं न समा

सशक्तिसाध्यनंप्रति वंदेस्साधकत्वात्॥ किंच पंकजादिपदाज्ज्ञातस्य च्छि
न्नस्य बोध्यो न भवसिद्धः न च न्लक्षणया निर्वाहः॥ पंकजपदस्यङ्कपिश
त्व्यभावाल्लक्षणयावक्तुमशक्यत्वात्॥ प्रत्येकपदलक्षणयापि वक्तुमशक्य
क्यापंकजनिकर्तृत्वेन रूपेण बोधने नैव प्रत्येकपदस्याव्यक्तत्वात्॥ अत
एव राजपुरुषादिसमाससामान्यं विहाय पंकजादिपदान्येव कोशकारेण सं
गृहीतानि पूर्वोक्तरथकाराधिकरणविरोधोपि न चरूभूतांत्वादेवानामिति
मंत्रवर्णाद्दृभुपर्यायप्रतिलोमजातिरथकारस्यैव तदधिकारावगसालाघ

स. टी

म॰ सा ॥ १३८ ॥ 138

वानादरेणोक्तस्तु कारकत्वं तर्थे विशिष्टबाध्यानकल्पनादिस्वरूपचे र्मूलमवतारम
तिसाध्यकांतरमिति लिंगेति कुक्कुटांड मृगशावादौ पूर्वपदार्थस्त्रीत्वस्याप्र
तीतेरिति भावः॥ राज्ञोः राज्ञां वा पुरुष इत्यादौ वाक्ये राजादिपदं संख्याविशेष
युतं स्वार्थमभिदधाति समासे तु नैकत्वादिना बोध्यमतिबचनैरेवेति सवि
शेषणानां वृत्तिर्नेत्यादिभिरित्यर्थः॥ तदेव प्रतिपादयति अयं भाव इति न्या
यसिद्धमिति व्यपक्षाभां वाक्यं भवति समासे एकार्थीभावे समासो भवतीति
विभिन्नविषयत्वाद्बाध्यबाधकभावाभावान्यायसिद्धमेभवेदंविभाषाव राम १३८

चनेनापूर्वमित्यर्थः ॥ अत एवोक्तं भाष्ये न संज्ञायाभावाभावाविष्येते इति
एकार्थीभावस्यैव वैवक्षिको विकल्पो न समासस्येति तद्भावः ॥ अन्वया
संभवादिति कृतौ उपसर्ज्जनीभूतराजादेः ॥ ऋद्धाद्यन्वये पदार्थः ॥ पदा
र्थेनान्वेति न तु पदार्थैकदेशेनेति व्युत्पत्तिविरोधान्नाभेदेन समासाघ
टकपदार्थान्वयः ॥ अत एवोपसर्जनस्य प्राधान्याप्राधान्यविरोधोऽपि सु
परिहर इति भावः ॥ अत एवेति व्यपेक्षापक्षस्यानेकदोषग्रस्तत्वादेवेत्य
र्थः ॥ उक्तमिति नानाकारकान्निघातयुष्मदादेशप्रतिषेध इत्यादिनेति

भावः दूषणांतरमाहतथेति दूषणांतरमिति इत्याकारकं पूर्वोक्तदूष
णापेक्षयान्यदूषणमाहेत्यर्थः ॥ पूर्वोक्तानामिति निष्ठ्योशाविरित्यादौ
क्ताँदाऽनां लोपो वक्तव्य इत्यादीनामित्यर्थः ॥ एतद्दूषणोद्धारस्याग्रेऽभिधास्यमानेरसा
आह। ॥ दूषणांतरेति ॥ व्युत्पत्तिभंगमाविष्करोति अयमाशय इत्यादिनालेक्षणेति ॥ चि
त्रगुरित्यादौ स्वबोध्यसंबंधरूपलक्षणा यावाक्याञ्चित्रगोस्वामिनो बोध्यसंभवा
दाह प्राप्तोदकादाविति बोध्योत्तरमित्युत्तरमनुपपत्तिप्रतिसंध्याने सतीतिशेषः ॥ तत्सं
बंधीति ॥ विशिष्टोदकसंबंधिग्रामलक्षणायामपीत्यर्थः ॥ अपिनात्तत्र बोध्योपयोगि

लक्षणायाअसंभवंसूचयति॥ लाभादिति॥ विशिष्योद्देकसंबंधिनोलाभेप्यनुभूयमा
नोक्तार्थीलाभादिस्वार्थः॥ कर्मणिलक्षणेतिचेदिति उद्देककर्तृकप्राप्तिकर्मणिभिन्नोग्रा
मइति विवक्षितबोध्यसंभवादिति भावः॥ समानाधिकरणेतिस्यादिति॥ इदमुपलक्षणं
एवंसतितत्रिपदार्थप्राधान्येनबहुव्रीहेरेवासंभवः॥ अन्यपदार्थप्राधान्य॥ एवंबहुव्री
हेर्विधानात्॥ अन्यथेति कर्मलाक्षणिकप्राप्तोदकयोरभेदान्वयानंगीकारेइत्यर्थः॥
पत्तेरिति च्युत्पत्तेरत्रैवव्यभिचारादिति भावः॥ ननुसामानाधिकरण्येनसमानविभक्ति
कत्वेनानुसंधीयमानत्वंतथासतिघटः॥ पठइत्यत्राप्यभेदान्वयबोधप्रसंगात्॥ किंत्वे
कार्थाभिधायित्वंतस्यचात्रासंभवान्नायंदोषोतआह॥ प्राप्तेरिति॥ भेदेनेति॥ निपाता

स॰ ४१.

स्या

मू॰सा तिरिक्तनामार्थधात्वर्थभावयोर्भेदेनान्वयं व्युत्पन्नत्वादिति भावः उक्तव्युत्पत्त्यनं
१४० गीकारे दूषणमाहान्यथेति॥ आख्यातवदत्रापि प्रकृत्यर्थे॥ स्वप्राधान्यं विवक्षित्वाशंक
140 ते॥ अथेति वोध्योत्तरमिति॥ मीमांसकमते वाक्यान्तेतिशेषः॥ व्युत्पत्तेरिति॥ अकारणेन
व्युत्पत्तेस्त्यागे व्युत्पत्तेर्बोधेदप्रसंग इति भावः अयं न्यायो लिंगसंख्यादावपि व्यभिच
रितः क्वाचित्क एवेत्यत आह॥ प्रौक्तेरितियत्नेश्चेति॥ समानविभक्तिकनामजन्य
प्रतीतिमुनव्याश्रविशेष्यत्वात्॥ प्राप्तेरिति भावः॥ द्रष्टव्यमिति॥ न हनकर्मा भिन्नोरथ
इति वोध्योत्तरं॥ तत्संवंधिनिलक्षणायामपि प्रदर्शनीमेक्षितार्थस्यालाभ एवत्तप्रत्य
यस्य कर्त्तरि लक्षणायामपि व्युत्पत्तिविरोधादिकं पूर्वोक्तं द्रष्टव्यमित्यर्थः॥ समुदा राम
१४०

यशक्त्याभ्युपगमे तु न कस्यापि विरोध इत्याह यानीति रिक्तेति ॥ मूले बहुव्रीहौ ॥ अषष्ठ्यर्थे
ति विशेषणस्य स्वार्थस्य वदन्नाह यं भाव इति शक्तिसमुदायशक्तितत्रेति ॥ बहुव्रीहिघ
टकपूर्वोत्तरपदयोः ॥ न समासस्य तत्स्याशक्तत्वात् ॥ नैयायिकोत्र शंकितेति भावः ॥ बो
ध्यार्थंनेरिति ॥ नामार्थयोरभेदेनैवान्वयादिति भावः ॥ ननु गोपदस्य गोस्वामिनि लक्ष
णाः चित्रस्य गव्यभेदान्वयाच्चित्राभिन्नगोस्वामीति बोधो नानुपपन्नोत ॥ आह चित्रा
दिमात्रस्येति ॥ आदिना गवादिपरिग्रहः ॥ उक्तस्त्रादिपदे न चित्रस्य परिग्रहः ॥ लक्ष्यैक
देशत्वेनेति ॥ पदार्थः पदार्थेनान्वेतीति व्युत्पत्तिविरोधादिति भावः ॥ न च गोपदे इति
गोपदस्य लक्षकत्वेन शक्यैन सह साक्षादेव संबंधः ॥ स्वामित्वं चित्रपदस्य लक्ष

कत्वेतु स्वशाकटश्चित्रत्वाश्रामस्वामित्वंसंबंध इत्यणुरपि विशेषेध्यवसायकर इति
न्यायाद्विनिगमकमस्त्येवेति भावः ॥ तथा च षष्ठ्यर्थे बहुव्रीहौ दोषाभावादषष्ठ्यर्थ
बहुव्रीहौ दोषमाह ॥ एवमपीति ॥ यौगिकानामिति ॥ कृतप्रत्ययइत्यादीनामपि धर्मिवाचक
त्वादिति भावः ॥ अस्तु तर्हि विनिगमकाभावात्सदद्वयेपि सेत्याह नचेति बोध्येति ॥ स्वा
मिनो द्विध्याभानं स्यादिति भावः ॥ असंभवादिति ॥ कस्यतात्पर्यग्राहकत्वेकस्य लक्षणे
त्यत्र विनिगमकाभावान्न प्रत्येकलक्षणेति भावः ॥ विनिगमकांतरमाह नच चरमे
ति ॥ प्रत्ययार्थान्वये हेतुमाह ॥ प्रत्ययानामिति ॥ एवं हीति उत्तरपदस्यैवान्यपदार्थेक
त्वे इत्यर्थः ॥ असंभवे हेतुमाह ॥ अनेकमिति ॥ अनेकमन्यमन्यपदार्थे इत्यादीनां अने

कस्तुवंतमन्यपदार्थेवर्त्तमानं प्रतिपादकंबहुव्रीहिसंज्ञं भवतीतिसूत्रार्थादितिभा
वः॥ किंचप्रत्ययानांसंनिहितेतिव्युत्पत्तिरपि अर्द्धपिपल्यादौव्यभिचरितेतिभा
वः॥ नन्वेकंपदमन्यपदार्थबोधकंतस्यबोधकत्वेपदांतरं॥ तात्पर्यग्राहकमि
तिसुवंतसमुदायस्यान्यपदार्थबोधकत्वमागतमेवेत्यत आहकिंचैवमिति॥ एवं
सतिचरमपदास्यैवलक्षकत्वेसतीत्यर्थः॥ अन्यत्रेतिभूषणेइत्यर्थः॥ विलक्षणइति
उत्तरपदार्थमात्रस्यलक्षकत्वेतन्मात्रस्यप्रकृतित्वात्तदर्थेप्रत्ययार्थानन्वयापत्ति॥
रित्यादिकंतत्रोक्तमित्यर्थः॥ लक्षणेति॥ अवयवशक्त्येत्यर्थः॥ व्युत्पत्तिस्यागः प्रवृत्ति
हानिः॥ व्यपेक्षायादिनइतिसमर्थ॥ सूत्रोपात्तसामर्थ्यंचपरस्परान्वययोग्यत्वं

भू॰सा साक्षात्स्वरंपरमाबातस्प्रयोज्यविषयतानिरूपितविषयताप्रयोजकत्वपर्यवसन्नं
१४२ वदंतद्रूत्पर्थः॥शक्तिरितिविशिष्टशक्तिरित्यर्थः॥संसृष्टार्थसमर्थमितिभाष्यो
142 क्तेः॥संसर्गस्यपदार्थोपस्थितिवंध्यनत्वात् इस्तुनोसोः सामर्थ्यस्तुवामंत्रिते
इत्यादौव्यपेक्षारूपसामर्थ्यस्यैवसर्वैः स्वीकाराच्चेतितद्दृढयंविशिष्टशक्त्य
कल्पनेदत्तानिदूषणानिपरिहरतिराजपुरुषेतिनचराजपदार्थस्यपुरुषपदा
र्थेनसहस्वस्वामिभावसंबंधेनान्वयाद्राजकीयपुरुषइतिवोध्यनिर्वाहे॥पूर्वप
दलक्षणानिरर्थिकाकिंचसंबंधे॥एवंलक्षणास्तुनथासतिव्यक्तिवाक्ययोः स
मानप्रकारकत्वमपिभवतीतिवाच्यंराजापुरुषइतिवाक्याद्राजकीयः॥पुरुषइ राम

१४२

तिचोद्यवारणायानश्पकीकरणीयनामार्थयोरभेदेनैवान्वय इति व्युत्पत्तेर्भंगप्र
सङ्गात् ॥ न च चन्द्र इव मुखं घटो न पट इत्यादौ व्यभिचारवारणाय निपातातिरिक्त
त्ववत्समासातिरिक्तत्वे विशेषणात् ॥ क्व व्यभिचार इति वाच्यं ॥ अगत्या निपातातिरि
रिक्तत्वस्य विशेषणीयत्वेपि समासस्थले पूर्वपदस्य सर्वं ध्येनिर्लक्षणैरूपग
तिसत्त्वात् फलाभावाद्गौरवाच्च विशेषणादानात् न च लुप्तविभक्त्यानुसंधाना
द्वा जसं बोध्यवान्पुरुष इति बोध्यो वाक्यवन्निर्वहत्येवेति वाच्यं सर्वदा सर्वेषां लु
प्तविभक्त्यनुसंधानेन नियमेन भवतीत्यत्र प्रमाणाभावात् ॥ नन्वेवं । दधिपश्यती
त्यादावपि लुप्तविभक्त्यनुसंधानं न स्यादिति वाच्यं अनभोः समवक्तसत्वाभावा

त्॥ राजसंबंधिप्रकारकाभेदसंसर्गकपुरुषविशेष्यकबोधे मध्येद्वितीयादिविभक्ति
व्यवहितत्वभ्रमदशायां तथाबोधादर्शनाद्राजपदाव्यवहितोत्तरपुरुषपदात्त्व
ज्ञानस्य हेतुतायां आवश्यकत्वेन दधिपश्यतीत्यादौ तथात्वे च दधिकर्मकदर्शन
विषयकबोधस्य पश्यतिदधिदधिदेवदत्तः॥ पश्यतीत्येतस्मादप्युदयात्॥ नत्तीमां
तत्त्वादिभ्रमदशायांतथाबोधानुदयाच्च दधिकर्मकदर्शनादिबोधे प्रति अनुसं
धीयमानद्वितीयांतदध्यादिसमभिव्याहृतपश्येत्यादिपदज्ञानत्वेन भिन्नैवाच्य
वध्यानाघटितकार्यकारणभावस्य वक्तव्यत्वात्॥ न च पूर्वपदस्य संबंधिनि लक्ष
णायां समानाधिकरणत्वेन समानाधिकरणाधिकारवहिर्भूतषष्ठीसूत्रेणासमा

सविधानं निरर्थकमिति वाच्यं समासानंतरं लक्षणया समानाधिकरणत्वसत्त्वेपि
ततः॥ पूर्वं समानाधिकरणत्वासंभवात् एतदभिप्रायेणैव तत्र भवता पाणिनिना
षष्ठीति सूत्रेण समासविधानं कृतमिति दिक्॥ अत एवेति॥ संबंधिनि लक्षणास्वी
कारादेवेत्यर्थः॥ न्वयेति पदार्थः॥ पदार्थेनान्वेतीति व्युत्पत्तेरिति भावः॥ श्यमुपि
व्युत्पत्तिः॥ अभेदान्वयस्थलविषयिणी भेदानन्वेकदेशेऽन्वयो भवत्येव चैत्रस्य
गुरुकुलं शरीरः॥ शातितपत्रद्रुस्तादाविति बोध्यं॥ उक्तार्थेनयेति कोशांबीपदेनैव को
शांब्यवधिकनिष्क्रमणकर्तृलक्षणयाभिधानात्कानादिशब्दानामपादान
त्वसामसिद्धत्वादित्यर्थः॥ संभवादिति॥ तथा च षष्ठ्यर्थे विभाषेति सूत्रे समापीति

भावः ॥ अवयवशा॰क॰। क्तीति ॥ अनेन दृष्टांतदार्ष्टांतिकयोर्वैषम्यं सूच्यते शक्त्यग्रहे
अवयशक्तिग्रहाभावेतेभ्यः ॥ पंकजादिपदघटका[illegible]वयवेभ्यः ॥ नचैतस्य संभव
तीत्यत्रान्वयः ॥ विशिष्टार्थबोधप्रवृत्तिपद्यत्वादिरूपेण लक्षणायाः ॥ शक्ति[illegible]घटि
तत्वात् ॥ किंतु समुदायशक्त्युपस्थितेतस्मिन्नन्वयमवशक्त्युपस्थापितपंकजनिक
तुरभेदान्वयोपगमएवेतिभावः ॥ अतएवेतितत्पदलक्षणाग्रहे तत्पदशक्तिग्र
हस्य हेतुत्वादेवेत्यर्थः ॥ उत्तरपदलक्षणायां विनिगमकमाह यौगिकत्वेनेति ए
वंच ॥ उत्तरपदलक्षणायां शीघ्रोपस्थितिकत्वं विनिगमकमिति भावः ॥ ननूदका
दीनामपि व्युत्पत्तिपक्षे विलंबोपस्थितिजनकत्वमेवेत्यत आह ॥ प्रलग्ना। नामि

नि॥ दत्तं दूषणांतरमुद्धरति घटादिपदं चेति कल्प्यमानेति ननु कृत्स्नेत्यर्थः॥ विशिष्टस्ये
वेति॥ आनुपूर्वीविशिष्टस्यैवेत्यर्थः॥ व्यवहारादिसिद्धवर्णसमुदायस्यैव शक्त्याश्रयत्व ना२
मित्यादिति भावः॥ उत्तरपद इति॥ उदकादावित्यर्थः सालक्षण्यविशेष इति वै
षम्यमित्यर्थः॥ पूर्वपदार्थाभिमपदार्थप्राप्यान्वयमुत्तरपदस्यैव सोर्थः॥ पूर्वपदं तत्तास्य
मे ग्राहकमित्युक्ताव्युत्पत्तिरव्यभिचारिणीति भावः॥ इदमुपलक्षणं प्राप्तोदकादौत्र
पूस्यमस्य कर्त्तरि कर्मणि च वृत्तिः॥ स्वीक्रियते एवं च उदकाभिन्नकर्तृकप्राप्तिकर्म
ग्रामेत्यभीप्सितो बोध्यो निर्व्वहस्यैवं चरमेति॥ पूर्वपूर्ववर्णानुभवजनितसंस्कारसहि
तस्येत्यर्थः॥ नातः केवलांत्यमवर्णादर्थबोध्यापत्तिः॥ एवं च भवदुक्तापत्तिरिष्टापत्ति

रेवेति भावः॥ एकार्थीभावानभ्युपगंतृमतं दूषयति॥ अत्रोच्यत इत्यादिना संज्ञा
दीत्यादिना सुबुत्पत्त्यादिपरिग्रहः॥ सा प्रातिपदिकसंज्ञा न च तत्राप्यर्थवदनुवृत्तिः
कृत्तद्धितांतेत्यर्थत्वाभावमावश्यकी अन्यथा संज्ञाविध्याविति निषेधात्तदं तहेतुग्र
णं न स्यादिति वाच्यं॥ एवमपि समासांसे तत्स्यासंबंध्यादित्वाशयात्॥ भाष्य॥ सिद्धा
यान्त्विति समासग्रहणमेर्थवत्समुदायानां नियमार्थमिति वदता भाष्यकारेण समा
सेप्यर्थवत्त्वं वर्ण्यं सूचनात्॥ कथमन्यथा नियमार्थत्वं वदेत्॥ द्वंद्वैकदेशे पदार्थांत
रान्वयस्याव्युत्पन्नत्वात्सर्वत्रैव संबंध्यस्यौचितत्वाच्च स्पष्टमिति॥ समासे शक्त्य
नभ्युपगमे त्वर्थ॥ वत्वाभावेन तस्य प्रातिपदिकसंज्ञाया अप्राप्तौ विध्यानार्थत्वेनो

पक्षीणस्यसमासग्रहणस्यकथं नियमार्थत्वं भवेत् तस्मादेतन्माद्यादपि विशिष्ट
शक्तिस्वीकार॥आवश्यकः॥अथार्थवद्धातुप्रातिपदिकमित्येव सूत्रन्यासोस्त्व
र्थवत्वमर्थस्मारकवृत्तिमत्वं वृत्तिमद्विषयकप्रतीत्यविषयत्वस्वरूपं तद्धि घटे
वृत्तिमद्वयवकसमुदायेपि इति एवं रीत्या सुवंततिङंतयोर्वाक्यस्य च प्रातिप
दिकत्वप्राप्तौ कृत्तद्धितसमासाश्चेति सूत्रेण नियम्यते वाक्यस्य चेत्॥समासस्यैव
प्रत्ययांतस्य वेत्कृत्तद्धितांतयोरेवेति एवं च राजपुरुषादिसमासे र्थवत्सूत्रेणैव
प्रातिपदिकसंज्ञासिद्धातिन च्चैवं ध्यनं वनमित्यादौ प्रत्येकवर्णानां प्रातिपदिकसं
र ज्ञास्यादिति वाच्यं प्रत्येकवर्णानां शाब्दबोधजनकवृत्तिमत्वाभावेन वृत्ति

मद्विषयकप्रतीतिविषयत्वात् दशदाडिमादिनिरर्थकसमुदायस्य नियमेनैववार
णादितिचेन्न भाष्यकामकाराद्यनाह तत्सौत्रलक्षणयाप्रयोगव्युत्पादनेतिप्रसंगात्
एतेनध्यात्वादिपर्युदासादेनार्थवत्वेलङ्घे थे॥ वद्ग्रहणसामर्थ्यादर्थवदग्रहीतसमुदा
यस्यराजपुरुषादेरपिप्रातिपदिकसं[illegible]ज्ञासिद्ध्यतीतिमतंपरास्तं अर्थवद्ग्रहणस्य
-- र्थतामा भाष्यकारादिभिःसिद्धांतितत्वाद्य॥ अपसर्वत्रव्युत्पत्तिपक्षस्यैवस्वीकारा
दर्थवत्सूत्रेर्थवत्वंपंच विध्याव्यक्तिमत्वमेनग्राह्यं एतत्सूत्रेधातुप्रत्ययग्रहणमुत्त
रसूत्रंत्रंचनकर्तव्यंभवतीतिलाघवंराजपुरुषइत्यादिसमासादिव्यक्तौप्रातिपदि
कसंज्ञाचसिद्ध्यतीतिचेन्न अनुकरणेद भेदपक्षेगविसाह भेदपक्षेगौरिस्मन्नस्याह

इति च व्यवस्थायां असिद्धेः ॥ भाष्यकारैस्तत्र तत्र अव्युत्पन्नान्येवोणादीनीत्यु
क्तत्वाच्च ननु राजपुरुषइत्यादौ विशिष्टे शक्त्यस्वीकारेपि नार्थवत्वनिबंधनप्रा
तिपदिकसंज्ञानुपपत्तिः ॥ तथाहि न शक्यसंबंधो लक्षणा किंतु स्वज्ञाप्यसंबंध ए
व ॥ अत एव तत्र तत्रार्थवादवाक्यानां नंदाम्यां प्राशस्त्ये लक्षणेति संगच्छते गभी
रायां नद्यां घोषइत्यादावभिमतवाक्यार्थबोधसिद्धिश्च भवति एवं च चित्र
ग्वादौ लक्षणया अर्थवत्वात्प्रातिपदिकत्वसिद्धिरत आह ॥ समासवाक्य इति शक्त
भावेनेति ॥ अयं भावः स्वज्ञाप्यसंबंधो न लक्षणा अपभ्रंशेपि लक्षणासत्त्वा-
प्रसंगात् ॥ किंच स्वज्ञाप्योर्थस्तत्संबंधो लक्षणा इत्यर्थो वाच्यः ज्ञाप्यत्वं च शब्दनि

स्य ज्ञापकता तन्निरूपकत्वं ज्ञापकत्वं ज्ञापकत्वं च वृत्त्या बोधकत्वं तच्च न वा
क्ये इति दूषणं तदवस्थमेव तस्मात् स्वशक्यसंबंधो लक्षणा इत्येव वक्तव्यं सा च वा
क्ये शक्तिमनभ्युपगच्छतां वाक्ये दुर्लभेत्यकामेनापि समासे शक्तिः॥ स्वीकरणीये
ति भावः॥ सूत्रतामिति॥ तथा च सुबंतभिन्नं तिङंतभिन्नं यत्तत्प्रातिपदिकमित्यर्थात्
समासस्य प्रातिपदिकत्वलाभः॥ तदेवाह चेदित्यं तेन कृतमिति अलमित्यर्थः॥ प्रत्ये
कं वर्णेष्विति॥ प्रातिपदिकसंज्ञायां मर्थवत्त्वस्याप्रयोजकतया अव्ययमादिवत् प्रति
वर्णं विभक्त्युत्पत्तिः स्यादिति भावः॥ अर्थवत्तावश्यपेति प्रातिपदिकसंज्ञायामर्थव
द्ग्रहणस्यावश्यकत्वेनेत्यर्थः॥ तादवस्थ्यमेवेति तस्मात्समुदाये शक्तिस्वीकार आ

वस्मश्यकर्तृत्वनिभावः॥ ननुपदसमुदायेनातिरिक्ताशक्तिः कॢप्तावयवशक्त्यैव
बोधनिर्वाहात्॥ नचैवंसमासादौप्रातिपदिकसंज्ञाभावः॥ उत्तरसूत्रेणतद्विधाना
त्॥ नचतत्राप्यर्थवत्पदानुवृ ऽ त्त्यापुनरसंभवस्तदवस्थ एवेतिवाच्यं॥ तत्रार्थ
वत्पदाननुवृत्तेः कथंतर्हितत्रकृत्तद्धितांतग्रहणस्यार्थलाभः॥ संज्ञाविध्यावितित्
त्रिषेध्यादितिवाच्यं तस्यप्रापकत्वात्॥ उत्तासादिवत्केवलकृत्तामप्रयोगेणतदु
पादानवैयर्थ्याच्च नचैवमपिबहुपटवइत्यादौतद्धितांतत्वाभावादप्रा -
तिपदिकत्वेप्यर्थवत्त्वाभावात्॥ पूर्वसूत्रेणाप्यप्राप्ता [illegible] प्तावुपोत्तमो [illegible] दात्त
त्वमिष्यतेनस्यादितिवाच्यं॥ तत्रतद्धितपदेनस्वाव्यवहितोत्तरत्वस्वाव्यवहित

अ· 2T·

मू॰ सा १४८ 148

पूर्वत्वान्नान्तरसंबंधेन प्रकृतिविशिष्टसमुदायस्य ग्रहणाद्दोषाभावा
त् ॥ अत एव पचतकीत्यादावपि नातिव्याप्तिः समुदायशक्त्यभावादेव
कृत्तद्धितेति ॥ सूत्रेऽप्राप्तप्रातिपदिकसंज्ञाविधानार्थं समासग्र
हणं भगवता कृतं संभवति विधित्वेनैकदोषग्रस्तनियमकल्पनामाक
नीयत्वात् ॥ न च समासग्रहणस्य नियमार्थत्वाभावेन कृद्ग्रहणपरिभाषया मू
लकेनोपदंशमित्यादौ प्रातिपदिकत्वं स्यात्तथा चायं प्रयोगो लुप्येतेति वाच्यं ॥ अनं
तरग्रहणज्ञापितपरिभाषाया असार्वत्रिकत्वेनैतादृशप्रयोगनिर्वाहादित्याग्रहे
ण यदि ब्रूयात्तदाप्याह ॥ किंचैवमिति ॥ एवं समासे विशिष्टशक्त्यस्वीकारे ॥ अ

एम १४८

नन्वमापत्तिरिति॥ गवादिपदार्थे इति शेषः॥ तत्र हेतुमाह॥ प्रत्ययानामिति॥ प्रकृति
त्वादिति प्रकृतित्वं च प्रत्ययनिष्ठपरत्वावधित्वं प्रत्ययोद्देश्यतावच्छेदकरूपवत्त्व
मिति मावत॥ विशिष्टस्यैवेति प्रकृतित्वं हि आनुपूर्व्यवच्छेदेन पर्याप्तमिति भावः
प्रत्ययानामिति व्युत्पत्तेः प्रकृतेः॥ प्रत्ययसंनिहितार्थवत्त्वेनेव निवशादिति मतं
दूषयितुमुपन्यस्यति मन्त्विति तथा च चित्रग्वादौ गवादिपदार्थे चित्रगुस्वाम्या
दौ कर्मत्वाद्यन्वय इति न प्रत्ययानामिति व्युत्पत्तिविरोध इति भावः॥ प्र उपकुंभे
ति॥ यदा त्वत्राप्युत्तरपदे एव लक्षणेत्यभ्युपगमस्तदा न व्यभिचार इति ध्येयं पू
र्वपदलक्षणायामपि न व्यभिचार इत्यनुवायवाना ह ह॥ न चेति विवक्षितत्वादि

भ॰ सा॰ ति॥ तथा च श्रूयमाणसंनिधिर्नैव विवक्ष्यते हुं हे एवमादिष्वादौ व्यभिचारात्॥ किं
१४९ त्वनुशासनबोधितसंनिधिरेव स च हुं हे इत्यादावपि भावादादावप्यस्त्येवेति भावः
149 समस्यमानेति॥ समासाद्धि हितविभक्तेः समासत्वाश्रयपूर्वोत्तरपदात्संनिहितत्वं
नियतावाप्यमेवेति भावः॥ ननु संभवत्येवायं प्रकारो यद्धि समासप्रयुक्तप्रातिपदि
कनिबंधनविभक्त्युत्पत्तिर्भवेत्सुकृते च समासग्रहणस्य नियमार्थतया एवस्य
युक्तैव प्रातिपदिकसंज्ञेत्याशयेन हार्थेवतस्त्रैणेति॥ तथा च शास्त्रबोधितसंनिधानमपि
विशिष्टस्यैव न पूर्वोत्तरपदयोरित्युक्तस्थले दोषो दुरुद्धर इति भावः॥ प्रकृति त्वा लाश्र
येइति न तु प्रकृतिसत्वपर्याप्त्यवच्छेदकीभूतविशिष्टानुपूर्व्यवच्छिन्नार्थ इति भा॰ राम १४९

वः ॥ असन्निहितत्वेऽप्रेत्यर्थो मादाय दूषणमुक्त्वा व्यसंनिहितेपि तदाह ॥ अघट
मिति ॥ तन्मते नैवेदं दूषणमिति बोध्यं ॥ नचेति ॥ एकत्र विशेषणत्वेनान्वितस्या
परत्र विशेषणत्वेनान्वयो न भवति नैराकांक्षादिति भावः ॥ विशेषणत्वेनान्वि
तेपुनर्विशेषणत्वान्वयो न भवतीति मयाश्रुतार्थे दूषणमाह ॥ पाकान्नीलं द्रव्यादि
नीलत्वस्य स्वमोः स्वाश्रयेविशेषणतयान्वितयोस्तत्र पंचम्यर्थेस्यानन्वयापत्तेरि
त्यर्थः ॥ तज्जन्येति ॥ प्रकृतिजन्यस्यर्थः ॥ मात्रपदेनव्यक्तिजन्यत्वमात्रस्यव्य
वच्छेदः ॥ अत्र चित्रगुघटकगवादिपदार्थे ॥ अविरुद्धेनासंगतं घटं पश्येति ॥ अ
त्र दृशिर्ज्ञानसामान्यार्थकनतु लौकिकविषयिताशालिचाक्षुषज्ञानपरः ॥ तस्य

भू॰ सा आकाशादेर्वाच्यात्॥ वारणायेति दृश्यार्थकर्मत्वान्वयस्याकाशे वारणायेत्य
१५० र्थः॥ अथेति पूर्वं प्रत्ययसन्निहितत्वं प्रकृतित्वं व्युत्पत्तिघटितमुक्तं इदानीं
180 तत्प्राग्वर्तित्वं प्रकृतित्वमुच्यते इति भेदः॥ प्रसंगादिति॥ कथमस्यापि तत्प्राग्व
र्तिपदार्थत्वादिति भावः प्रत्ययानामिति व्युत्पत्तेरन्यो विषयः समासे तु भिन्नै
व व्युत्पत्तिरिति तदभिप्रायेणाह॥ अथेति अलुकेति समस्यमानपदार्थप्रका
रकशाब्दबोधत्वावच्छिन्नं प्रति [illegible] विशेष्यतया प्रत्ययजन्योपस्थितेः॥ का
रणत्वांतरकल्पने चेत्यर्थः॥ सागं चेति॥ प्रत्ययमानां प्रकृतित्वपर्याप्त्यधिकर
णार्थान्वितस्वार्थबोधकत्वरूपव्युत्पत्तिः सागं चेत्यर्थः॥ ननु पूर्वव्युत्पत्तेः सं राम

१५०

न्निहितत्वं च प्रकृते घटितत्वे सति प्राग्वर्तित्वमिति नोक्तदूषणमत आह दि
गितिदिगर्थस्तु घटकत्वादिप्रवेशो नास्ति गौरवमित्यादि विशिष्टशक्तिक॥
ल्पनापेक्षया लघुत्वात् त्यागो न गुरुभूत इत्यत आहापि चेति नन्वेतस्याः व्यु
त्पत्तेसंकुलः अभेदस्यादावेव व्यभिचारात् आह तंडुलेति तथा चात्रापि तंडु
लान्वयो विभक्त्यर्थे एवेति न व्यभिचार इति भावः ॥ अभेदेति ॥ अभेदार्थि
केति ॥ अभेदस्यादावित्यत्र तत्तद्व्यक्तित्वसाधारणो धर्म असाधारणं च स्वप्रति
योगिव्यक्तित्वस्वसामानाधिकरण्योभयसंबंधेन भेदविशिष्टं यत्तदन्यत्व
मित्येकमात्रवृत्तिधर्म एव न तस्मिन्नाधेयता माप्रकृत पर्यन्वयः ॥ ननु भेदत्वा

वच्छिन्नप्रतियोगिताकाभाव अप्रसिद्धेः॥यत्किंचिद्भेदाभावस्त्वतिप्रसंजकः
यत्किंचिद्भेदमादायानीलेप्यनीलप्रतीत्यापत्तेः॥द्वित्वादिनाभेदाभावमादा
यलोहितेपिनील इतिप्रतीत्यापत्तेश्चपार्थिक इतिशाब्दबोधोत्तरकालिकइ
त्यर्थः॥तादृशेतिराजसंबंधवत्पुरुषस्वरूपविशिष्टार्थेइत्यर्थः॥ननुअभेतिरि
क्तसंबंधावच्छिन्नप्रकारताकशाब्दबोधेएवविभक्तिजन्योपस्थितेः का
रणत्वस्वीकारः॥अतएवराजापुरुषः स्तोकंपचतीत्यादौनामार्थप्रकारक
नामार्थधात्वर्थविशेष्यकः शाब्दबोधः॥सर्वानुभवसिद्धो जायतेन जाय
तेचतंडुलःपचातीत्यत्रकर्मत्वादिसंसर्गको बोधः॥ विशेषणविभक्तिस्तुसा

धुस्त्वार्थिकानत्वभेदार्थिकाननुभवात् ॥ अत एव विशेषणविभक्तेः
साधुत्वार्थत्वमनभिहितेति सूत्रे कैयटेनाप्युक्तं तथा च लस्यार्थे राजसं
बन्धिनो भेदेन पुरुषासावन्वयो नानुपपन्न इति आह ॥ किं चेति विग्रहत्वादि
ति विगृह्यमानसमानार्थत्वं विग्रहस्य विगृह्यमाणपदघटितत्वसत्ति विग
ह्यमाणपदार्थत्र धर्मिणि येन संबन्धेन येन रूपेण यद्वृत्त्याप्रतीतिर्जन्यते तत्
स्वतिपादकत्वमेव अत एव बहुव्रीहौ प्राप्तोदकादावपि प्राप्तिकर्त्रुदकक
र्मत्वमेव बोध्यो विग्रहसमासयोरपीति नवीनबहुव्रीहेरुपजीव्यमपि समान
धर्मिकत्वमेव ॥ अत एव विग्रहस्य शक्तिग्राहकत्वरूपं विवरणत्वमपि संग

भू॰ सा
१५२
152

धत्ते इत्यभिप्रायेणेदं दूषणं दत्तं नान्यथा विध्यस्य प्राचीनसंमतत्वविग्रहह
त्वस्याभिध्यानेइत्यवध्येयं ॥ अन्यथासमाससमानार्थकत्वाभावेइत्यर्थः
तस्माद्विग्रहवाक्यात् नस्यादितिसमानार्थकत्वाभावादितिभावः ॥ अं
त्यपक्षं दूषयतिनांत्यमितिसमासे व्यासे च विभिन्नकार्यकारणभावेगौ
रवात्समानविभक्तिकेतिपरित्यज्यतत्स्थानेविरुद्धविभक्तिकेतिप्रतिक्षिपतिविरु
द्धेतिविरुद्धविभक्तिकधात्वर्थप्रातिपदिकार्थयोः स्तोकंपचतिउद्भिदायजेतेत्यादावभेदे
नान्वयदर्शनादाहप्रातिपदिकार्थयोरिति ॥ राजपदोत्तरंविभक्त्यभावेनतद्विरुद्ध
त्वस्यपुरुषपदोत्तरविभक्त्यावभावादभेदान्वयोदुर्वारइतिभावः ॥ ननुप्रथमश्रुताविरुद्ध

एम
१५२

विभक्तिराहित्यस्याभेदान्वयबोधाकांक्षात्वे चैत्रस्य सुतस्य धनमित्यादौ तदाप[illegible]
त्तिरत आह ॥ प्रपंचितमिति सामानाधिकरण्यविरुद्धविभक्तिरहितयोर्न्नरभेदा
न्वय इति व्युत्स तत्रोक्तमिति नापत्तिरिति भावः ॥ मीमांसकैरपि विशिष्टशक्तिपक्षो
भ्युपेयत इत्याह ॥ अत एवेति एकार्थीभावस्य सर्वसंमतत्वादेवेत्यर्थः ॥ वषट्कर्त्तुरिति
वषट्कर्त्ता होता भक्षमुद्दिश्येति ऋत्विक्कर्त्तृकहविःशेषभक्षणमुद्दिश्येत्यर्थः ॥ एकप्र
सरेति ॥ उद्देश्यविधेयभावेनान्वयेपद्यगुपस्थितेस्तंत्रत्वात्तदभ्युपगमे समासे विशि
ष्टार्थबोधक एकार्थीभावभंगापत्तेरित्यर्थः ॥ अंगैरिति ॥ तत्र हीज्याशेषभूतत्रित्व
विशिष्टमलिंगविदंगविधानं किंवा त्रित्वविशिष्टाशेषांगविधानमिति संशयमेप्रक्रान्त

विज्याशेषेणपुरोडाशेन स्विष्टकृतो हुतत्वादत्र पि शेषभूतत्रिलविशिष्टांगैरेव
स्विष्टकृदर्चनं युक्तमिति पूर्वपक्षे शेषभूतानि काविचिदंगान्यनूद्य त्रिलवि
धाने एकप्रसरताभंगापत्तिस्तस्मात् कल्पसूत्रोक्तत्रिलविशिष्टांगांतरविधान
मिति सिद्धांते दशमतृतीये कल्पसूत्रोक्तान्यंगानि तु हृदयं जिह्वा वक्ष आदीनि तु
वृत्तिजन्य एकोपस्थितिविषयाणां नोद्देश्यविधेयभावो यथा गोघटोपस्थितानां
गोत्वघटत्वगोघटादीनां एवं च प्रथमभक्ष इत्यादिसमासे लक्षणारूपएकवृ
त्त्युपस्थितप्राथम्यभक्षयोर्नोद्देश्यविधेयभावः ॥ तथा च विशिष्टशक्तिं विनापि
मीमांसकसिद्धांतो नानुपपन्नोऽत आह ॥ संगच्छते चेति अन्यथा समासे विशिष्ट

शक्त्यस्वीकारे विशिष्टशक्तिस्वीकारे एव पिंगाक्ष्येक हायनी शब्दयोर्द्रव्यवाचक
त्वेन संदेहाभावाद रुणाशब्दस्यैव गुणवाचकत्वेन संदेहादरुणाधिकरणपूर्व
पक्षसिद्धांतौ संगच्छेते प्रपंचितमिदं पूर्वं तदेतदाह॥ प्रपंचितं भूषणे इतिरोध्यादि
ति॥ मत्प्रकारकयद्विशेष्यकबोधजनकत्वं समासस्य तत्प्रकारकतद्विशेष्यकबो
धजनकत्वं विग्रहस्येत्याकार कनियमानुरोधादित्यर्थः॥ सूत्रादिति॥ समस्यात्रि
कस्य विशिष्यतत्तद्रूपेण समासो नोक्त इत्याशयः॥ प्रथमात्वमेव विशिष्यपूर्वे नोक्त
मिति स प्रथमांत एव शेषपदार्थः॥ एवं च समासस्यैवैकल्पिकत्वात्॥ पक्षे तदभा
वे विग्रहप्रथमांतानामेवोचितमिति भावः॥ उक्तस्यैवेति॥ चित्राणां गवामिसादे

भू॰ सा रेवेत्यर्थः ॥ मौलोपदर्शकपदस्यविचारणमाह ॥ अर्थबोधकमिति ॥ तत्रेतिनिर्दं॰त
१५८ घटितेविवरणे इत्यर्थः ॥ नदेवोपपादयतितथाहीत्यादि ॥ यद्यपिकुंभंकरोतीत्यादा
154 वपिलक्षणायानियमः ॥ कर्तृबोधकत्वात्कृत्तद्धितापिवत्कर्तृबोधकात्वरिन्नस
मानार्थकत्वभंगः ॥ तथापितन्मतसिद्धसमानप्रकारकत्वविशेष्यकत्वरूपसमाना
र्थकत्वभंगोस्त्वेवेत्याहकृत्स्वत्वयेइतिप्राधान्यमितिविशेष्यत्वमित्यर्थः ॥ गुणेति
विशेष्यविशेषणभावव्यत्यासइत्यर्थः ॥ विवरणत्वंविग्रहत्वंशक्तिमत्वाविशे
षादिति ॥ एकार्थीभावाविशेषादित्यर्थः ॥ सिद्धांतसिद्धिरिति ॥ विचारितार्थे
स्यानुपष्टानोपयोगित्वमित्यर्थः ॥ अधिकरणंचैतादृशमारचितंनिषादस्थपति राम

याजपेदिति श्रूयते तत्र निषादस्थपतिशब्दः॥ किं षष्ठीतत्पुरुषो बहुव्रीहिर्वा
तत्का. र्मधारय इति संशये कर्मधारये हि पूर्वविद्याकल्पनरूपगौरवाद् बहुव्री
हौ पदद्वयलक्षणायां गौरवाल्लाघवात् षष्ठीतत्पुरुष एवेति पूर्वपक्षे तत्पुरुषस्या
पि पूर्वपदलाक्षणिकतया कर्मधारयमपेक्ष्य गौरवाल्लाघवात् कर्मधारय एवा
पूर्वविद्याध्ययनस्योत्तरकाला. कल्पनेन तादृशगौरवस्य फलमुखत्वमा गौरवा
दिति सिद्धान्तितमिति तद्विरुद्धे तद्भवन्मते समासमात्रे एकार्थीभावस्वीकारा
द्गौरवानवकाशादिति भावः॥ समाधत्ते पर्य्यवस्यदिति तदानींतनेति तादृशवा
क्यजन्यशाब्दबोधाव्यवहितप्राक्क्षणवृत्तिशक्तिग्रहनिष्ठां जनकं गवहिंगमा

न्यू:सा वचिंजनप्रयुक्तलाघवमादृत्येत्यर्थः॥ प्रकरणस्यायं भावइतिनिषादानामिति॥ अ
१५५ त्रपक्षद्वयेऽपित भावेऽप्यैकार्थीभावाभ्युपगमात् निषादस्वामिके इतिवहुव्रीहौ वन्यपदा
155 र्थे स्वाम्यंतत्भावेऽप्यैकार्थीभावः कल्प्यतेनानार्थमितिव्र त्वानेकार्थोपस्थितिजनकं
हि नानार्थमित्यर्थः॥ एवंच किंग्राह्यमितिसंदेहे सजीतिभावः॥ विशेषावगतिरिति
एकतरार्थविषयनिश्चयइत्यर्थः॥ तत्कल्पनापांतात्स्यैककल्पनामांपूर्वोपस्थितएवे
तिप्रत्येकशक्तिपर्यावच्छेदकतत्तद्धर्मावच्छिन्नमात्रेसमुदायशक्तिकल्पनप्रयु
क्तांतरंगात्वस्तत्वात्कर्मधारयस्यलाघवमितिप्रवादः॥ प्रत्येकशक्तिसहकृतसमुदा
यशक्तिरेवैकार्थीभावइत्यनुरत्येदमुक्तंननुजहत्स्वार्थावृत्तिरवयवानांनैर एस

र्थेकत्वमित्यभिप्रायेणेति भावः ॥ कल्प्यतेवध्यार्थ्यतेकर्मधारयबहुव्रीहिपक्षेस्यपतिश
ब्दस्य राजदंतादित्वात्परनिपातः ननु मीमांसकमते नामासे नैवाधि[illegible]करणसि
द्धांतोपन्नौ ए काथीभावपक्षस्वीकृतस्य क्लेशासहनं निरर्थकमेवेत्यत आह ॥ परेषा
मपीति त्वन्मते पि सति तात्पर्ये संबंधस्वाम्यादिबोधस्य दुरपह्नवत्वमात्तात्पर्या
भावे नैवार्थांतरावगत्यभावस्य समर्थनीयत्वादिति भावः ननु अन्यत्र प्रकरणस्ये
वाभिध्यानियामकत्वमुक्तं न तात्पर्यस्येत्यत ॥ आह दिगिति दिगर्थस्तु अननुगता
नां संयोगविप्रयोगादिरूपं प्रकरणानामभिध्यानियामकत्वापेक्षया तात्पर्यस्यैवव
क्तुरिच्छात्मकस्यैकस्याभिध्यानियमकत्वमुचितं प्रकरणस्य तु तात्पर्यग्राहकत्व

अथ शक्तिनिरूपणम्

भू॰ सा मेचेति ॥ ॥इति भूषणसारविवृतौ समासशक्तिनिरूपणं ॥ प्रसंगादिति ॥ स्मृतस्य
१५६ उपेक्षानर्हत्वं प्रसंगः ॥ तादृशप्रसंगसंगत्याधीनशक्तिस्वरूपनिरूपणमित्यर्थः ॥ तत्रागृ
156 हीतशक्तिकात्पदाद्बोधाभावप्रयोज्यानुदयात् तद्धर्मावच्छिन्नविशेष्यकशाब्दबु
द्धित्वावच्छिन्नं प्रति तद्धर्मावच्छिन्नार्थे निरूपित शक्तिमत्पदज्ञानत्वेन कारण-
त्वमिति सिद्धांतस्थितिः ॥ तत्र तत्तत्पदबोध्यत्वप्रकारकत्वविशिष्टभगवदिच्छैव श
क्तिरिति नैयायिकाः ॥ न तो घटादावपि पटादिपदवाच्यत्वप्रकारिकाया भगवदिच्छाया वि
षयतासत्वेप्यतिप्रसंगः ॥ उक्तविशिष्टेच्छायास्तत्रासत्वात् मीमांसकास्त्वीश्वरस्या
नभ्युपगमादिच्छामात्रस्यापि द्विष्ठत्वाभावेन संबंधत्वाभावात् ॥ पदपदार्थसंबंधत्व राम

१५६

रूपशक्तित्वाभावइति शंक्यः॥ पदार्थोत्तरं स्वरूपसंबंधेन वर्तमानमितिवदतित्तदेत-
न्नामात्तानिनिराकर्तुं प्राहेत्तत्स्वरूपप्र दर्शनमित्याशयवान्मूलमवतारयतित्तस्याः॥
स्वरूपमितिस्वविषयेषुस्वजन्यचाक्षुषादिविषयेषएतादृशंसविषयत्वमिंद्रियाणाम
पिनिराबाध्यमेवेति भावाः॥ अनादिरितिपुरुषप्रयत्नानपेक्षमित्यर्थः॥ शब्दनिबंधो
न्धगमतायामानादित्वंचस्वार्थबोधस्वार्थपूर्वपूर्वबोध्यध्वंससमानाधिकरण० त्व
तद्बोध्यकारणतातदर्थबोध्यकत्वंशब्दनि बंधमित्यर्थः॥ इदंचज्ञायमानेपदंकरणमि
त्यभिप्रायेणशब्दज्ञानस्यकरणत्वेतुविषयतयाकारणतावच्छेदकतेत्यर्थोबोध्यः॥ ननुसं
केतज्ञानंविनाबोधकत्वस्वरूपशक्तेरीहादवश्यापेक्षणीयसंकेतस्यैवशक्तित्वम

स्तुक्तं बोधकत्वस्वरूपशक्त्येत्याशंकते ॥ नन्विति बोधकत्वस्य शक्तित्वे हेतुमाह ॥ आ
धुनानिकत्वाच्च ॥ नव्यसंकेतितच्चैत्रमै त्रादिनामस्थलेनादिबोधकारणत्वाभावा
त्तेभ्यो बोधानापत्तेरित्यर्थः ॥ तदभावादनादिबोधकारणत्वाभावात् ॥ अनादित्वरू
पविशेषणाभावप्रयुक्तः ॥ प्रकृते विशि ... व्याप्यावर इति भावः ॥ नन्वनादित्वं नवि
वक्ष्यते किंतु बोधकत्वत्वेनैव प्रकृते तेन रूपेणात्त्वानं संभवत्येवेति चेत्तदेदं संभ
वति यदि संकेतग्रहमंतरेणा बोधकत्वग्रहो भवेन्न तत्संभवतीत्याहार्थेवेति
विनापि संकेतग्रहसहायं बोधकत्वमात्रस्य शक्तित्वे इत्यर्थः ॥ लाक्षणिकेति अत्रा
ति॰ व्याप्तिकथनं निरूढलक्षणाभिप्रायेण स्वारसिकाधुनिकत्वस्य णामत्वनादित्वा

भावादेवनास्ति व्याप्तिरिति बोध्यं ॥ आवश्यकत्वादवश्यापेक्षणीयज्ञानविषयत्वात् ॥ स ए
व संकेत एव एवकारेण परोक्तव्यवच्छेदः ॥ आधुनिके पित्रादिसंकेतितचैत्रादौ स्वरूपे
णेति संकेतत्वेनेत्यर्थः ॥ प्रत्यक्षे इंद्रियाणां इंद्रियत्वेन चक्षुरादिना वाकारेण त्वमि
न वाज्ञातः ॥ संकेसंकेतत्वेन न हेतुरिति पर्यवसितोर्थः ॥ अगृहीतेति ॥ अज्ञातसंकेता
दित्यर्थः ॥ अर्थेति स्वरूपतः ॥ संकेतस्यतन्त्रत्वादिति भावः ॥ सामान्येति संकेतातिरिक्त
वृत्तित्वे सति संकेतवृत्तिधर्मेणेत्यर्थः ॥ संकेतत्वेनेति ईश्वरीयसंकेतत्वादिरूपवि
शेषधर्मेणेत्यर्थः ॥ तज्ज्ञानशून्येति गवादिपदेषु ईश्वरीयत्वविशिष्टसंकेतत्वप्रकार
कज्ञानशून्यानामित्यर्थः ॥ लौकिकानामिति पामराणामित्यर्थः ॥ बोध्येनेति बोध्यजन

भू: सा कत्वज्ञानमात्राद्वाक्यार्थबोधोदयेनेत्यर्थः ॥ यद्यपि संकेतत्वेन हेतुतायां न व्यभिचा
१५८ रः ॥ तथापीश्वरसंकेतत्वेन हेतुतायां दोषोदस्यैव तज्ज्ञानमिति संकेतप्रकारकज्ञान
158 मित्यर्थः ॥ संकेतितपदस्यैवार्थबोधजनकत्वेन पदनिष्ठबोधजनकतायां संकेत
स्यावच्छेदकत्वादिति भावः ॥ हेतुतायामिति ॥ अर्थधीजनकत्वस्य कारणतावच्छेद
कत्वे लाघवेन वैयाकरणपक्षसिद्धेरिति भावः ॥ अस्येति बोधजनकत्वरूपशक्तिग्र
हस्येत्यर्थः ॥ व्यभिचारः ॥ बोधकत्वरूपशक्तिग्रहाभावेपि शाब्दबोधजननाद्व्यति
रेकव्यभिचार इत्यर्थः ॥ तत्रापि संकेतादेव शाब्दबोधस्थलेपि इच्छाग्रह इति इदंपद
विशेष्यकैतदर्थबोधजनकत्वप्रकारकेच्छाग्रहे इत्यर्थः ॥ अवगाहनेन विषयीकर रा म
१५८

णेन ज्ञाने घटादिविषयकज्ञानस्य तद्विषयविषयकत्वनियमाद्घटो जिज्ञास्यत इत्या
दाविवेति भावः ॥ शंकतेनन्वेति ॥ उत्तरवाक्यमित्यनेनान्वयः ॥ स्वातंत्र्येणेति ॥ मुख्ये
नेत्यर्थः इतराविशेषणत्वेनेति यावत् प्रकृते चेद् घटांशे विषयतया विशेषणीभूत
बोधकत्वेस्येव न ज्ञानेन विषयीकरणादिति भावः ॥ अन्यथेति पारतंत्र्येणापी बोध
कताज्ञानस्य शाब्दबोधहेतुत्वे इत्यर्थः इष्टापत्तावाह नेदं तद्धीति घटपदं न घट
धीजनकमिति अभावनिश्चयतनत इत्यर्थः ॥ अस्माच्छब्दादितिवदेवदत्तादिति निर्घ
घटपदजन्यबोधविषयो घटाद्यर्थ इत्याकारकज्ञानवत इत्यर्थः ॥ ग्राह्याभावाव
गाहाहितमा घटपदं घटधीजनकमिति ज्ञानस्यासंभवेपि एतादृशज्ञानजननेवा

श॰ सा
१५९
159

ध्यकाभाव इति भावः ॥ तद्ग्रहापत्तेरिति घटादिविषयकशाब्दापत्तेरित्यर्थः ॥ उक्तज्ञान
स्य बोधविषयविषयकत्वेऽपि पदांशेऽर्थबोधजनकत्वं न विषयी क्रियते येन शक्ति
ग्रहत्वं तस्य स्यात् ॥ अस्मान्मते सिद्धशक्तिग्रहस्तु पदांशे बोधजनकत्वावगाह्येव
बोधे पदजन्यत्वग्रहे बोधजनकत्वं पदेऽपि गृह्यत इति चेत् ॥ नेदं तद्बुद्धिजनकमिति बा
ध्यग्रहस्य जागरूकत्वात् ॥ तदानीं नास्मन्मते सिद्धशक्तिग्रहः इति भावः ॥ समाध्यन्ते
नेदं तद्बुद्धिजनकमिति बाधेन ॥ अप्रामाण्यग्रहानास्कंदितानाहार्यनेदं तद्बुद्धिजनक
मित्याकारकनिर्णयरूपप्रतिबंधकसत्त्वेनेत्यर्थः ॥ तद्ग्रहासंभवात् ॥ अर्थे धर्मिक
पदजन्यबोधविषयत्वग्रहासंभवादित्यर्थः ॥ अन्यथेति ॥ नेदं तज्जन्यमित्याकारक

साम
१५९

बाध्यग्रहेपि ज्ञायमानस्य रजतं बुद्धमनेनेति ग्रहस्येदं विशेष्यकरजतप्रकारकग्र
हत्वे भ्रांतित्वस्यापि दोषाभाववतोपीति भावः ॥ भ्रांतत्वापत्तेरिति तदभाववति तत्प्रका
रत्वावगाहित्वानवत एव भ्रांतत्वादिति भावः ॥ इदं पदमेतदर्थबोध्यत्व अस्मात्पदाद
यमर्थो बोद्धव्य इत्याकारकसंकेतांतर्गतबोध्यजनकत्वज्ञानस्य न शक्तिग्रहत्वं संके
ते प्रकारता विशेष्यतापन्नस्य बोध्ये प्रकारत्वात् ॥ विशेष्यतानापन्नत्वाद् व्यवसीये वि
शेष्यतापन्नस्यानुव्यवसायेतदभाववत् ॥ किंतु संकेतात् इदं पदमेतदर्थबोधकमिति
शक्तिग्रहस्ततः ॥ शाब्दबोधः ॥ अन्यत्र तु इदं पदं एतदर्थबोधकमिति कारणांतराच्छक्ति
ग्रहाद्बोध्यः ॥ अर्थबोध्यजनकत्वरूपशक्तेर्ग्राहकं दर्शयति इदं चेति ॥ स्वतंत्रबोध्यक

भः सा त्तारूपशक्तिज्ञानानग्राहकाप्तोपदेशरूपसंकेतइत्यर्थः ॥ तेनसंकेतज्ञानात्सवाचकवो
१६० ध्यकताज्ञानेनैतज्जन्येव्यभिचारोनेतिभावः ॥ पूर्वोक्तोलक्षणातिव्याप्तिमित्यापत्त्या
160 परिहरतिनापीतिशक्तिग्राहकेतिशक्तिग्राहकव्यवहारादेर्लक्ष्येपिसत्वादित्यर्थः ॥ न
नुव्यवहारादेवनलक्ष्यार्थवोधोपितुल्यक्षणेयेवेतिकथमुक्तापत्तेरित्यमत
आहकिंचेतितंगत्वादितिप्रत्यक्षाद्युपस्थितेः ॥ शाब्दवोधानुदयादित्यर्थः ॥ नन्वना
मत्वात्तादृशागौरवंसोढव्यमतआहापिचेतिव्यभिचारेतिव्यतिरेकव्यभिचारइत्य
र्थः ॥ तमेवोपपादयतिशक्तिजन्येति ॥ अव्यवहितोत्तरेतितिस्वध्वंसाधिकरण
क्षणध्वंसानधिकरणक्षणोत्पत्तिकत्वेसतिस्वाधिकरणक्षणध्वंसाधिकरण राम
१६०

क्षणोस्यत्तिकत्वं सर्वत्राव्यवहितोत्तरत्वमिदमेव स्वपदमाः वधिपरं प्रकृते च
लक्षणाज्ञानजन्योपस्थितिविशिष्टशाब्दबोधोन शक्तिज्ञानकार्यतावच्छेदका
क्रांतद्वृत्तिनव्यभिचार इति भावः॥ अनेनेति॥ स्वत्वस्याननुगततया तद्घटिताव्यव
हितोत्तरत्वस्य कार्यतावच्छेदककोटौ पाते कार्यकारणभावानंत्यं कारणस्य कार्य
तावच्छेदककोटिप्रवेशे आत्माश्रयादिदोषश्चेति भावः॥ अन्यविधेयगौरवमप्याह किं
चेति॥ प्राग्वदिति॥ परस्परव्यभिचारसंहारणायाव्यवहितोत्तरत्वनिवेशो गौर
वमित्यादिप्रागुक्तं तद्वदिति भावः॥ ननु बोधकत्वस्वरूपशक्तिवादिनोपि गंगापदं प्रवा
ह बोधकमिति शक्तिग्रहात्तीरशाब्दबोधवारणाय कार्यकारणभावे तत्तदर्थनिवे

भू: सा
१६१
161

श्य आवश्यकः तीरादिबोधकत्वं मम मते लक्षणया तव मते शक्त्येति क गौरवमित्याह
नच्चैतिपरस्परेति गंगादिपदे तीरबोधकत्वग्रहं विनापि तीरपदशक्तिग्रहात्तद्बोधो
त्पत्तेर्व्यभिचारवारणायेत्यर्थः॥ शक्तिभ्रमानुरोधेनेति तीरे गंगापदस्य शक्तिभ्रमद
शायां गंगापदात्तीरबोधस्य सर्वसंमतत्वसिद्धं तयाकारणतावच्छेदककोटौ तत्तत्तदर्थ
निवेशस्य उभयवादिसिद्धत्वादित्यर्थः॥ नवेति लक्षणास्वीकर्तृमतेपीत्यर्थः॥ शाब्द
बोधीयशक्तिज्ञानकारणतायां शक्तित्वेन न निवेश्यते किंतु वृत्तित्वेनेति नोक्तगौ
रवादिदोषइत्याशंकते॥ अथेति उभयत्रापि वृत्तित्वावच्छिन्नजनकतानिरू
पितजन्यत्वासत्त्वादिति भावः॥ अन्यतरत्वस्येति शक्तिभिन्नत्वे सति लक्षणाभिन्नं

ना म
१६१

यत्तद्भिन्नत्वस्येत्यर्थः॥ शाब्दबोधेति शाब्दबोधहेतुभूता या पदार्थोपस्थितिस्त
दनुकूकूलत्वस्येत्यर्थः॥ उभयपक्षसाधारणं दूषणमाह गुरुत्वादिति अस्मदुक्तश
क्तित्वमपेक्ष्य भेदद्वयादिघटितत्वेन भवदुक्तपक्षस्य गौरवादित्यर्थः॥ द्वितीये
दूषणांतरमाह शाब्दबोधेति॥ तथा च व्यक्तित्वग्रहे शाब्दबोधपदार्थोपस्थित्योः॥
कार्यकारणभावग्रहस्तद्ग्रहे च निरुक्तव्यक्तित्वग्रह इत्यन्योन्याश्रयादिदोषात्कार्य
कारणभावाग्रहः॥ शक्तित्वस्यासंभवश्चेत्ययं परिस्कारोऽप्यसंगत इति भावः॥ विजा
तीयोपस्थितिजनकपदार्थेये संबंधो व्यक्तित्वापि न वैजात्यस्य दुरूपपादत्वादु
ज्ञेयत्वाद्वेत्याशयः॥ अयममेति लक्षणास्वीकर्तुरपीत्यर्थः॥ लक्षणाज्ञानजन्यतीम

भ॰सा दिशाब्दबोधेपिशक्तिज्ञानाधीनएवेतिनलक्षणार्थमादामव्यभिचारइतिभावः॥समा
१६२ नविषयत्वस्येतितत्तदर्थविषयकबोधंप्रतितत्तदर्थनिरूपिततत्तत्पदनिष्ठशक्ति
ज्ञानत्वेनहेतुतायाआवश्यकत्वादित्यर्थः॥तदेवाहान्यथेति॥समानविषयकत्वा
निवेशेशक्तिग्रहपदार्थोपस्थितिशाब्दबोधानांसमानविशेष्यकत्वनियमादिति
भावः॥संबंधाग्रहवतोलक्षणाज्ञानाभाववतइत्यर्थः॥शक्तिमितिप्रवाहनिरूपित
शक्तिंगंगापदेजानतइत्यर्थः॥ननुगंगापदंतीरलक्षकमितिलक्षणाज्ञानस्यशक्ति
विषयकस्यतीरविषयकत्वस्यापिसत्वेनततस्तीरोपस्थितौकिंबाधकमत॥आह
अपिचेतिसमूहालंबनेतिसमूहविषयकेत्यर्थः॥घटांशेशक्तिज्ञानजन्यत्वात् राम

समूहालंबनस्मृतेरपि व्याप्तिज्ञानजन्यत्वं व्याप्तिजन्योपस्थितिरिति तद्विषयकत्वा
वच्छिन्नव्याप्तिज्ञानीयकारणतानिरूपितकार्यतावच्छेदकधर्मावच्छिन्नोपस्थि
तिरित्यर्थः॥ व्याप्तिज्ञाननिष्ठजनकतायां हस्ती विषयत्वेन नावच्छेदको व्याप्तिज्ञा
नेष्वधर्मित्वेनाभानादिति नोक्तापत्तिरिति भावः॥ वक्तव्यमाह एवं चेति॥ तदंशवि
षयकत्वेन शक्तिज्ञानस्य हेतुत्वे चेत्यर्थः॥ असंभवदुक्तिकमिति॥ लक्षणाज्ञान
स्य तीरविषयकशक्तिग्रहाभावादिति भावः॥ एतेनेति शक्तिलक्षणाज्ञानस्यैकरू
पेण हेतुत्वासंभवप्रतिपादनेनेत्यर्थः॥ शक्तिप्रयोज्येति लक्षणाजन्योपस्थितेश
क्तिज्ञानप्रयोज्यत्वसत्त्वान्न लक्षणावादिमते कार्यकारणभावद्वयकल्पनेत्यर्थः

भ॰सा
१६३
163

अनतिप्रसक्तत्वेति॥ जन्यजन्यत्वरूपस्यप्रयोज्यत्वस्यविवक्षणेलक्षणेज्ञानजन्योप
स्थितिशाब्दबोधस्यसंग्रहेपिशुद्धशक्तिजन्येव्याप्तिः॥ विशेषणतावच्छेदकप्रका
रकनिश्चयमविधयाशक्तिज्ञानजन्यघटपदशक्यत्वान्देशद्वस्याकारकविशिष्ट
वैशिष्ट्यावगाहिबोधेपिसत्वान्नतोपिघटशाब्दबोधापत्तेश्चसाक्षाज्जन्यत्वस्य
विवक्षतेतुलक्षणेजन्यस्यासंग्रहइत्युभयसाधारणंतस्यनसंभवतीभावः॥ अ
ननुगतस्योभयसाधारणंतुसुतरामसंभवतीतिभावः॥ अत्रकेचित्॥ अर्थबोध
कत्वस्यशक्तित्वंसंभवेएवकार्यकारणभावेलाघवगौरवविचारः॥ संभव॥
त्वयोजनकः सएवनसंभवतितथाहिप्रयोज्यप्रयोजकव्यवहारंपश्यता टम
१६३

वात्वेन प्रयोज्यस्य प्रवृत्त्या तस्य ज्ञानमनुमाय तज्ज्ञानस्य चोपस्थितत्वाच्छब्दमेव का
रणत्वेन गृहीत्वा ह्यसंबद्धस्य कारणत्वानुपपत्तिर्ज्ञानपूर्वकं कल्प्यमानस्य संबं
धस्य स्वयमनुपपद्यमानत्वेन गृहीतजनकत्वघटितस्य गृहीतुमशक्यत्वात्त
ज्ञाननिष्ठशाब्दधीजनकतायां बोधजनकत्वस्वरूपशक्तेरवच्छेदकत्वासंभ
वात्॥ स्वस्यैव स्वावच्छेदकत्वे आत्माश्रयाच्च न बोधजनकत्वं शक्तिः इंद्रिया
णामिति हरिग्रंथस्य योग्यताकारणतावच्छेदकीभूतो धर्मः इंद्रियत्वशक्त्यादिन
तु जनकत्वमिति न तद्विरोधः॥ एवमीश्वरेच्छापि न शक्तिः॥ अनुपदोक्तयुक्तेः इ
च्छाया हि निष्ठत्वाभावेन संबंधत्वभावात्पदपदार्थसंबंधस्वरूपशक्तिस्वरूपता

भ०सा त्वाभावात्॥ विनिगमनाविरहेतोच्छाबोध्ययोः॥ शक्तित्वकल्पने गौरवाच्च अस्मा
१६४ त्पदादयमर्थो बोद्धव्य इत्याकारक भगवदिच्छायां विषयत्वस्य गंगापदात्तीरबो
164 ध्यस्यापि जायमानत्वेन तत्रापि शक्तिकल्पनसंभवात् लक्षणोच्छेदापत्तेश्चे
ति तस्मात्पदपदार्थयोर्वाच्यवाचकभावव्यवहारनियामकः संबंधः शक्तिः
ल५ पदार्थान्तरमेव सर्वैरभ्युपगन्तव्यमेव धर्मिग्राहकमानात्॥ सा शक्तिस्त्रिधा॥
रूढिर्योगो योगरूढिश्च शास्त्रबोधिता वयवार्थाप्रतीतौ यदर्थनिरूपितं समुदा
यमात्रे बोधकत्वं तत्पदेन तदर्थनिरूपिता रूढिः तया बोधको रूढ इत्युच्यते
यथा मणिनूपुरादौ अवयवार्थमात्रबोधे योगशक्तिः तया बोधको यौगिक साम

इत्युच्यते ॥ यथा पाचकपाठकादौ ॥ अश्वगंधादिपदं औषधिविशेषबोधेरू
ढं वाजिशालाबोधे यौगिकं इदमेव यौगिकरूढमित्युच्यते रूढियोगापहारि
णी तु प्रकरणाद्यभावे बोध्यं यत्रावयवार्थान्वितविशेष्यभूतार्थनिरूपितंस
मुदायबोध्यकत्वं सा योगरूढिः यथा पंकजादिपदे अनया बोध्यको योगरूढ
इत्युच्यते पंकजनिकर्तृपद्ममिति बोध्यात् ॥ एकतरार्थमात्रबोधस्तु लक्षणया भू
मौ पंकजमुत्पन्नं कह्लारकैरवमुखेष्वपि पंकजेष्विति पदे भवति स्पष्टं चेदमाहो
दितिसूत्रे भाष्ये शेषशक्तिर्नानार्थशब्देषु संयोगादिभिर्नियम्यते तदुक्तं ॥ हरिणा
संयोगो विप्रयोगश्च साहचर्यं विरोधिता अर्थः ॥ प्रकरणं लिंगं शब्दस्यान्यस्य

भू॰सा संनिधिः॥सामर्थ्यमौचिती देशः कालो व्यक्तिस्वरादयः॥शब्दार्थस्यानवच्छेदे वि
१६५ शेषस्मृतिहेतव इति एते संयोगादयोनवच्छेदे संदेहे तदपाकरणद्वारा नि
165 र्णयहेतवो भवंतीत्यर्थः॥अत्र सामर्थ्यमेवमुख्यं निर्णायकं संयोगादयस्तदुग्रा
हकाः॥सवत्सा धेनुरवत्सा धेनुरिति संसर्गविप्रयोगयोरुदाहरणे साहचर्यं॥
सादृश्यं सदृशयोरेव प्रायशः॥सहप्रयोगनियमात् रामलक्ष्मणाविसादावुभयो
र्नानार्थयोर्युगपदेव साहचर्यग्रहाधीनतात्पर्यग्रहेण विशेषावगतिरितिना
न्योन्याश्रयः रामार्जुनगतिस्तयोरित्यादौ विरोधेन सा अंजलिनाजुहोतीत्या
दिपदार्थवशादंजलिपदास्यतत्तदाकारांदोते जोवैधृतमिति धृतस्तुतिरू एम

पाद्धिंत्रगादक्ता इ त्यस्य घटसाधनोजनेतास्यमीवगतिः रामोजामदग्न्य इत्या
दौ जामग्न्यपदसंनिधानेनरामपदात्स्यपरशुरामपरता अभिरूपायकन्यादे
येत्यादौ अभिरूपतरायेतिसाम र्थ्यांधत्र भवतेयश्चनिबंपरश्रुनेत्यादावौचि
त्यात्सर श्रुपदस्यछेदनार्थकत्वं भात तत्रपरमेश्वर इत्यत्ररामजधानीरूपदे
शात्सरमेश्वरपदस्यराजपरत्वंचित्रभानुर्भातीत्यत्रचित्रभानुपदंरात्रौवह्ने
र्दिवसूर्य्यस्यवोधकंव्यक्तिलिंगमित्रोभातिमित्रभातिआद्येसूर्य्यः॥अंतेसु
हृतस्थूलपघतीमित्यादौस्वरावहुव्रीहितत्पुरुषयोर्निर्णयः॥आदिनाथत्वसत्व
णत्वनत्वादिसुसिक्ता:॥सुधिक्तप्रणामकप्रगतनामकप्रनायकमित्याद्युदाह

मु॰ सा रणानि शक्तिग्राहकाणि च व्याकरणादीनि तदुक्तं शक्तिग्रहं व्याकरणोपमा
१६६ नकोशाप्तवाक्याद्व्यवहारतश्च वाक्यस्य शेषाद्विवृतेर्वदंति सान्निध्यतः
166 सिद्धपदस्य वृद्धा इति प्रकृतेः ॥ प्रत्ययस्य धात्वादिसमुदितस्यापि शक्तिग्रहो व्या
करणाद्भवति उपमानस्य सादृश्यज्ञानात्मकस्यातिदेशवाक्यार्थस्मरणद्धु
रागवयो गवयपदे पि वाच्य इति शक्तिनिर्णायकत्वं कोशाच्छक्तिग्रहः स्वर
व्ययं स्वरनाकमित्यादौ नाकादेः स्वर्गादौ स्वस्य एव पिकः कोकिल इत्या
प्तवाक्यात्पिकादेः कोकिलादौ शक्तिग्रहः ॥ व्यवहारात् ॥ प्रयोजकवृद्धेन घ राम
टमानयेत्युक्ते प्रयोजकवृद्धेन घटे आनीते तदवधार्य पार्श्वस्थो घटानयना ६६

दिकार्येणापुपोज्यस्यज्ञानमनुनापज्ञानहेतुत्वजिज्ञासायांवाक्यमेवतद्धेतु
त्वेनावध्यारयतितस्याचासंबद्धस्यहेतुत्वानुपपत्त्यार्थेनमाकंपश्चाद्धा॰
क्यस्यसंबंध्यमवध्यारयतिसएवसंबंध्यः॥ शक्तिरित्युच्यतेयद्यपिप्रथमंवा
क्यस्यैववाक्यार्थेसंबंध्यग्रहः॥ तथाप्यावापोद्धपाभ्यांपदस्यतदर्थेपिसंबं
ध्योगृह्यतेपश्चाज्ज्ञातेनापिप्रथमजातस्यवाक्यशक्तिग्रहस्यनवाध्यः॥ अ
शास्त्रीयत्वात्॥ उपजीव्यत्वाच्चवाक्यशेषानुमवमममध्यस्त र्भवतीसत्रय
वपदस्यदीर्घशूकविशिष्टे आर्याणांप्रयोगः॥ कंगौतुम्लेच्छानांप्रयोगात्स्वकश
क्तिरितिसंदेहेयत्रान्याओषध्योम्लायंतेअथैतेमोदमानावोत्तिष्ठंतीतिवा

कशेषाद्दीर्घसूक्तविशिष्टे शक्तिनियतोमः विवरणास्यनूक्तमेवप्रसिद्धपद
सान्निध्यात्तयथाइहसहकार तरौ मधुरं पिकोरौतीत्यादौ प्रसिद्धसहकारा
दिपदसंनिध्यानात्पिकादिपदस्यकोकिलादौ शक्तिग्रहः सर्वेसर्वार्थवाच
काइतितुमोगिरव्याख्यानास्मदूव्योतिसिद्धांतात् ॥ गंगादिपदानांकिशिष्यती
रादौ शक्तिग्राहककोशादेरभावात् ॥ गंगापदंनतीरे शक्तिमितिव्यतिरेक
निश्चयदशायामपितीरादिशाब्दबोधदर्शनाच्छक्यार्थबोधानंतरंभावि
त्वाच्चतीरादिबोधस्यतात्पर्यानुपपत्तिमूलकोलक्षणापिसंबंधोवश्याभ्यु
पेयः साचशक्यसंबंधरूपा गंगायांघोषइत्यादौलक्ष्यतावच्छेदकेपि

लक्षणास्वीकर्तॄणां संयोगसंयुक्तवृत्तित्वरूपसंबंधद्वयरूपा एकेवलक्ष
णा तदस्वीकर्तॄणां तु संयोगरूपैव सा सा द्विविधा गौणी शुद्धा च स्वनिरूपि
तसादृश्यवत्त्वसंबंधेन शक्यसंबंध्यर्थप्रतिपादिका गौणी तदतिरिक्तसंबं
धेन तत्प्रतिपादिका च शुद्धा प्रकारांतरेणापि सा द्विधा ॥ अजहत्स्वार्था ज
हत्स्वार्था च शक्यार्थापरित्यागेनेतरार्थे लक्षणा आद्या तदपरित्यागश्च श
क्यार्थस्य येन केनापि रूपेण लक्ष्यार्थान्वयिनान्वयित्वं तेन छत्रिणो यांति कुं
तान्प्रविशंति काकेभ्यो दधि रक्षतामित्यादीनामपि संग्रहः ॥ एकस्यार्थे वा हि
त्वकुंतवह्निशेषणत्वेन दध्युपघातकत्वेन तेषामपि लक्ष्यार्थान्वयिनान्वयि

मू: सा यित्वात्॥ स्वार्थपरित्यागेनेतरार्थलक्षणमेतत्तस्मिन्सा गङ्गाशक्यार्थस्य तात्प
१६८ र्यविसमीभूतलक्ष्यमात्रव्यक्तिके नापिस्वरूपेण लक्ष्यार्थान्वयिनानन्वयित्वेनि
168 रूढाप्रयोजवंतीलक्षितलक्षणाइत्यादयोभेदाउह्याः कर्मणिकुशलः इत्या
दावाद्यागंगायांघोषइत्यादौशैत्यपावनत्वप्रतीतिवत्वाद्द्वितीयारेफोरौति द्वि
कः॥ कूजतिइत्यादावंसास्वलक्ष्येरेफद्वयघटितपदवाच्यत्वलक्षणामोपस्थि
तेप्राणिविशेषेमधुरास्वकर्तृत्वप्रतीतिः द्विरेफपदोपस्थाप्यापितभ्रमरपदेना
र्थबोध्यइतिनूनसम्यक्॥ प्रत्ययार्थोन्वयासंभवात्॥ तस्याप्रकृतस्यार्थत्वात्॥
गंगायांघोषइत्यादौशैत्यपावनत्वादिप्रतीतिर्यैव्यंजनिकीतिव्यंजनापिद्वि राम

स्त्वं तरं एतस्यासाधकानुदाहरणानि च विस्तरभयान्नोक्तानि ग्रंथांतरादूहि
तव्यानीस्वमतमवलंब्य मूलमवतारयति नन्विति ॥ एवं बोधकत्वस्यैव
शक्तित्वे तत्रापि भाषामामपि इष्टपत्त्यावाह ॥ तथाचेति साधुत्वापीति सा
धुत्वेनापभाषितवैदृत्या स्याविषयत्वे स्यादिति भावः ॥ द्विधेति वक्ष्यमा
णद्वैविध्येन ॥ अनुमायेति संस्कृते सत्यर्थः ॥ अपभ्रंशानां साक्षाद्बोधकत्वं
तु न शाब्दजनकसाधुत्वसमनियतवन्तेरभावादिति भावः ॥ एतन्मते
हेरिसंमतिमाह ॥ उक्तं हीति ॥ अपभ्रंशाः साध्विति साधुविषयकस्मरणे
नेत्यर्थः ॥ तादात्म्यमिति साधुत्वस्य साधारणधर्मप्रकारकज्ञानविषमतां

भ॰ सा चोपगम्यापद्य एववार्थे ॥ यद्वा तादात्म्यं शक्तिरिव शब्दो वास्तवाभावं सूच
१६९ यतीति एवं च शक्तिभ्रमाद्बोध्य इत्यर्थः ॥ अवाचकत्वे युक्तिमाह शिष्टैरिति
169 यतः ॥ शिष्टैः साधुपर्यायेषु तेन परिगणिता आतो न वाचका इत्यर्थः ॥ उक्तम
र्थं प्रकटयति एवं वेत्यादि अव्यक्तमिति ॥ क्रियाविशेषणं तेन साध्यविकृतिभू
तापभ्रंशश्रवणेन व्यक्ते अपभ्रंशप्रकृतिसाधुशब्दस्मृते सतीति शेषः ॥ निर्ण
यः शाब्दबोधो भवतीत्यर्थः ॥ एवमिति ॥ इत्थं चेत्यर्थः ॥ तेनापभ्रंशेन साधु
व्यवहितः साधुस्मृतिद्वारकः कश्चिदेवादिरूपः ॥ अभिधीयते बोध्यते
इत्यर्थः ॥ इदमेव द्रढयितुमाशंकते ॥ नन्विति तेषु भाषाशब्देषु तेषां साधु राम

पर्यायाणां स्व एकत्वात् ॥ एकजातीयत्वात् ॥ तथा एकजातीयत्वेनैव भक्त
त्रापि विनिगमकाभावाच्छक्तिकल्पनास्यादिति भावः ॥ अन्यथा एकजाती
यतीयत्वस्य शक्तिकल्पनायामतंत्रत्वेगणनेति कोशादाविसर्पेः ॥ एतेनै
वेति ॥ तेसाध्विति हरिगंधेने सर्पेः ॥ तत्र पूर्वोक्तासंभवं दर्शयति ॥ अयं भा
व ॥ इत्यादिनाज्ञान् साधुशब्दान् ततोपभ्रंशात् चेद्यावो ध्यानुमानादि
म सर्पेः ॥ तेषां पर्याणां तथा चानधीतशास्त्राणां साधुत्वविशिष्टशब्दज्ञाना
भावेन साधुशब्दस्मरणे न संभवतीति भावः ॥ तेषां साधुशब्दस्मरणं भव
तीति तदा प्रकल्पने भवति यदि साधुशब्दाद्बोधोदयः स्यात्सा एव तु न

श्री

भू॰ सा भवतीत्याह॥ साध्योरितिशक्तिभ्रमादिति॥ साधुशब्दनिष्ठाया: शक्तेरपभ्रंशे
१७० भ्रमइत्यर्थः बोधकतारूपायाइश्वरेच्छारूपायावाशक्तेर्भ्रमोत्रनसंभवतीत्या
170 हबोधकत्वेस्येति॥ भ्रमत्वेविषयवाध्यास्यैवतत्रत्वेनबोधकत्वइश्वरेच्छावि
षयत्वयोवस्तुनोरवाध्याभ्रमत्वकल्पनमाग्रहप्रदर्शकमिति भावः न
नुवाचकत्वग्रहाराभावेनापभ्रंशस्यतद्धाव्यत्तेश्वरेच्छैवशक्तिएवंचतस्या
भ्रमः संभवत्येवेत्यतआहशक्तेरिति॥ तत्पदविशेष्यकतदर्थबोधजनक
त्वप्रकारकेच्छायास्तत्पदविशेष्यकत्वेनगृहीतायाः॥ पदांतरविशेष्यक
त्वासंभवेनभ्रमासंभवादित्यर्थः॥ यदितुअशक्त्याकेनचिअत्रमुक्तेवं राम
१७०

चेसादाविव घट इति साधुस्मरणात्प्रमोऽपस्य बोधे तत्र स्यस्य गगरीशब्दादे
वास्य बोध इति भ्रमेणाद्यस्य साधुशब्दमजानतः॥ पमारस्य शक्तिभ्रमस्तन्मूल
श्चान्येषामपि भ्रमस्ततः॥ शाब्दबोधः संभवतीत्युच्यते तदापि प्रत्यकं तत्तत्संस्कृ
तस्य तत्तदपभ्रंशे न विनिगमनाविरहादपभ्रंशेषु शक्तिः सिद्ध्यति न च सकल
देशशिष्टपरिगृहीतत्वं विनिगमकं शवतिर्गतिकर्मा कंबोजेष्वेव विकार एन
मार्या भाषंत इत्यादि भाष्योक्तरीत्या तत्तद्देशनियतत्वस्य संस्कृतेष्वपि सत्वा
त्॥ वाचकस्य वाचकत्वे आलंकारिकैः प्राकृतोदाहरणस्यासंगत्यापत्तेः
श्च अत एव शिष्टानामपि भाषणात्॥ प्रवृत्तिनिवृत्ती दृश्येते अस्मिन्पक्षे हरि

श्री

संमतिं दर्शयति ॥ उक्तं चेति पारंपर्य्यमिति ॥ स्वार्थेष्वत्र विगुणेषु गुणरहितेषु क
रणापाटवादिरूपदोषविशिष्टेषु तथा च विगुणेष्वभिधातृषु सत्सु परंपरमा
येव्यर्थेषु प्रसिद्धिमागतादित्यर्थः ॥ दैवी संस्कृतरूपा अशक्तैः करणापाटवदो
षवद्भिः व्यवहृतिकीर्णा उच्छिन्नानुपूर्विकाकृतेत्यर्थः ॥ अनित्यदर्शिनां
शब्दनित्यत्ववादिनां अस्मिन्वादे शक्तिविचार इत्यर्थः ॥ अवोधक इति व्यव
हितः साधुर्न तत्र वोधकः किंतु साक्षादपभ्रंश एव तत्र वोधकाद् इति भा
वः ॥ ननु युक्तिबलात्सिद्धांतव्यवस्थितौ कस्मिंचिदुक्तिर्वोधिकात ॥ किंच
हर्युक्तं पूर्वं स्थितमेव सत्युक्तिकं तदनुवोधेनेवोक्तं स्थितमपि व्याख्येयमत

आह ॥ किंचेति माहाराष्ट्रेति मध्यदेशीयभाषायाइत्यर्थः ॥ अवच्छेदिकेति ॥ श
क्ततावच्छेदिकेत्यर्थः ॥ पर्यायापभ्रंशयोः ॥ उपसंहरति तथाचेति तेषामिति ॥ अ
पभ्रंशानामित्यर्थः ॥ स्यादिति शक्तिमत्वस्यैव साध्यत्वादिति भावः ॥ निषेध्य इति
नापभाषितव्वै नम्लेछितवैइत्यादि निषेध्यविधिरित्यर्थः ॥ योग्यत्वमिति ॥ ज
नकतावच्छेदकधर्मो वत्वं तत्र संस्कृतशब्दे तत्र प्रमाणं एकः शब्दः सम्यग्
ज्ञातः ॥ सुप्रयुक्त इति यस्य शाब्दे भाष्यकृत्प्रदर्शितश्रुतिरेव तथा हेलमो हेल
यो हेलय इति श्रुतिश्चेति भावः ॥ तज्ज्ञापकं चेति ॥ तद्द्योतकमित्यर्थः ॥ आदि
पदाच्छिष्टप्रयुक्तत्वस्य संग्रहः ॥ एवमेवेति ॥ तत्तदर्थपुरस्कारेण तत्तच्छब्दानां

म॰ सा
१७२
172

श्री

साधुत्वलाभेनैत्यर्थः॥ फलाजनकत्ववदिति॥ अधिकारक्षत्रियस्यैवफलश्र
वणादितिभावः साधुत्वमितिगवादिशब्दानांगोत्वजात्याक्रांतप्रतिपादनेए
वसाधुत्वमित्यर्थः॥ ननुदेवदत्तादिशब्दानामाधुनिकपिंडाद्युद्देशेनशास्त्रेप्र
तिपादनान्तेषांतत्रसाधुतानस्यादत आह आधुनिकेति॥ भाष्यतीति यस्यशा
स्यभाष्यसंमतगृह्यस्त्रस्येत्यर्थः कृदघटितशिक्षासंगृहीतदेशभाषानुसा
रेणव्यवहारार्थंकृत्रिमनामानांनाम्नांतुशास्त्राव्युत्पन्नत्वादसाधुत्वमेवगौणा
नांशुक्लादीनांगुणप्रवृत्तिनिमित्तकानांगुणोव्युत्पादनात् गुणप्रकारेणबो
धनेगुणवचनेभ्योमतुबोलुविशष्टइतिशास्त्रेणबोधनादित्यर्थः॥ आधुनेके

नाम
१७२

ति॥ शिष्टासंमतेर्थे प्रयुक्तानां संस्कृतशब्दानामप्यसाधुत्वमेवेत्यर्थः॥ अति
रिक्तेति॥ पित्रादिसंकेतज्ञानातिरिक्ते इत्यर्थः॥ उपायेव्यवहाररूपं तथाच
ये॥ पित्रादिसंकेतेनागृहीतस्तेषामपि व्यवहाराच्छक्तिग्रहः॥ सुसाध्य इति
भावः॥ विषयपदाध्याहारेणाव्याचष्टे॥ संबंधोपि विषयइति॥ तथाचाय
मेतत्संबंधीति व्यवहारे संबंधो विषयः॥ इदमत्र योग्यमिति॥ योग्यमिति यो
ग्यताव्यवहारे योग्यता विषयोतोतः सममान्नव्यवहाराद्योग्यताभावोध्यक
तारूपशक्तेः॥ संवित् ज्ञानं भवतीत्यर्थः॥ तत्रदृष्टांतो माता-पुत्रादियोग्यव
दितियथायमेतत्संबंधीति व्यवहारस्तयोर्जन्यजनकभावनिश्चायकस्त

नञ्

द्वित्यर्थः॥ ॥इति भूषणसारविवृतौ शक्तिस्वरूपनिरूपणं॥ [illegible] समासे प्रत्येक
शक्तिस[illegible]ह कृतसमुदायशक्तिस्वरूपैकार्थीभावोंगीकृतः॥ स च नञ्समासेन
घटते नोपसर्गनिपातयोः॥ तयोरर्थाभिधाने हि व्यापारो नैव विद्यते इति व
चनान्नञो नर्थकत्वात्॥ किंचाब्राह्मणादावौत्सर्गिकमुत्तरपदार्थ
प्राधान्यं च न स्वरसतः॥ संगच्छत इत्याशंक्य समाधत्ते नञर्थनिरूपणमित्या
ह॥ नञर्थमिति॥ अत एवेति॥ प्राधान्यानुरोधादेवेत्यर्थः॥ अस्मिन्नेवार्थे ना
नार्थमाह॥ अभावइति॥ अन्यथा आरोपितार्थत्वानभ्युपगमे॥ सा सर्वनाम
संज्ञा न स्यादिति॥ नञो भेदार्थकत्वे सर्वादेर्भेदप्रतियोगित्वेनान्वयाद्भेद

प्रत्युपसर्जनत्वादुपसर्जनानामपि सर्वे वत्सर्वे नामसंज्ञा । प्रवृत्तेरिति
भावः ॥ ननु भेदप्रतियोगी सर्व इति बोध्याभ्युपगमादुत्तरपदार्थप्राधान्य
स्य न हानिरत आह ॥ घटो नास्तीत्यादाविति तस्य न ॥ नर्थस्य नञर्थो भा
वस्य समभिव्याहृतपदार्थापेक्षयाविशेष्यतयैव भानं दृष्टचरमिति भा
वः ॥ ननु अघटः पट इत्यतो घटभिन्नः पट इति सर्वजनानुभवसिद्धबो
धानुपपत्तिः आरोपितो घट इत्यर्थः ॥ स्यैवत्वयांगीकारादित्यत ॥ आहास्म
द्रीत्येमतः ॥ घटभिन्नइत्याकारको बोधः ॥ अर्थादस्मान्मतसिद्धबोधविष
यात् ॥ आगतः ॥ तद्भिन्न एव तदारोपदर्शनाद्भेदस्य विषयत्वं आयाती

न्या०न्तू

न्यु॰ सा
१७४
174

ति भावः ॥ तयाश्चेति ॥ आरोपितः सर्व इति बोध्यस्वीकारादेवेत्यर्थः अत्रचे
ति आरोपितत्वं नञ द्योत्यमिति पक्षे चेत्यर्थः ॥ निष्कर्ष इति लाघवादारोप
मात्रं नञर्थो विषमत्वं संसर्ग इति भावः ॥ आरोपस्यवाच्यत्वे मूल विरोधो
त आह द्योत्यतोक्तिरिति वाच्यद्योत्ययोः पक्षयोर्नाग्रहः ॥ परंतु तस्य वि
शेषणतैवेति सूचयितुं तथोक्तिरिति भावः ॥ षष्ठो नास्तीति ॥ इदं दृष्टांता
र्थं मूले समासघटकेन नञ एवारोपार्थकत्वकथनात् सर्वनाम्नो वुद्धि
स्यपरामर्शो बुध्याविभागं परिकल्प्य नञ द्योत्यमित्यत्र त्यनञो तदापरा
मर्श इत्याह तदर्थ इति पक्षमोरिति ॥ तत्रसतिसंभवे वाच्य लमेवान्य

राम
१७४

त्रान्यदितियथाप्रयोगं व्यवस्थेति भावः ॥ भाष्यस्वविग्रहं दर्शयति निवृत्तमि
ति निवृत्तः पादार्थो यस्येति कुतोनोक्तमित्यत आह ॥ नपुंसकेति ॥ पदार्थो मुख्यो
पदार्थो ब्राह्मणत्वादिर्यस्मिन् क्षत्रियादौ इत्यर्थः ॥ आरोपे कारणमाह सदृशेति ॥ त
स्मादेतद्भावादध्यारोप एव नञर्थे इत्यायातीति भावः दूषयति तन्नेति ॥ नञ्वाच्य
त्वादिति लाघवान्नञो भावार्थकत्वं तत्रापि समर्थसमासस्थले प्रतियोग्यनुयो
गिवाचकपदयोः ॥ समानविभक्तिकत्वस्थले च भेदार्थकत्वमन्यत्र संसर्गावच्छि
न्ना भावार्थकत्वमिति विवेकः ॥ आरोपादयस्तु स्थलविशेषे भासमाना आर्थि
कार्था ॥ एवं नञ्वाच्या इति भावः ॥ अंशेति ॥ आरोपितत्वस्य नञ्वाच्यत्वाभ्युप

गम

भ॰सा
१७५
175

गमेरित्यर्थः ॥ सादृश्यादेरित्यादिना पठिष्यमाणे ॥ अल्पत्वादिसंग्रहः ॥ अब्राह्मणइत्या
देर्ब्राह्मणसदृशाः ॥ पापाभावः ॥ आश्वभिन्नोल्पोदरा गवाश्वेतरपशवोऽप्रशस्ताः ॥
गवाश्वौ प्रशस्ततरौ धर्मविरुद्ध इत्याद्यर्थक्रमेण ज्ञातव्याः ॥ ननु सादृश्यादेरवाच्य
त्वे कथं तेषां ततो बोध्योऽत आह तन्त्विति ॥ भेदप्रतियोगिब्राह्मणो ब्राह्मणभिन्नो
वेति बोध्यानन्तरं भाविमानसबोधविषयत्वमभिप्रेत इत्यर्थः ॥ अब्राह्मणो ब्राह्मण
शब्दः प्रयुज्यमानो मुख्यार्थबाधाल्लक्षणया तत्र ॥ सदृशं गमयति ब्राह्मणभिन्नेक्ष
त्रियादावब्राह्मणशब्दस्तु प्रयुज्यमानो बाधाभावात् स्वेन भिन्नं प्रत्याययति ॥ ननु तत्र
सदृशमिति सादृश्यबोध्यानन्तरभाविमानस एवेति भावः ॥ वस्तुतो लक्षणायेव तद्बो रा॰म १७५

धस्तात्पर्यानुपपत्तेरेवलक्षणाबीजत्वादिति ध्येयं ॥ प्रतियोगिनीति ॥ तथाच ब्रा
ह्मण इत्यादि: भेदविशिष्टो ब्राह्मण इत्याकारको बोध इति भाव: उत्तरपदार्थ
स्य विशेष्यत्वे सोपपत्तिकं फलमाह ॥ तथाचेति ॥ सर्वनामसंज्ञेति ॥ अस्योपपद्य
ते इत्यनेनान्वय: एवमग्रेतन प्रथमांतत्रमस्यापि एकपदार्थप्राधान्यादिति ॥
अनेकमित्यस्य एकभिन्नमिति बोध्य एकभिन्नत्वस्य द्वयोर्बहूनां वा सत्वाद्द्विव॰
चनमेव स्यान्नत्वेकवचनमिति भाव: ॥ पुरुषवचनादीति ॥ प्रथमपुरुषा[illegible]मेक
वचनादि व्यवस्थेत्यर्थ: ॥ अस्मुवां भवथ उत्पादो युष्मदर्थो भावविशेष्यकबोधो
पगमे भावनान्वयिनि भेदे द्वित्वादेरयोग्यतया द्विवचनाद्यनुपपत्तिमिति भाव:

भू॰ सा
१७६
176

ग्रंथ

अन्यथेति ॥ नञर्थाभावस्य विशेष्यत्वेनस्यादितिनञ्समासस्थलेप्रथमपुरु॰

षएवस्यादित्यर्थः ॥ सामानाधीति ॥ एवंचोक्तव्यवस्थासुलभेतिभावः ॥ ननुघटत्ता

दात्म्यप्रकारकबुद्धिंप्रतिअघटःपठः इतिवाक्यज ॰ न्यशाब्दस्यप्रतिबंधकत्वंस

र्वानुभवसिद्धंननिर्वहत्युत्तरपदार्थविशेष्यकत्वोपस्थीकरणंग्राह्यभावाना

वगाहित्वादित्यत आह विशेष्योवेति ॥ पूर्वपदार्थप्राधान्येपूर्वोक्तदूषण

गणंपरिहरति ॥ अयंभावइति ॥ गौणत्वेपिएतत्पदार्थस्यनञर्थभेदविशेषण

त्वेपीत्यर्थः ज्ञापकादेतत्सूत्रस्यानञ्समासग्रहणाज्ज्ञापकादित्यर्थः ॥ तदेवश

पंचमति ॥ अमः शिवइति ॥ असर्वनाम्नोरेतत्तदोः ॥ सुलोपेफलाभावादकी

राम
१७६

रिस्यकजर्हमोरेवसुलोपविधानाच्चनञ्समासेसर्वनामत्वाभावादेवसुलोपाभा
वेसिद्धे अनञ्समासग्रहणंव्यर्थीभूयमत्वापद्यतिनञ्समासेपूर्वपदार्थप्राधान्येपिस
र्वनामसंज्ञाभवतीतिविशेष्याऽनुरोधादितिविशेषवचनाभावेविशेष्यानुसा
रिवचनत्वमेवविशेषणस्येतिनियमादित्यर्थः॥ ननूक्तनियमेप्रमाणाभावोत
आह॥ किंचेति॥ जात्यभिप्रायमैकैकवचनस्याव्यवर्तकत्वेननैरर्थक्यमेवेत्य
तआह॥ औत्सर्गिकंचेति॥ अपदंनप्रयुंजीतेत्यनुरोधात्सूत्रेभेन्त्काप्रकृत्य
र्थगतैकत्वाविवक्षायामपिविधीयतइतिभावः क्वचिदेकवचनंसाभिप्रा
यकमित्याह॥ प्रत्येकमिति॥ एकभिन्नानांयोषानांप्रत्येकंसेवनान्वयसम्भवा

भ: सा वस्सूत्रनाम्येसर्थः॥उपसंहरन्तिनत्विति॥आत्तएवेति॥पूर्वपदार्थप्राधान्यस्वी
१७७ कारादेवेसर्थाः॥सूपपादमिति॥उत्तरपदार्थप्राधान्यस्वीकारेलेतत्प्रयोगानुप
177 त्तिरेवएकशेषाश्रमणेनसमर्थनंतुमत्वांगतोनाश्रमणीयं॥किंचैवंरीत्यास
मर्थनेएकादिशब्दादपिद्विवचनाद्यापत्तिरितिभावः॥किंचानन्तसमासग्र
हणंसामान्यपेक्षज्ञापकंपूर्वपदार्थप्राधान्येप्युत्तरपदार्थप्राधान्यप्रयुक्तका
र्यभवनस्यतेनानेकमित्यादिसिद्धज्ञापकसिद्धस्यासार्वत्रिकत्वादनेकेद्व
पिसिद्धं॥अत्वंभवसीत्यादाविति॥आंस्त्रिनानहंभवामीत्यादिसंग्रहायुष्म
दइतिरूद्रमस्मदोप्युपलक्षणं पर्युदासार्थेकनञ्घटितवाक्यार्थेविचारं राम १७७

क्तत्वात्प्रसज्यप्रतिषेधार्थं नञ्घटितवाक्यापर्थमाह एवमिति॥ युष्मदर्थो

भावबोध्यने तु मध्यमपुरुषानुपपत्तिरिति सूचयितुं मध्यमपुरुषपर्यंतानुध्या

वने॥ अभावत्वविशेष्यकबोध्ये हेतुमाह॥ समस्तेति॥ एतत्प्रपंचः पूर्वोक्तो वे

दितव्यः॥ नन्वभावस्यैकेन रूपेण नञ्शक्यता न तावदभावत्वेन चैत्रो न

पचतीत्यादावपि भेदबोधापत्तेः॥ नापि प्रसज्यप्रतिषेध्यत्वेन घटः पटो ने

त्यादावपि तद्बोधापत्तेः॥ तथापर्युदासत्वेनापि न सर्वत्रैव भेदबोधापत्तेः

एतद्धर्ममजानतामप्यभावत्वेन बोधोदयाच्चेत्यत आह॥ एचेति॥ अभाव।

श्चेत्यर्थः॥ तादात्म्यातिरिक्तसंबंधावच्छिन्नाभाव— मत्सत्ताभावत्वे तादात्म्य

त्म्यसंबंधावच्छिन्नप्रतियोगिताकाभावत्वमन्योन्याभावात्वं अनुयोगिता

भू० सा
१७८
178

विशेषो वा अखंडोपाधिर्वेति मतेऽपि परिचायकमिदमेवेति बोध्यं नञसमा-
भिव्याहारे ॥ प्रतियोग्यनुयोगिनोराध्याराधेयभावाद्यवगाहिप्रतीतिजनक-
त्वं यत्र तत्र नञोऽत्यंताभावार्थकत्वं यत्र च नञसमभिव्याहारे ॥ प्रतियोग्यनु-
योगिनोस्तादात्म्यसंभावनात्तत्रान्योन्याभाववाचकत्वेन नञरत्वादिकं वि-
स्तरेणान्यत्र निरूपितं तदेतदाहान्यत्र विस्तरेति ॥ इति भूषणसारविव-
तौ नञर्थनिर्णयः ॥ चत्वारि पदजातानि तत्र सुबंततिङंतार्थौ निरूप्य प्रसंगा-
दुपसर्गनिपातार्थनिरूपणमित्याशयवान्मूलमवतारयति ॥ प्रादयो द्योतका
इति व्यंजनया अर्थबोधकाः द्योतकतारूपविलक्षणशक्तिमंतो वेत्य-
र्थः ॥ अत एव प्राद्यर्थस्य प्रकर्षादेर्नं विशेष्यतेति भावः ॥ कारिकोक्त हेत्व

पेक्षयाहेतुत्वं तत्र परामर्शकोपि यच्छब्द इत्याह ॥ अथोभावइत्यादिननोप
सर्गोर्थ इति ॥ न तस्य भोगघटकोऽ पसर्गमात्र शक्यार्थः नन्वनुभाव्यार्थ
कत्वेपितस्य फलस्थानीयत्वे धात्वोऽर्थव्यापारवाचित्वान्नोक्तदोषइ
त्यतनुगच्छतीत्यादाविति ॥ अत्राप्यनोरनुभवार्थकत्वे तदनुबोधे
नसंयोगानव[illegible]व्यापारस्यैवध्यात्वर्थत्वमातत्वाप्रतीतिर्दुर्वारा
स्यादित्यर्थः ॥ गौरवादिति ॥ शक्ततावच्छेदकगौरवादित्यर्थः ॥ तथाचेति
विशिष्टस्य गौरवादशक्तत्वाच्चोपसर्गमात्रस्याप्रकृतित्वाच्च धातुमात्रस्यानु
भवादेर्लक्षणेति भावः ॥ विद्यमानत्वादि सत्त्वादि आदिपदादुत्पत्त्यादिप

रिग्रहः॥इदं चलक्षणोपपत्तये॥उक्तं नन्वन्याद्युपसर्गं विनापि धातुमात्रादनुभवा
दिप्रतीतिः स्यादत आह॥उपसर्गइति॥ननु तथाप्युपसर्गाणां द्योतकतापूर्वा
द्योगत एवेत्यत आह तथा चेति॥एवेन व्यंजनावलादिनिवृत्तिः॥अनु
भवादिफलेपि धातोस्तात्पर्यमित्यस्योपसर्गसमभिव्याहारो नियामक इति
ति भावः॥तच्चेति॥उक्तं द्योतकत्वमित्यर्थः॥उपासनाफलस्यानीयास्यार्थेति धा
त्वर्थेत्यर्थः॥सकर्मकत्वस्येत्यस्य अनापत्तेरित्यनेनान्वयः॥मास्तु सकर्मकत्वम
त आह॥तत्रइति॥उपोपसर्गविशिष्टदासधातोरित्यर्थः॥तथा चैतत्स्वयोगानु
पपत्तिरिति भावः॥अंगतमिति आगमनकर्तृबोधकं धातोरुरुपासनारूप

फलविशिष्टव्यापारवाचकत्वे उपोपसर्गसमभिव्याहारो नियामक इति भावः
तदिति द्योतकत्वमित्यर्थः ॥ तत्तदर्थेति ॥ प्रत्यक्षादिफलविशिष्टव्यापारेत्यर्थः
तत्तदर्थवाचकत्वं प्रत्यक्षादिविशिष्टव्यापारबोधकत्वे ॥ अभीघांचादिनिपा
तानां ॥ अस्मैवेति कृधातोः सकर्मकत्वानुपपत्त्यान साक्षात्कारेलक्षणाद
म इति भावः ॥ एष्विति ॥ साक्षात्काराद्यर्थेष्वित्यर्थः ॥ अन्यथेति ॥ कस्मिंश्चिदर्थे सक
र्मकत्वदर्शनात्सर्वत्रैव सकर्मकत्वांगीकारे इत्यर्थः ॥ विकुरुते इति ॥ विका
रानुकूलव्यापारवाचकस्यापि कृधातोः ॥ सकर्मकत्वे इकर्मकाच्चेति विहित
तङनुपपत्तिरिति भावः ॥ उपाद्युपसर्गनिपातानामुपासनाद्यर्थकत्वेपि पूर्वो

भू॰सा क्तसकर्मकत्वानुपपत्तिरूपं दूषणं परिहरति ॥ अथेति नेदमिति ॥ सकर्मकत्वानुप
१८० पत्तिरूपं दूषणमित्यर्थः ॥ साध्यकं द्योतकत्वसाध्यकं व्युत्पत्तो अव्ययातिरिक्त
180 त्वविशेषणं घटो नेत्याद्यनुरोधेनावश्यकमिति नोक्तापत्तिरत आह ॥ किं चे
ति ॥ ननु निपातानामुपसर्गाणां चार्थस्य परविशेषणतयैव बोध्यत्वस्य व्युत्पत्ति
सिद्धतया विशेषणान्वयप्रसंगाभावेनोभयत्रैवोक्तापत्तिवारणसंभवात्तस्य
पि वाचकत्वेन दोषो त आहापि चेति ॥ न च निपातानामर्थवत्त्वे चार्थे द्वंद्व इति
सूत्रं प्रमाणमस्ति प्रादीनामर्थवाचकत्वे तु न किंचित्तदस्तीति चेदुपसर्गा शेपी
षदुःसुषुद्रुद्धेति सूत्रमेव मानमिति विभावय षष्ठ्यादिकमिति ॥ भेदसंबंधी साम
१८०

नप्रातिपदिकार्थप्रकारकशाब्दं प्रति विभक्तिजन्योपस्थितेर्हेतुतयापृथक्तेतत्
द्भावेन भेदान्वयासंभवइत्यर्थः॥ अन्यथाउक्तकार्यकारणभावानभ्युप
गमे॥ आपत्तेरिति॥ भेदेनान्वयस्य बोध्यापत्तेरित्यर्थः॥ आदीतीति भेदान्वयसंग्राह
कमादिपदमित्यर्थः॥ निपातेतिरिक्तेति॥ तथा च निपातार्थसमुच्चयादिभिर्न
पदार्थान्तरस्य भेदान्वयानुपपत्तिरित्यर्थः॥ सदृशप्रयोजकधर्ममाह॥ समाना
र्थानीति तथा च समानविभक्तिकपदोपस्थाप्यत्वेन सादृश्यस्य विवक्षणान्न वि
रुद्धविभक्तिकार्थस्याभेदान्वयापत्तिरिति भावः॥ स्तोकं पचतीत्यात्मनेन च नवा
नित्यादावसादृशेऽप्यभेदान्वयादाहासमानाधिकरणेनेति विशेष्यवाच

न्य०भा कपदप्रकृतिकविभक्तिविरुद्धार्थकविभक्तिप्रकृत्यर्थेनेत्यर्थः॥ मूलाभिप्रा
१८१ यमाहायमर्थ॥ इतिसमानाधिकरणेतिविभिन्नशब्दप्रवृत्तिनिमित्ताश्रयसमा-
181 मानविभक्तिकपदजन्यप्रतीतिविशेष्ययोरित्यर्थः॥ ननुनिपातार्थान्वयानु
पपत्तिरेवमाना।मतआह॥ गौरवमिति॥ ननुत्वन्मतेपीदंसमानमतआह॥ स्मा
कमिति॥ द्योतकतावादिनामित्यर्थः॥ नास्तीतीतिसमुच्चयादेः समभिव्याहृत
पदलक्षणयैवलाभान्तस्यपृथगुपस्थित्यभावेनान्वयस्यैवाभावाद्युत्पत्ते।
श्चपृथगुपस्थितिविषयत्वाद्यभिचाराभावेननिपातेनिष्पार्थेदेतिविशेषणप्र
वेशोनेतिभावः॥ अतएवेति॥ निपातातिरिक्तविशेषणाप्रवेशादेवेत्यर्थः॥ नाम

१८१

लाक्षणिकमिति ॥ व्युत्पत्तौ निपातातिमिक्त विशेषणासत्वेनुलक्षणानुसरणेव्यर्थ
मेवस्यादिति भावः ॥ ४२ व्युत्पत्तौ निपातातिमिक्तत्वदानेपि स्थलांतरे तन्मते दूष
णमित्याशये ॥ नमूलमवतारयति ॥ अपिन्चेति ॥ इत्यर्थः ॥ इतिसर्वसंमतइति शेषः ॥
अयमिति ॥ एषवोध्यइत्यर्थः ॥ अन्वयेति ॥ वाचकत्वाभ्युपगमे इत्यर्थः ॥ व्युत्पत्ति
विरोधंप्रकटयति ॥ तथाहीति ॥ अनेनेति ॥ उपपदोत्तरतत्तीयमानानुत्तर्हि इवशा
ब्दोत्तरलुप्तानुसंधितत्तीयार्थकरणे एवं चशब्दार्थसदृशान्वयः ॥ सुलभोत्त
आह इवशब्दस्येति ॥ असत्वार्थकतयेति लिंगसंगसंख्यानन्वयार्थकतयेत्य
र्थः ॥ एवं चद्रव्यवाचकादेवसाकांक्षितत्वात् कारकविभक्त्युत्पत्तेरितोनत

भू.सा तीयेति भावः॥ ननु शब्दाभेदान्वयिनः सदृशास्याविशनवद्व्यन्तया तदर्थके च श
१८२ ब्दात्तृतीयोत्पत्तिर्न दुर्लभेत्यत आह सं भवेच्चेति वाकारोऽलीकत्वद्योतनार्थः॥ नुष
182 नु दुर्जनन्यायेनाह॥ उक्तेति॥ अनन्वयेति॥ इदमुपलक्षणं तृतीयानुत्पत्तेरपि द्योत
कतावादिमते उक्तपदस्य उक्तस्वसदृशाप्रतयोगित्वाशक्यसामानाधिकरण्यात्तृतीयोपप
त्तिरिति भावः॥ सुब्धातिरिक्तप्रत्ययश्रवणस्यापाद्यत्वासंभवेन समुच्चयासंभव
माशंक्य चकारस्यान्यत्रापकर्षं दर्शयत्याह॥ श्रवणं चेति॥ चकारसमुच्चेयं दर्शयम
ति॥ चकारेति॥ अनन्वयं स्पष्टयति॥ उक्तसादृशीत्यादि। एतेषां त्रयाणां नामार्थ
तया भेदेन नान्वयोऽप्यभेदेनाभिन्नेऽसादृश्यस्यैवाभावात् सादृश्यस्य भेदघ नाम
१८२

रितत्वादिति भावः॥ एवच्वइति॥ केनापीति शेषः॥ प्राधान्याभावादिति॥ प्राधान्यस्य
विशेष्यत्वस्य प्रकारतानिरूपितत्वादिति भावः॥ द्योत्यमर्थमिति॥ व्यंजनावृत्त्यु
पस्थापितार्थमित्यर्थः॥ तमेवेति॥ द्योत्यमेवेत्यर्थः॥ अर्थवत्वादिति॥ अर्थव
त्सूत्रेर्थवत्वें वृत्तिमत्वं व्यंजनारूपवृत्तेश्च द्योतकेपि सत्वान्न प्रातिपदिक
त्वानुपपत्तिरिति भावः॥ ननु द्योतकत्वेन व्यंजनारूपवृत्तिमत्वं किंतु समभि
व्याहृतपदेन विशेष्यार्थबोधने तात्पर्यग्राहकत्वमेवेत्यत आह व॥ वस्तुतस्त्वि
ति॥ ज्ञापकादिति निपातानामनर्थकत्वादेव तदुत्तरस्सुबश्रवणाद्यर्थं सद्
ग्रहणं सुबुत्पत्तिज्ञापकमिति भावः॥ ननु अव्ययादाप्सुप इति वचनं स्वरादि

मू.सा
१८३
183

विहितसुब्लुग्विधानेनच्चनितार्थमतोनज्ञापकमत आह निपातस्येतिनतु हि ज्ञापि
कप्रत्याख्यानेलाहक्कन्तह्वितेति॥उपसंहरतितस्मादितिद्योतकत्वैचमीमांसका
नामपिसंमतमित्याह॥उक्तं चेति॥चतुर्विध्यइति नामाख्यातोपसर्गनिपातभे
देनप्रकारचतुष्टयसंपन्नेपदेसुप्तिङंतरूपेद्विविधस्य॥नामाख्यातरूपस्यते
तुमाहसंशयोत्पत्तेरिति॥जात्यादिषुकोनामार्थः॥व्यापारफलयोर्मध्येकोऽख्याता
र्थइतिसंदेहोविचारः॥सार्थकइतिभावः॥तयो॥उपसर्गनिपातयोः व्यापा
रोवक्ष्याख्याः॥तौउपसर्गनिपातौयम दर्थद्योतकोयदर्थतात्पर्यग्राहकोसना
माख्यातरूपः॥सप्रत्यययोर्नामाख्यातयोरर्थोविचार्यतत्दर्थः॥लिंगसंख्या नाम १८३

न्वयपर्थे ॥ प्रतिपादकत्वं नामत्वं नामत्वमित्यभिप्रायेणोपसर्गनिपातयोः ॥
पृथग्वचनं ॥ उपसर्गाणां निपातत्वेपि पृथग्युक्तिः गोबलीवर्दन्यायेनेति बो
ध्यं ननूपसर्गेणप्राप्तार्थ इति वचनेनोपसर्गाणां पृथक्करणादुपसर्गाणामेव
वद्योतकत्वं समायाति न चादीनामित्यत आह ॥ उपसर्गेनेतिपदांतरेति ॥ शत्रे
स्त्रैरित्यादौ उस्रादिनामोपलक्षकमित्यर्थः एवं च नतहलाद्यादीनां वाच
कत्वमिति ॥ न्नमितत्वमिति भावः ॥ वाचकतापक्षं समर्थयति ॥ नन्विति ॥ अन्व
यव्यतिरेकाभ्यामिति ॥ चादिनिपातसत्वे समुच्चयाद्यर्थप्रतीतिस्तदभावे नेति गवा
दिवन्निपातानां वाचकत्वमेवोचितमिति भावः ॥ नन्विधादिरूपशक्तेस्तत्र

भू॰सा सत्वेन प्रमाणमत आह ॥ वोध्यकतेति ॥ तथा च तेषामपि घटादिवत्सार्थवाच
१८५ कत्वाद्धक्तिरस्त्येवेति भावः ॥ नन्वन्वयव्यतिरेकयोर्न तदर्थवाचकत्वनिर्णा
185 यकत्वं एवं सति द्योतकतायां एवं विलोपप्रसंगात्किंतु तदर्थग्रहतात्पर्यग्रा
हकत्वमेवेत्यत आह ॥ किंचेति ॥ उक्तरीत्येति ॥ प्रजयतीत्यादौ धातोरेव लक्ष
णया प्रकृष्टजयबोधकत्वं प्रादीनां तु तात्पर्यग्राहकत्वमिति रीत्येत्यर्थः ॥
॥ तिङादेः स्यादिति ॥ तत्रान्वयव्यतिरेकादिना तिङादेः कर्त्रादिवाचकत्वे
तु किमपराद्धं चादिभिरिति भावः ॥ दिसस्त्वेदिति पाठान्तरं ॥ नवीनास्तु किंचे राम
ति ॥ ग्रन्थेनोक्तामापत्तिमिष्टापत्त्यापरिहरंति परं तु व्यतिसेद इत्यादौ धातुस्य १८५

लेख्यभिन्त्वासादेवं वक्तुमशक्यमिति प्रतिभाति॥ ननु पातानां वाचकत्वे घट
दौ न पटइत्यादौ नञर्थस्य प्रतियोगितानुयोगितासंबन्धेन घटपटादावभावा
द्यन्वयबोधानुपपत्तिः॥ नामार्थयोर्भेदसंबन्धेनान्वयबोधस्याव्युत्पत्तेर
न्यथास्नानं देवदत्तइत्यस्यापि स्नानवान्देवदत्तइत्यर्थे साधुतास्यादित्य
त आह॥ नामार्थयोरितितथेतिनिपातातिरि॥ क्तविषयकमेवेत्यर्थः॥ व्यर्थमि
ति॥ सर्वेषां वाचकत्ववार्तिकेन प्रातिपदि॰ कसंज्ञाविधानेव्यर्थं सू
त्रे तेनैव सिद्धेः॥ सर्वेषां द्योतकत्वे च सर्वेषामेव निरर्थकतया व्यावर्त्याभावा
न्निरर्थकस्येति विशेषणादाननिरर्थकमिति भावः॥ एवं हीति तपाचनतवे

भू. सा ष्टसिद्धिरिति भावः॥ ननु कोशादौ चादीनामेवार्थकथनात्स्वादीनामेव द्योत
१८५ कत्वमेवं च नचैव परीत्यामत्त॥ आह सर्वथेति॥ एवं वंचत्वदीपार्थकैव नो
185 देतीति भावः॥ प्रत्याख्यातेति॥ कृत्तद्धितेत्यत्र त्यचशब्देनैव तदर्थस्य संग्रही
तत्वादिति भावः॥ वक्ष्यमाणास्वरसादाह॥ किंचेति पदांतराणां घटादीनां
तत्र समुच्चये प्रकरणादिवादित्यनेन द्योतकत्वाव्यक्तित्वा भावः॥ सूचितः॥
अस्माकं पक्षद्वयाभ्युपगंहणं कार्य्याकारणोति समुच्चितघटादिबोध्ये घट
पदलक्षणा ज्ञानहेतुत्वेत्याकारकद्रूतत्वार्थः॥ शक्तिग्रहस्यापीति घटाद्यर्थबो राम
ध्ये घटशक्तिज्ञानस्य समुच्चयादिबोध्ये तच्छक्तिज्ञानस्य हेतुत्वेत्याकारकका १८५

र्थकानामभावोप्यलक्ष्यं स्वीकरणीयमित्यर्थः॥ कल्पान्तराभावेनेति द्योतकत्व
पक्षे वाचकत्वपक्षे वा तत्तल्लक्षणकृप्ताधिककल्पनीयाभावेनेत्यर्थः॥ अत एवे
ति॥ युक्तिसाम्यादेवेत्यर्थः॥ सवाचकइति॥ उपसर्गप्रक्रमोक्तं प्रतिवदतइत्यत्रा
पिगतिनिवृत्तिवाचकः॥ स्याधातुस्ताद्भाववाचकश्चोपसर्गइत्यभावाना
भावस्य गतिस्वरूपत्वान्न्यासामंजस्यं वाचकत्वमेवेति॥ निपातानां वाच
कत्वमेवोपसर्गाणां द्योतकत्वमेवेत्याकारकइत्यर्थः॥ अन्वयव्यतिरेकयोः ए
तोः॥ परेषां मन्मतं तदेव नोस्माकं नयुक्तामिति॥ मूलयोजना॥ ४३॥ द्रव्यभिन्ना
र्थकश्चादयो निपातसंज्ञकाइत्युक्तं तत्र द्रव्यभिन्नार्थकत्वं लक्षणं वर्यव

सत्त्वं तच्चानर्थके निपाते व्याप्तं अन्यतमत्वमपि लक्षणं दुष्टमं गौरवग्रस्तं चेत्यत ९
आह शक्तिसंबंधेनेति ॥ जातिरिति ॥ निपातपदशक्यतावच्छेदकतया च तत्सिद्धि
रिति भावः ॥ ननु सकलचार्वादिसाधारणो[illegible]कनिपातत्वजातिसत्त्वे मानाभावः ॥ क
किंच न हि शक्यतावच्छेदकतया जातिसिद्धिः विभुत्वादीनामपि ॥ जातित्वप्रस
गात् ॥ किंतु कार्यतावच्छेदकतया कारणतावच्छेदकतया वा सत्यबाधके जातिः
सिद्ध्यति तदत्र नास्तीत्यत आह ॥ उपाधिर्वेति सामान्य ॥ धर्मेति ॥ अतिप्रसंजकाना
पादके व्यापको धर्म इत्यर्थः ॥ प्रमाणानां प्रमितीनां ॥ उपसर्गाः ॥ किंद्योतकाः उतवा
चकः ॥ इति संशये तन्निवर्तकानिश्चयापेक्षायां निश्चयः ॥ सामान्यधर्मावच्छेदे

नैवकल्प्यते॥व्यापकत्वात्संयोगेहिकत्वाद्यवात्प्त्वपरत्वाद्यनेकधर्मावच्छेदेन
तत्कल्पनेगौरवात्॥इदंचैतत्ईश्वरसिद्धिफलकानुमानेतद्बाधकामंसाध्यता
व्याप्तिसंवेध्येनकृतिमत्कार्यत्वादित्यत्रकृतिमत्वंघटत्वपटत्वकुड्यत्वाद्य
नेकधर्मावच्छेदेननकेनापिस्वीकृतंकिंतुसामान्यभूतकार्यत्वादिनैवेतित
द्वदत्रापीतिभावः॥नैपातिकास्तु॥उपसर्गाद्योतकाः॥चादयोवाचकाः चा
र्थेद्वंद्वइति॥सूत्रस्वरणकौशादीनांतदर्थाभिधानाच्च नचनिपातत्वेनहेतु
नाचादीनामपिद्योतकतासामायातीतिवाच्यंकौशाद्युक्तार्थवाचकताका
नांचादीनामुभयमतंसिद्धंनिपातत्वादिसामान्यधर्मेणचादीनामपिद्यो

उप. ४७

भू.सा तकतास्वीकारायेत तदा तत्तोपि व्यापकधर्मेणाव्ययत्वेन स्वरादीनामपि द्योतक
१८७ तापत्तेः॥ अत एव प्रतिष्ठते इत्यादौ धातोः॥ प्रस्थानादिप्रतीतिः॥ प्रोपसर्गस्य गति
187 नित्वव्याप्यभाववाचकत्वेन तु न निर्वाहः॥ प्रत्ययानामिति व्युत्पत्तिविरोधा
त् शरैकत्स्वैरित्यादावपि समानविभक्तिकयोरेवोपमानोपमेयभावस्वीका
रादिति न दोषः इत्याहुः॥ नव्यास्तु किमागतविशेषबोधकातिरिक्तनिपा
तानां वाचकत्वमपि अत एव नेत्यतोऽभावबोधः॥ कस्येति जिज्ञासात्वाच
हृश्यते अभावशब्द इव॥ किंच पर्वतादा इत्यादौ पर्वतादर्वाक् इत्याद्यर्थ राम
प्रतीतेस्तत्र वाचकत्वमवश्यं स्वीकरणीयं द्योतकत्वे हि तस्य विशेषणानै १८७

त

यस्मात् तदुक्तं हरिणाष्कन्वित्सं भवन्ति नो भेदाः ॥ केवलैरनिदर्शिताः ॥ उ
पसर्गास्संबंधे व्यज्यन्ते प्रपरादिनाभिपाताः द्योतकाः केचित्स्वार्थाभि
धायिनः ॥ आगमाद्वाकेपि स्युः संभूयार्थस्य वाचकाः इति कोपि विदित्सु
भमान्वमी केचित्स्वार्थाभिधायिनो वाचकाः केचिदनर्थका ए
वेत्याहागमाद्वेति तदर्थः ॥ अव्ययं विभक्तीति ॥ सूत्रे भाष्योपि पसह्यमे
वेत्येवस्वरसः ॥ अत एव निमीक्षिकमित्यादौ पूर्वपदार्थप्राधान्यं भाष्योक्तं
संगच्छते ॥ अत एव संकटमुद्गतानि मालनिवृत्तौ शांप्यादानुसमादेः ॥ कि
या विशिष्टसाधनवाचकतोक्ता भाष्ये शनैः कसेत्यादौ तु द्योतकतैव

उप·४६

सू·सा अन्यथा उभयसदृशस्यकरणत्वेपुरुषस्याकरणत्वात्पुरुषपदोत्तरतृतीयायाने
१८८ रर्थक्यमसाधुत्वंचस्यात्॥इत्यादीनांस्वसमन्वयाहते॥उपमानतावद्योतक
188 त्वं उपमानत्वेनप्रतीतेः॥साधारणधर्मवदुपमेयप्रतीतिविनानुपपत्त्या
उभयत्रापिसाधारणधर्मसंबंधेतात्पर्यग्राहकत्वंच उपमानत्वंचसा
धारणधर्मवत्वेनेषदितरपरिच्छेदकत्वंतद्धर्मवत्तयापरिच्छेद्यत्वं
चोपमेयत्वंस्फुटंचैतदुपमानानीतिसूत्रेभाष्ये एवंचोपमानविशेषणी
भूतसाधारणधर्म्मेणोपस्थितोपमेयेउपमानप्रवृत्तिनिमित्तारोपा राम
द्भेदसत्वात्समानविभक्तिकत्वमभेदान्वयश्चसिद्ध्यतिसाधारणधर्म १८८

संबंधश्च कश्चिद्विशेषणतयाचंद्र इव मुखमाह्लादकमित्यादौ आह्लाद
कोपमानभूतचंद्राभिन्नमाह्लादकं मुखमित्यादिबोध्यात् ॥ कश्चिद्विशे
ष्यतयश्चंद्र इव मुखमाह्लादयतीत्यादौ अत्र हि उपमानचंद्रकर्तृका
ह्लादभिन्नो मुखकर्तृकाह्लाद इति बोध्यः सामानविभक्तिकयोरेवोपमा
नोपमेयभाव इति लपात्तिनीयमिति वदंति ॥ एवं शब्दो नानार्थकः ॥ एवे चा
नियोगे इति वार्त्तिकप्रामाण्यात् ॥ तत्र नियोगोवधारणं अवधारणंच त्र
स्यान विशेषः ॥ स चैवकारद्योत्यः समभिव्याहृतपदार्थविशेषणं स च वि
शेष्यसंगतो विशेषणासंगतः ॥ क्रियासंगतश्चेति त्रयः पार्थ एव धनुर्धर इ

भू·सा स्यादौ विशेष्यसंगतोऽस्वितिरिक्तावृत्तित्वेन गृहीतसमभिव्याहृतपदार्थप्रका
१८९ रकज्ञानरूपं पार्थ विशेषणपार्थातिरिक्तावृत्तिधनुर्द्धरत्वप्रकारकज्ञान
189 विशेष्यः पार्थ इति बोध्यः ॥ साधारणेन धनुर्द्धरत्वज्ञानवंतं प्रति तन्मद्रमभि
रासायैवं प्रयोगात् ॥ तदन्योन धनुर्द्धर इति तु फलितत्वमुखं वलन्मुखेनैव
तुल्यं नान्यकेन विदित्यत्र व्यावर्त्यस्य प्रयोगोऽपि कदाचिद्दृश्यते तत्तु स्वबा
र्थमेव ॥ एवं शंखे पांडुरत्वमित्यादावपि बोध्यं शंखः पांडुर एवेत्यादौ वि
शेष्यवृत्त्यसंगतेस्वातिरिक्तरूपानाश्रयसमभिव्याहृतपदार्थविशेष्यक
ज्ञानरूपं तत्र ॥ अवधारणप्रकाशः पांडुराभिन्नः ॥ शंखवदिति बोध्यः ॥ क्रिया राम १८९

संगते चैत्रो हसत्येवेत्यादौ स्वातिरिक्तबुद्धिस्थाक्रियानाश्रयसमभिव्या
हृतपदार्थप्रकारकज्ञानरूपं तत्॥ नरोदीतीति प्रतिनिर्देशात् नीलं सरोजं भव
त्येवेत्यादौ॥ नीलभवनाद्यभावानधिकरणसमभिव्याहृतपदार्थप्रकारक
ज्ञानरूपं तत्तन्न भवतीति नेति प्रतिनिर्देशात् ज्ञानमर्थं गृह्णात्येवेत्यादाववच्छे
दकावच्छेदेनार्थग्रहणाद्यभावानधिकरणज्ञानादिप्रकारकज्ञानरूपं तत्तन्न
गृह्णातीति नेति प्रतिनिर्देशात्॥ ज्ञानकर्तृकमर्थकर्मकमवधारणविषयो ग्रह
णमिति बोध्यः॥ स नैमन्नभार्यामुपेयादेवेत्यादौ स्वाभावानाश्रयकारकविशेष्य
कज्ञानरूपं तत्॥ नोपेयादिति नेति प्रतिनिर्देशात्॥ स तु कालाधिकरणकं स्वभा

न्यू॰सा १२८० 190

र्यो कर्मकमवधारणं विषयो गमनं प्रेरणा विषय इति बोध्यः तेन तत्तत्प्रत्ययार्था भा
वरूपद्रव्यत्वाद्युन त्वलाभः ॥ चैत्रेणैवायं गन्तव्य इत्यादौ चैत्रान्याकर्तृकत्वसक
लकारकविशिष्ट दर्शनादि क्रियाविशेष्यकबोधस्वरूपं तत्त्व ॥ सकलसाधारणा
मवधारणत्वमखण्डोपाधिस्तेनैव रूपेणाव्यक्तिग्रहो बोध्यश्चेति बोध्यं लवणा
मेवाश्नामि इत्यादौ प्राचुर्यार्थकः घट एव प्रसिद्ध इत्यादावप्यर्थकः ॥ क्व
भोक्ष्यसे इत्यादावसंभवार्थक इति ध्येयं इदं ॥ लवध्येयं ॥ उपसर्गनिपातत्वाद्यज
नतो प्रकर्षादिसमुच्चयत्वो ध्यानं ॥ प्रयोगसमवायि प्रादीनामेव द्योतकत्वं वाच
कत्वं वा तदानुपूर्व्या एव द्योतकतावच्छेदकत्वं वाचकतावच्छेदकत्वं वेति क राम १२८

र्मप्रवचनीयानां तु कर्मक्रियां प्रोक्तवन्तः इत्यन्वर्थसंज्ञाविज्ञानात् क्रियागत
संबंधविशेषकत्वं जपमनुप्रावर्षदित्यत्र हेतुभूतजपनिरूपितलक्षणलक्ष
णाभावसंबंधस्य वर्षणक्रियानिष्ठस्यानुनाद्योतनात् एवमन्यत्राप्यूह्यं अत
एवनोपसर्गत्वं तेषां क्रियागतविशेषद्योतकत्वाभावात् ॥ उक्तं च क्रियाया
द्योतको नायं संबंधस्य न वाचकः ॥ नापि क्रियापदक्षेपी संबंधस्य तु भेदकः
संबंधस्य विभक्त्यैवोक्तत्वात् ॥ न संबंधस्य वाचक इत्यर्थः ॥ प्रादेशं विलिखती
त्यादौ विशब्दस्य क्रियाक्षेपकत्वं प्रादेशं विमाय लिखतीत्यार्थात्तद्भिन्नेत्यर्थः 86
॥ इति भूषणसारविवृतौ उपसर्गनिपातार्थनिर्णयः ॥ नामार्थनिरूपणप्र

कृ

भू॰ सा त्त्वान्नामधेयत्वं कृत्तद्धितानामर्थनिरूपयिष्यन्त्वादौ नामप्रवृत्तिनिमित्तत्वा
१९१ न्ताभावप्रत्ययार्थनिरूपणामित्याशयवानाह ॥ भावेति ॥ मात्रेति व्याजादेरित्यर्थः
191 षष्ठ्याद्यंतभावेनैवेति ॥ राजसंबंध्यविशिष्टेइत्यर्थः पागंतरे तु इत्युक्तमि
तिसमासशक्तिनिरूपणावसरे इति भावः ॥ भेदपक्षइति ॥ तत्पक्षेनाजपुरु
षइत्यत्रानाजकीयद्भिन्नपुरुषइतिबोधे ॥ नपुरुषेराजसंबंध्यस्याविशेषणा
त्वइति भावः ॥ अन्वयबोधइति भावप्रत्ययस्यप्रकृत्यर्थे ॥ विशेषणीभूतसंबंध
वाचकत्वादिति भावः ॥ अव्यभिचरितसंबंधोक्तिविति ॥ अव्यभिचरितसंबंध सा म
पदप्रतिपाद्यजात्येव भानोपगमेत्वित्यर्थः ॥ तुशब्देनारुचिः ॥ सूचिताताद्दी १९१

जं तु डीषाद्यर्थजातिवद् त्यदेशोऽभिमानं तु अपत्यापत्यवत्संबंधप्रकारकं न
तु जातिप्रकारकमेतत्त्व जातिकार्यं लभत इति वदता कौमुदीकारेणैव सूचि
तमिति ॥ अर्थान्तरवृत्तीति प्रकार इति ॥ मुख्यविशेष्यतानिरूपितप्रकारतावाश्र
श्रय इत्यर्थः ॥ तेन दन्डीत्यादौ दंडत्वादेर्न भावप्रत्ययवाच्यता विशिष्टपरिच्छे
यस्य भावप्रत्ययवाच्यत्वे प्रयोजनमाह ॥ त्वयेति ॥ एकतरांशमात्रप्रवेश इत्य
र्थः ॥ तदुक्तमिति ॥ दैशिघटपदोत्तरेइत्यर्थः ॥ घटत्वमित्यादौ द्रव्यत्वस्येव त्व
दं २ न्मते दंडीत्यादौ डसंबंधस्यावाच्यतयाऽप्रकारत्वाद्दंडसंबंधस्य दंडित्वमि
त्यस्यावाच्यत्वप्रसंग इति भावः ॥ नचेत्यस्य नहीत्यर्थः ॥ प्रकार इति ॥ येन तस्य

मु॰सा त्वादिवाच्यतास्यादिति शेषः॥मीमांसकमतमाह॥यस्त्विति॥अत्र दंडित्वमित्या
१६२ दौ स्वसमवेतः॥भावप्रत्ययप्रकृत्यर्थसमवेतः॥नीलत्वमित्यादौ नीलादिगुणः
152 प्रकृत्यर्थः॥समवेतवृत्तिमप्यात्वप्रत्ययवाच्यत्वं संभवति तद्यानसंभवति दंड
देर्वाच्यत्वामिति दंडसंबंधस्यैवागत्यावाच्यत्वमाश्रितमित्यर्थः॥संबंधिवा
चेति दंडी पुरुष इति सामानाधिकरण्यानुबोध्यात्॥संबंधिवाचकत्वमतुपोन
संबंधवाचकत्वमिति भावः॥अगत्यभावादिति संबंधस्यैव संबंधिनि प्रका
रीभूतस्य भावत्वसंभवादिति भावः॥आद्यावेवेति॥एवं बेकृ देवीत्यादिग्रंथे
नेत्यर्थः॥नवीप॥वैयाकरणास्यापिदं॥कश्चिज्ज्ञासादिवाचकत्वंकःचि ना म १६२

त्संबंधस्य वाचकत्वस्वरूपं वैधर्म्यमित्यर्थः ॥ मूले त्वादिषु भावप्रत्ययेष्वित्यर्थः ॥ अ
न्वयएवाह सिद्धांते इति ॥ तज्जन्यत्वस्य विवरणं प्रकृतिजन्येति स इति भिन्नं पदं
अत्रोपाधिपदं न धर्मपरं घटत्वादेः ॥ प्रयोगधर्मत्वाभावात् किंतु निमित्तपर
मिति व्यावर्त्ये प्रयोग इति शब्दोच्चारणप्रवृत्तावित्यर्थः ॥ तथा च घटत्वादेर्न भाव
त्वानुपपत्तिरिति भावः ॥ प्रकारतामित्यस्यापन्नमिति शेषपूरणेन व्याचष्टे प्र
कृत्यर्थे प्रकारतयेति तथा च प्रकृत्यर्थनिष्ठविशेष्यतानिरूपितायाप्रकारता
वच्छेदकत्वेनाभिमतसंबंधावच्छिन्नाप्रकारता तदाश्रयोयः ॥ शब्दप्रवृत्तिनि
मित्तहेतुर्धर्म इत्यर्थः ॥ पर्यवसितार्थमाह प्रकृतिजन्येति शब्दप्रवृत्तिनिमित्त

धर्मी यदा जातिस्तदा स्वरूपेणैव यदेतरदा तदा तद्वृत्तिधर्मेण जात्यादि
नानुगतीकृतेन भावप्रत्ययवाच्यताननुगतेति वक्तव्यत्वसाहेतत्सक
लतद्वृत्तिरूपसाधारणधर्मत्वेन एकैकांशस्य व्यभिचारित्वादिद्वित्व
स्य गौरवग्रस्तत्वादेतदेवाभिप्रेत्य मूले धर्ममात्रमित्युक्तं तत्तच्छब्दप्रवृत्ति
निमित्तभूतं धर्मसामान्यमित्यर्थः ॥ गुरुधर्मस्यापि वाच्यत्वे युक्तिमाह तत्त
द्व्यक्तीति तत्तद्व्यक्त्युपलक्षितेत्यर्थः ॥ घटत्वघटत्वादिरूपत्वादिति ॥ घ
घटघटत्वापदोत्तरत्वप्रत्ययार्थत्वादित्यर्थः ॥ जातेर्वृत्तिसत्तात्मकत्वे प्रमा
णमाह ॥ संबंधिभेदादिव्यक्तिभेदादित्यर्थः ॥ तद्व्यक्त्युपरागात्स्यार्थेवोनप्रती

यमानागवादिनिष्ठाव्यावृत्तसत्तैवजातिरितिकथ्यतेतत्स्यांसर्वेशब्दावाच्यत्वेनव्य
वस्थिताइत्यर्थः॥उक्तमेवप्रकारटयतितामितिथात्वर्थमिति॥जातिमन्येक्रियामा
हुरित्युक्तमेवप्राकृतं॥विशिनष्टिसितिक्वचिज्जातिः॥क्वचित्संबंधइत्युक्ता
र्थेवार्त्तिकंप्रमाणयति॥उक्तंचेति॥गुणस्थेत्यस्यव्याख्यानंविशेषणतयेति॥उ
पसर्जनतयेत्यर्थः॥पर्यवसिततमाह॥तथाचेति॥आदिपदाद्गुणपरस्यु... त्वा
दिरसादिपरिग्रहः॥जनकत्वेइति॥बोधजनकत्वमात्रेइत्यर्थः इदंचव्यपे
क्षावादिनांमतंतन्मतेक्रियाकारकभावसंबंधेनपाकादेः॥प्रत्यमार्थकर्त्री
दावन्वयात्॥स्वमतेनाहसंसर्गप्रकारकेति॥सूपपादेति॥जातावेवभावप्र

म०सा स्त्वयइति नियमाभावादिति भावः ॥ तत्रेति ॥ जात्यादिवाचकभावप्रत्ययेषु म(
१२४ ध्येत्यर्थः ॥ जातिवाचकानामिति ॥ अवच्छेदिकाइति ॥ उपस्थितत्वाद्घटत्वादि
194 जातिनिष्ठशक्तेराधेयतासंबंधेनावच्छेदिकाइत्यर्थः ॥ अवच्छेदकानुगमकंच
घटत्वादिकमेवेति भावः ॥ पार्थक्यसिद्धबोधमाह ॥ तथाचेतिपक्षांतरमिति ॥ त
त्त्वत्वदेव भावप्रत्ययवाच्यइति मतांतरमित्यर्थः ॥ तत्सूचनकोपीति ॥ उक्त
वार्तिकसूचनप्रयोजनकोपीत्यर्थः ॥ अपिनापक्षांतरसंग्रहः ॥ वार्तिकाशयंप्रका
शयति ॥ अयंभावइति ॥ जात्यादिवद्ध्वदस्याप्यर्थंप्रतिविशेषणत्वंभवतीत्याह राम
र्थे ॥ वदिति ॥ जात्यादिवदित्यर्थः ॥ स्थलविशेषशब्दस्यैवविशेषणत्वंसर्वैः स्वी १९४

कार्य्यमित्याह ह रि हरेति॥ कश्चिदसीदित्यनेन जात्यादिप्रकारकवोधोनसंभव
तीतिध्वन्यते अनुपस्थितहरि॥ त्वाद्यवच्छेदेनशक्तिग्रहासंभवेनतत्प्रकारक
शाब्दवोधादुपस्थितपदस्यैवप्रकार त्वमभ्युपगम्यशाब्दवोध उपपादनीयमय्या
चैतत्तथाप्रतिपादितंप्राक्॥ अन्वयेति॥ अर्थांशेशब्दस्याप्रकारत्वेइत्यर्थः॥ आ
रण्यकानांसन्निकर्षसम्भावाज्जातिधर्मितावच्छेदककशक्तिग्रहशाब्दवोधसं
भवादत॥ उक्तंनागरिकानितिएवमेवेति॥ पदप्रकारकएवेत्यर्थः॥ अप्रसिद्धे
ति अगृहीतजात्यादिशक्तिकपदेष्वित्यर्थः॥ उभयमिति॥ उभयविधभाष्यवा
क्यदर्शनादनुभवाच्चजात्यादिरूपंपदंचशक्त्यवच्छेदकमित्यर्थः॥ ननुजात्या

भ॰सा घानुपस्थितिदशायामयमर्थो वाच्यतासंबंधेनैतत्पदवानिति शक्तिग्रहोप्यसंभ
१८५ वदुक्तिकोत आह ॥ पदप्रकारकेति विशिष्य ॥ घटत्वादिरूपेणेत्यर्थः ॥ यद्यप्युत्तर
105 वार्तिकात्सर्व एव शब्दाः पदप्रवृत्तिनिमित्तकाद्रस्याम्यातितथा चेयं व्यवस्था निर्मू
लेति प्रतिभाति तथापि घटत्वादिना गृहीतशक्तिक घटादिपदाद घटत्वप्रकार
कबोध्यस्य सर्वानुभवसिद्धस्यापलपितुमयोग्यतया लौकिकं शास्त्रीयं चोभ
येमनुसत्य चोक्तव्यवस्थानुसरताग्रयकृतेति ध्येयं ॥ क्वचिदुक्तमिति ॥ किंचि
न्निष्ठशक्तिनिरूपकमित्यर्थः ॥ तथा च नृपादिवर्णनप्रस्तावे नृपत्वादिनोप
स्थितनलादीनां शक्त्यंशे भाने उपस्थितत्वान्नलादिपदानामपि तदंशे भानम् राम १८५

अथ संख्याविचारः

विरुद्धमिति भावः॥ तथैव बोध इति॥ पदवाच्यत्वप्रकारक एवेत्यर्थः॥ जात्या
दिर्व्यवच्छेद्यः॥ इति मूषणसार विवृतौ भावप्रत्ययार्थनिरूपणं॥ ननु इंद्रा
दिपदादेवतायालाभेन देवतायां प्रत्ययशक्तिकल्पनमयुक्तमन्यलभ्यत्वादि
त्यत आह॥ यत त्वेति॥ इंद्रादिपदाद्देवतात्वेनोपस्थितौ तात्पर्यानाभावादिति भा
वः॥ तेन रूपेण देवतात्वेन रूपेण देवतात्वेनोपस्थितिरावश्यका अत एव
तद्धितेन चतुर्थ्या वा मंत्रलिंगेन वा पुनः॥ देवतासंगतिस्तत्र दुर्वीलं च परंप
रमिति मीमांसक सिद्धांतसंगतिः॥ देयस्य देवतासंबंधित्वं च देवतासंप्रदानक
त्यागकर्मत्वं संप्रदानत्वं च वेदबोधितस्वत्वानिरूपकस्वामित्वाप्रकारेण

रुछाविषयानिराकरिष्णुत्वं ग्राह्यं तद्देवदेवतात्वमपि नातो ब्राह्मणोदो देवता
त्वं मंत्रस्य देवतासंबंधित्वं च त्यागेच्छाधीनोच्चारणकत्वं एवं च देवतासं
बंधीप्रत्ययार्थः ॥ ननु मंत्रस्य देवतासंबंधित्वं च त्यागेच्छाधीनोच्चारणक
त्वं एवं च देवतासंबंधीप्रत्ययार्थः ॥ ननु संबंधः हविरादिभिः सामानाधि
करण्यानुपपत्तेः ॥ घृतादिपदसमभिव्याहारानन्तरूपेण देयप्रतीतिः ॥ तद्दे
वतादानकर्मत्वाद्देयमुच्यत इति भावः स्वोक्तार्थे संमतिमाह ॥ अतएव चेति ॥
देवतासंबंधिनः प्रत्ययार्थदेवत्वा वेत्यर्थः ॥ सान्निध्यादिति सा वैश्वदेव्या
मीक्षा इत्यत्रामिक्षापदसमभिव्याहारादित्यर्थः ॥ तस्यैवेति ॥ आमिक्षपद

स्यैवाभिक्षात्मकदेवबोधकत्वमित्यर्थः॥ एवंच तद्धितस्य सामान्यतः॥ संबं-
धिबोधकत्वेप्याभिक्षादिसमभिव्याहाराद्विशेषपर्यवसानमिति भावः॥
केवलादि॥ विशेषद्रव्यवाचिपदासमभिव्याहृतादित्यर्थः॥ अग्नेः स्तुवं
न् अग्निशब्दात्स्तुवन्नुच्चरन्न॥ आग्नेयाष्टाकपालो भवत्यमावास्यायामित्या-
दौ॥ नान्वेति॥ विशेषपर्यवसिततद्देयप्रतिपादयितुं न क्षमः॥ किंतु सामान्यत-
स्तद्देवतासंबंधी स्यैवेति भावः॥ तथाच देवताविशिष्टदेयस्तद्धितार्थ इ-
त्येषामपि संमतमिति भावः॥ नस्तीति स्वंडशः शक्तिस्वीकारमते ऽभेदेन दे-
वतारूपेण तद्धितार्थे प्रकृत्यर्थस्यान्वयः॥ तस्मात्तद्धितार्थे हविरादौ द्रव्ये

स्वोद्देश्यकत्यागकर्मत्वसंबंधेनान्वयइति ध्येयं ॥ ५१ लक्षणायेति ॥ इंद्रादिपद
स्यैंद्रदेवतादिबोधकतयेत्यर्थः ॥ जयमचदिति ॥ वाचकत्वपक्षेतुतत्रोप
सर्गस्यैवशक्तिसंभवान्नलक्षणोपयोगइतितद्व्यंतत्वासंभवइतिभावः ॥
पदांतरादिति ॥ समभिव्याहृतहविरादिपदादित्यर्थः ॥ कुतः ॥ पुनरिति ॥
अनन्यलभ्यस्यैवशब्दार्थत्वात् तथाचसंबंधएवतद्धितार्थोस्त्विति भा
वः ॥ तत्प्रतीतेरिति ॥ देवतासंबंधिसामान्यतोदेयप्रतीतेरित्यर्थः ॥ तथाच
तत्प्रतीत्यनुरोधेनतदर्थकत्वयाप्यपकमितिभावः ॥ पदांतरसमभिव्याह
राभावेकेवलेंद्रपदश्रवणोदेयप्रतीतेः ॥ संदिग्धत्वादाह ॥ ऐंद्रंदध्यीतिसं

वंध्ययात्रार्थकत्वेदध्यादिभिः सामानाधिकरण्या॥नुपपत्तिरितिभावः॥ अ
न्यथासामानाधिकरण्यानुपपत्तेर्धर्मिणस्तत्साधकत्वे पचतिदेवदत्तः
पच्यते तंडुलइत्यादौ सामानाधिकरण्यानुपपत्त्यैवाख्यातस्य कर्तृकर्मवा
चकत्वमभ्युपगम्यते तद्वदत्रापीति भावः॥ सिंहावलोकनन्यायेन मीमांस
कमतं दूषयति मीमांसकानामिति॥ तन्मते तत्तद्देवताकत्वरूपतद्धितार्थेन
धर्मिण आक्षेपाल्लाभे न सामानाधिकरण्योपपत्तेरिति भावः॥ मास्त्विति आ
ख्यातस्येव तद्धितस्यापि धर्मिवाचकत्वं मास्त्वित्यर्थः॥ दूद्व्यापत्तिस्त्वाभि
प्सां देवतायुक्तोमिनिस्वमतविरोधत्वात्तुमशक्येति भावः॥ ननु कर्तुरन्यत

मू. सा १९८ (198) म्यत्वाद्धेतोर्नेति ङीमन्वाचकत्वमपितु प्राधान्यानुरोधादित्त आह॥ द्विगाविति॥ तदर्थेस्तु
संख्यालिंगादे। व्यभिचारात्प्रकृतिप्रत्ययार्थयोरिति व्युत्पत्तिः॥ प्रायिकीतिनेतादनुरो
धेन प्राधान्यानुपपत्तिः भावः॥ प्रधानमाख्यातमितिन्यायस्यादाख्यातेतर विषमावे
ति देवतात्वेनेतिइंद्रत्वेनरूपेणेंद्रपदाच्छत्त्याबोधेपिइंद्रदेवतात्वेनरूपेणाबोधा
र्थेलक्षणावश्यकीति भावः॥ अनुपपत्तीति॥ अन्वयानुपपत्तिरित्यर्थः॥ ५२ रीत्येति॥ वि
शिष्टः एकोंशो वाप्रत्ययवाच्य इति रीत्येत्यर्थः॥ प्रहरणं॥ क्रीडेति चुत्पत्तिवैचि
त्र्यासरेणां कृती प्रसाधनत्वयोरिव परस्परमन्वय इति भावः॥ प्रहरणस्यप्रकृत्यैव राम
लाभमभिप्रेत्याह क्रीडा॥ मात्रं चेति॥ मात्रपदेनप्रहरणव्यवच्छेदः॥ तथाचदंडाभि १९८

त्रप्रहरणसाध्यनविशिष्टाह्निकेतिबोध्यः॥ सोस्येति॥ सोस्यनिवासइतिसूत्रविहित
प्रत्ययस्यनिवासः॥ संबंधी चार्थः॥ अधिकरणव्युत्पन्ननिवासशब्देननैरंतर्य्य
विशिष्टवासाधिकरणमुच्यते तथास्रौघ्नइत्यत्रस्रुघ्नाभिन्ननिवासाधिकरण
संबंधीतिबोध्यः॥ नैरंतर्यार्थकनिशब्दोपादानादेकस्मिन्दिनेवासकर्त्तरि
नतथाप्रयोगः॥ पौषोमासः॥ इत्यादौसास्मिन्नित्यनेनविहिततद्धितस्यपौर्णमासी
त
घटितत्वाद्विच्छिन्नोर्थः॥ तस्यकृतिपौष्यार्थस्यपुष्यनक्षत्रकर्मकचंद्रभोगाश्रयका
लस्यप्रत्ययार्थैकदेशेपौर्णमासीपदार्थेभेदेनान्वयः॥ तथाचपुष्यनक्षत्रकर्मक
चंद्रभोगाश्रयकालाभिन्नपौर्णमासीघटितोमासइतिबोध्यः॥ पौषादिपदंच

न केवलं यौगिकं पौषः पक्षद्वयादिव्यवहाराभावात् ॥ अतो रूढमपि अत एव सू
त्रे संज्ञाग्रहणं कृतं रूढि निरूपकतावच्छेदकं च मासनिष्ठ शुक्लप्रतिपदा
दिदर्शान्ततिथिसमुदायत्वं न तु त्रिंशत्तिथिसमुदायत्वं यत्किंचित्तिथ्यवधिकत्रिं
शत्तिथिसमुदाये मासव्यवहारसत्त्वेपि चान्द्रसौरपौषादिषु हि भूतपौष्यादिघटि
तत्रिंशत्तिथ्यन्तर्गततिथिषु पौषादिव्यवहारविरहात् ॥ अथैवमपि ॥ सौरं पौषा
दिव्यवहारस्यानिर्विवादत्वमाधुनिकः स्यम विविधिप्रावल्यमेव न तु कथं पौषादिप
दशक्यतावच्छेदकमुपेयत इति चेन्न सौरपौष्यादिपूर्णिमायाः ॥ अंतभेयोगस्र
ढिलक्षपौषपदार्थे विलोपापत्तेः ॥ इष्टापत्तौ तु तन्निमित्तकादिकादिविलोप

पत्तेः सावैशाखस्यामावास्यायां रोहिण्या संबध्यते इत्यादि श्रुतिबलाच्चांद्रए
वपौषादिशक्तिसिद्धेश्च न संज्ञेत्वेनमुक्ता ॥ कालश्च सवत्सरनक्षत्रयोगयोगफला
मेव विवक्षितं पुष्याद्युक्तायामपि पौषादिपूर्णिमामां पौष्यादिव्यवहारात्
अन्यथामाघ्यां यदि मघानास्तीत्यादेरसंगत्यापत्तेः पुष्यादियोगयोग्यताच
ध्वनुनादिस्थिरव्यारव्यपक्षीयत्वं तद्रूपाक्रांतपौर्णमासीघटितत्वरूपयोगल
भ्यतावच्छेदकं नियतमेव पौषादेरिति यौगिकार्थस्याप्युपपत्तिरिति दिक् ॥ त नु ६
द्धस्यास्मिन्निति सूत्रेण विहितमनुवादः ॥ संबंधिन्यधिकरणे च शक्तिः
द्वयेपि सूत्रस्योपादानात्संबंध्यर्थकत्वमेवोचितं तत्थापि गोमान्चैत्रइ

तीद्धत. ५/३

भू.सा त्यादौ समानाधिकरण्यानुरोधात्संबंधिनिष्ठान्निरूक्तेति ध्येयं भूमादयस्तु
२०० सामर्थ्यगम्याः ॥ प्रकृतिलक्षणावेतिन तेषु मतुबादेः शक्तिः इत्यादिकमित्यादि
200 पदान्तस्यापत्यं ते नरकंइत्यादिसंग्रहः ॥ तत्र गार्गिरित्यादौ अस्यत्यरूप तद्धि
तार्थैकदेशे जन्यत्वे पूर्वकर्थे गर्गनिरूपकतयान्वयः ॥ गर्गनिरूपितजन्य
ताश्रयो देवदत्त इति बोध्यः ॥ गार्ग्य इत्यादौ च तद्धितार्थे जन्यजन्याद्यैकदे
शे जन्यत्वे पूर्ववन्निरूपकतयान्वयः ॥ गर्गनिरूपितजन्यत्वाश्रयजन्यो
गार्ग्यस्तत्तीयादिरित्यन्वयबोध्यः ॥ गार्ग्यायण इत्यादौ च तद्धितार्थे युवापत्य राम
त्यैकदेशे जन्यत्वे गोत्रापत्य गार्ग्यस्य जीवति तु वंश्ये युवेति परिभाषित युवा २००

र्थे घटकजीवनेवनेच गर्गादेरर्न्वयः तेन गर्गादिजीवनकालीनो गर्ग
गोत्रापत्यनिरूपितजन्यताश्रयो गर्गे चतुर्थ्यां दिगार्ग्यामणाइति बोधः ॥ मां
जिष्ठं वास इत्यादौ तेन रक्तमित्यर्थे तद्धितः ॥ तत्संबन्धावच्छिन्नतदीयरूपारो
पविषयत्वं तेन रक्तत्वं शंखवः पीत इत्यारोपमादाय शंखादेः ॥ अमोप्पपीति
माश्रयहरितालादिना रक्तत्वस्य वारणामाधीनोत्तमारोपविषयं घटादेश्च
ए क्षुंदी। नारक्तत्वस्य वारणाय तदीयत्वं रूपविशेषणं अत्र च रागकरणस्य मं
जिष्ठादेः प्रकृत्यर्थस्य तद्धितार्थैकदेशे संबन्धे प्रकृत्यर्थे तयारूपेन्वाधेमत्तया
न्वयः ॥ तथा च मंजिष्ठासंबन्धावच्छिन्नो यो मंजिष्ठानिष्ठरूपारोपस्तद्विषयता

भ-सा अयद्वितिमो।जिबद्वस्यतोबोध्यः॥अल्पामुख्यमित्यादौतद्धितार्थसंस्कृतैकदे
२०१ शेपाकादिरूपसंस्कारेअल्लोस्वादेः प्रसस्यर्थस्याधिकरणत्वेनान्वयः॥अ
२५१ नयैवरीत्यातद्धितानांक्वचित्प्रकृत्यर्थैस्वार्थैकदेशस्यक्वचित्स्वार्थस्यैवा
न्वयबोध्यकत्वमूलैहनीयंजहत्स्वार्थाव्यक्तिपक्षमाश्रित्यमूलमवतारयति
व्रत्रिमात्रइति॥तथाचतत्पक्षेपदानामानर्थक्यात्तदर्थनिरूपणंसिद्धांत
विरुद्धमितिभावः॥ननुजहत्स्वार्थाव्यक्तिपक्षस्यैनावलंबनैकेषांचिद्यक्ति
ग्राहकसूत्राणांवैयर्थ्यमित्यतआह॥आरोपितेति॥विशिष्टशक्त्यैवेतिविशि राम
ष्टार्थस्यैवेतिशेषः॥अजहत्स्वार्थपक्षेविशिष्टशक्तिग्रहस्यप्रसेकशक्तिनिरू २०१

पणोयजीवकतया तन्निरूपणौचित्यमेवैतत्सूचनायैव मूलेतीवेत्युपा
त्तमिति तु रहस्यं ॥ इति निरूपणसारविवृतौ तद्धितार्थनिरूपणं ॥ ननु प्रातिप
दिकसंज्ञाप्रयोजकप्रत्ययार्थनिरूपणप्रस्तावे ऽभेदैकत्वसंख्यानिरूप
णमसंगतमिति चेदोद्यमपरन्तु दन्मूलमवतारयति व्युत्पत्तिप्रसंगेति तथा च ॥
व्युत्पत्तिनिरूपणे तन्निरूपणमपि ॥ प्रसंगसंगतिसत्त्वान्नासंगतमिति भावः ॥ य
द्यपि स्वाद्यंतेऽपि व्युत्पत्तित्वसत्त्वात्तन्निरूपणानंतरमेवेदं निरूपणीयं तथा
ऽपि तत्र प्रकृत्यर्थसंख्याया असत्त्वादेतत्रैव तन्निरूपितमिति ध्येयं अभेदे
कत्वसंख्यापदार्थमतं भेदेन द्विधा आह ॥ संख्याविशेषाणामिति ॥ एकत्वद्वि

प्रभेदैकत्वसंख्या
५४

भ॰सा त्वादीनामित्यर्थः ॥ अविभागेन ॥ अभेदेन अविरोधेनेति यावत् ॥ अत्रैव हरिवा
२०२ क्यं प्रमाणयति ॥ उक्तञ्चेति ॥ आदितः शक्त्या आहितास्थापितानन्तदोषधिभे
दनिबन्धनाविरोधशक्तिर्यस्ते तद् इत्यर्थः ॥ त्यक्तविरोधा इति यावत् ॥ तां अभे
देकत्वसंख्यां तादृशीं ॥ मधुरसस्थितिरूपामित्यर्थः ॥ ननु विरुद्धानामेक
त्वादीनामेकत्रसत्त्वमेव दुरुपपादं अन्यथा विरुद्धत्वमेव भज्येत न हि चि
पुत्रो हि पुत्रव्यपदेशं लभत इति भाष्यमप्येतन्मतेऽनुपपन्नं स्यादत आह ॥ प
रित्यक्तेति वा शब्द ॥ पक्षान्तरसूचकः ॥ अगृहीतविशेषधर्मकं संख्यामात्र राम
मित्यर्थः ॥ एतत्पक्षेपि प्रमाणं तदेवाह ॥ उक्तञ्चेति • भेदानामिति ॥ भेदानां २॰२

एकत्वत्वादिविशेषधर्माणां परिसागात्॥ अग्रहातद्दं व्यापारादिसत्वाभेदे
नान्वयिसंख्यात्म संख्यास्वरूपः एकत्वादिः॥ तथा विध्यः॥ अभेदे कत्व
व्यपदेशः॥ तदेवप्रकटयति जाति॥ भागस्येति॥ एकत्वत्वादेरित्यर्थः॥ भे
दायोहेन भेदस्य विशेषस्यापोहो अग्रहस्तेन द्वित्वत्वादि ग्रहकालिकसं
ख्यात्वप्रकारकप्रतीतिविषयः॥ संख्यापदार्थोऽभेदे कत्वव्यपदेश्यो भवतीभावः
तत्र दृष्टांतमाऽहाग्रहीत॥ विशेषेणेति शुक्लत्वाद्यनुपस्थितिकालिक रूप
त्वप्रकारकज्ञानमात्रेणावस्तुतः॥ शुक्लादिनैवयथाघटादीरूपवानिति प्रती
यते शुक्लादेर्यो भेदरूपोऽपोहः॥ शुक्लत्वादिरतद्व्यावृत्तिरूपः स तु न प्रतीयते

ऋभदै क. ५४

भ॰ सा ते तद्धर्म द्रजपुरुष षड्त्वादौ राजादिपदार्थः ॥ संख्यावाभिन्नाति प्रतीयते न तत्र संख्या

शे एकत्वत्वादि भासत इत्यर्थः ॥ तादृश्य संख्याभानस्यपरान भ्युपेयत्वादाह वै

२०३ याकरणानामिति ॥ तादृशसंख्याव्यक्तौ भाने किं प्रमाणमत आह ॥ मैमा

203 वद्गतिसामान्यज्ञानपूर्विके तितद्धेतुकेत्यर्थः ॥ अतएवसामान्यतोद्व्यत्वे

नज्ञाने जातेसति विशेषधर्मपुरस्कारेण जिज्ञासायां क्षिप्तपद्ये जोमरु द्वौ

मेत्यादिना विशेषतो निरूपणं क्रियते ॥ आवश्यकीति ॥ तां विना विशेषजिज्ञा

सायाः ॥ असंभवादित्यर्थः ॥ साचसंख्याव्यक्तिशक्येवसतिप्रकरणे राजपुरु

षद्वयादावपि संख्याविशेषप्रकारेणैव भानं भेदशब्देन भेदसहचरिता राम २०३

द्वित्वादिसंख्यातद्भावसहितमेकत्वमभेदैकत्वमिति: व्युत्पत्त्यासंख्यात्वे-
नैकत्वमेवोपसर्जनपदार्थे भासते अत एवालौकिकवाक्ये राजन्ङ.स्.पु
रुष६सुब्लुग्लुक्ष्यतेद्वित्वमभिप्रेत्योक्तौ न ग्रंथमवतारयति ॥ तस्मादिति ॥ उपस
र्जनव्यक्तेरित्यर्थः ॥ एकत्वात्वेनप्रतीतौसंख्यात्वेन एकत्वमात्रप्रतीतौन्या
य६ब्दोतमाहेत्यर्थः ॥ गणानामामिति ॥ बहुत्वविशिष्टानेकव्यक्तिसंख्या
नेरुत्यर्थः कपिंजलानालभेतेति ॥ विषयवाक्येनबहुत्वव्याप्यसंख्या ॥
विशिष्टकपिंजलालंभनेविधीयतेतत्रचतुरादीनांत्रयाणामेवालंभनमि
ति ॥ शंसमेवबहुत्वव्याप्यत्वस्यत्रित्वादिषुसर्वेष्ववविशिष्टत्वाद्यद्यपिसंभवमे

पु.स्. दै.का. ~~५२~~
५४

भू.सा
२.५
२०५

वालक्षण्यत्वमिति पूर्वपक्षे चतुरादीनामालंभने माहिंस्यादिति सामान्यशास्त्रवि
हित्तभिधेयस्य विशेषशास्त्रैर्वैधित चतुराद्यनंतव्यक्तीतरपरत्व स्वरूपतात्पर्यसं
कोचकल्पने गौरवात्सप्तमोपस्थितत्रित्वपरतयापि बहुवचनस्य चारितार्थ्यो
द्याद्यवादे बहुत्वव्याप्यत्वेन्त्रित्वमेव बहुवचनार्थ इति सिद्धांतितं तत्रायाद
त्रापि संख्यात्वेनैकत्वस्यैव वक्तव्यत्वं ननु हि स्तं त्वादीनां प्रप्रतीममानवि
शेषधर्मैकैकत्वमभेदैकत्वमिति व्युत्पत्तेरिति भावः ॥ निजां त्रयाणामित्ति नि
र्दिश स्तु अस्यैवार्थस्यानुवादकः पूर्वोक्तजिज्ञासाया अननुभवान्नोक्तयुक्तिर्व राम
त्तेर भेदैकत्वसंख्यार्थत्वसाधिका किंच शाब्दबोधात्मसामान्यज्ञानस्यैवका २०५

रणत्वेनान्यविज्ञानस्येत्यत्रप्रमाणमस्तीत्यत आह ॥ वस्तुतस्त्विति जिज्ञासैवेति
राजपुरुष इत्यादौ पूर्वपदार्थे एकत्वद्वित्वादिप्रकारकजिज्ञासैवेत्यर्थः न
नु भवेत्ति ॥ येन तदनुरोधेन सामान्यज्ञानस्यावश्यकतास्यादिति भावः ॥ मू
लं तु प्राचीनमताभिप्रायेणेति भावः ॥ अनुभवासिद्धत्वमपि दुर्ज्ञेयमत आह
तथात्वेवेति ॥ अनुभवसिद्धत्वेवेत्यर्थः ॥ समानप्रकारकत्वे ॥ नैवेति ॥ ननु
विभिन्नप्रकारकत्वेनेति भावः ॥ तद्धर्मप्रकारकेच्छां प्रति तद्धर्मप्रकारकज्ञा
नस्य हेतुतायाः ॥ क्लृप्तत्वादिति प्रकृतेऽपि एकत्वत्वविशिष्टएकत्वप्रकारका-
जिज्ञासां प्रति तादृशैकत्वप्रकारकज्ञानस्यैव हेतुत्वान्न तदनुरोधेन संख्या

भू॰सा सामान्यं वस्त्वपर्थ्यइति भावः॥ तत्तद्रूपेणेवेति॥ एकत्वत्वादिविशेषधर्मेणेवे
२०५ त्यर्थः एतन्न त्वं समासशक्तिव्यवस्थापनावसरे उक्तं ५५ ॥ इति भूषणसारवि
905 वृत्तौ अभेदैकत्वसंख्यानिरूपणं॥ एतद्ग्रंथनिरूपणे पूर्वग्रंथस्य संगतिं
प्रदर्शयति॥ प्रसंगादिति॥ कपिंजलानालभेतेत्यत्र विधेयविशेषणत्वेन
त्रित्वसंख्याविवक्षामाः स्मृतत्वात् स्मृतस्योपेक्षानर्हत्वरूपप्रसंगदास
म्नाबादित्यर्थः॥ ग्रहमिति॥ प्राजापत्यानवग्रहाः पात्रविशेषा भवंति तेषां
प्रत्येकं मार्जनं विधीयते तत्र यद्येकत्व॥ संख्याविवक्ष्यते॥ तदा सर्वेषां पा साम
त्राणां मार्जनं न प्राप्नोतीति भावः॥ नियमेति॥ सरूपाणामित्यादावविवक्षा २०५

सत्वेपि सौर्वत्रेनाविवक्षाधातोरित्यत्रैकत्वस्य विवक्षणादित्यर्थः ॥ अस्म
च्छास्त्रे उद्देश्यगतसंख्याविवक्षाक्षाया अनियमो मीमांसकानामप्यभिप्रेत इत्या भि २
ह ॥ इत्यस्येतेति ॥ तदातद्धितहिप्रत्ययार्थः ॥ सर्वैर्धातोर्थैर्विशेष्यते इत्यर्थः ॥ ननु
भ्वेधादिसमुदायस्य क्रियावाचित्वाभावेन धातुत्वाभावादेव तदुत्तरं तिङा
द्यनुत्पत्तेर्नोक्तदूषणं दूषणमत ॥ आहाद्धातुकेति विवक्षितत्वाद्वेति ॥
न च तदुपादानस्यैव वैयर्थ्यं तदुपादानस्य क्वचिद्विवक्षायामेव तात्पर्यात् ॥ ए
वमिति ॥ अनुवाद्यविशेषणमविवक्षितमिति नियमाभाववदित्यर्थः ॥ पशु
नायजेतेति ॥ अत्र यागस्य साधनाकांक्षायां साधनत्वेन पशुर्विधीयते पशो

संख्या
५५

म॰सा स्य विधेयमबोधकत्वेन तदुपस्थितानां पशुत्वपुंस्त्वैकत्वानां विशेषणानां वि
२०६ निगमनाविरहेण सर्वेषां विवक्षणान्नापशुकरणकस्त्रीपशुकरणकपश्व
206 नेककरणकयागादेस्तद्विधिबोधितयागीयादृष्टसिद्धिरिति एवमन्यत्रापि
विधेयमविशेषणं विवक्षणीमन्त्यागेमानाभावादिति मीमांसकसिद्धान्तस्त
न्मतानुसरणं ॥ सर्वत्रेति ॥ नास्माकं शास्त्रे नियमइत्यर्थः ॥ नियमाश्रयणे
निर्बन्धं दर्शयति इदा ॥ म्यामिति ॥ नञ्रूपस्य विधेयसमर्पकत्वेन तद्विशेषणैक
त्वस्य विवक्षणेन नकारद्वयविधानं न स्यादित्यर्थः ॥ नकारद्वयविधानाभा राम
वेयदनिर्बन्धं तदाह ॥ तथा चेति ॥ ननु वाक्यभेदेन नकारद्वयमेव विधीयत २०६

इति न नकारद्वयानुपपत्तिरत आह॥ आङ्गुणेति विवक्षमेति॥ विधेयीभूत
गुणगतैकत्वविवक्षयैवेत्यर्थः॥ तथा चैकग्रहणमेव विधेयगतसंख्या
या अस्मिन्॥ शास्त्रे विवक्षणनियमो नेति सूचयतीति भावः॥ मौलपदानि सं
योजयति॥ शब्दार्थे॥ स्वित्यादिना हेतू॥ नामिति॥ पशुनामजेत्ते सत्र विधे
य गतसंख्याया अविवक्षणे॥ सर्वपशुहननाख्यावत्त्वाद्यागानुत्पत्तिप्रसं
गः॥ गुणानुरोधेन प्रधानयागावृत्तौ प्रधानत्वाभंगापत्तिरित्यादिदोषस्तूपहे
तू नामित्यर्थः॥ सिद्धान्तसिद्धमिति॥ सिद्धान्तप्रतिपादकाकरसिद्धमित्यर्थः ५५
अनन्तत्वे दृष्टान्तमाह॥ भिन्नद्रव्यत्वेति अन्वेषणमिति॥ बहूनां यकारादीना

संख्या
५८

भू॰सा मित्यर्थः ॥ आदेशभेदवाणायेति ॥ किं चैकग्रहणमनयोः फलयोः ॥ कर्त्तृकुर्वित्या
२०८ दिलौकिकदृष्टान्तेन प्रत्याख्यातं चेति भावः ॥ वाक्यभेदादिति ॥ प्राजापत्या
२०७ नवग्रहानिति विधिबोधितनवग्रहोद्देशेन ग्रहं संमार्ष्टीत्यनेन मार्जनं विधि
यते तत्रैकत्वविवक्षायां उत्पत्तिवाक्यगतसंख्याया विरोधाद्ग्रहभेदग्रहं
संमार्ष्टीतं चैकमित्याकारकवाक्यभेदो वा तस्यापत्तेरित्यर्थः ॥ अनाकर
मिति ॥ पूर्ववत् ॥ ग्रहैकत्वदृष्टान्तेन संख्याया अविवक्षणे दोषो न्दाव
नेपि अन्येषां विशेषणानां तु विवक्षायां न किंचिद्बाधकमित्यपि वदन्ति ५८ भूस
नन्वेवमिति ॥ विध्येयगतसंख्याया विवक्षणे ॥ इति भूषणसारविवृतौ सं २०८
५८

कृदर्थविचारः

न्यायधर्म०
५८

कृ०२

त्वाविवक्षानिर्णयः॥ अवसरसंगत्यात्क्वाद्यर्थं निरूपणमितिदर्शयन्तिक्त्वा प्रत्ययादेरिति॥ फलेपिप्रत्ययर्थत्वसत्वादाह॥ भावइति॥ अस्तत्वमूतेभावेइत्यर्थः कागतिरिति॥ सूत्रेपूर्वकालसमानकर्तृकत्वाद्युपादानात्॥ पूर्वकालादीनामपिवाच्यत्वं संभाव्यत इति तदवाचकत्वेसूत्रेतदग्रहेणवैयर्थ्यमितिभावः॥ समानकर्तृत्वादीति॥ समानकर्तृकयोरितिनिर्द्धारणेसुप् पूर्वकाल इतिबहुव्रीहिः॥ समानकर्तृकयोः॥ क्रियमारूपार्थयोर्मध्येपूर्वकालिकक्रियावाचकाद्धातोः॥ क्त्वेत्यर्थः॥ अर्थाकांक्षामांकर्त्तरिक्तादिलुपस्थितेतौत द्वाधनार्थंवार्त्तिकारंभः॥ तेनचाव्ययकृतोभावार्थकत्वमेवनिर्द्धार्य्यते

व्या॰ग्रं॰
५८

भ॰सा कर्त्तुः क्त्वादिप्रत्ययवाच्यत्वे तु समानकर्तृकत्वस्यैव ब्रूयात् सूत्रोपात्तानां तु
२०८ द्योत्यत्वमेवेति भावः ॥ नन्वत्र द्योत्यत्वं संसर्गमर्यादया भानविषयत्वं तच्च
208 क्रिययोर्विशेष्यविशेषणभाव एव संगच्छते तत्रैव किं मानं मत आह ॥ अ
यं भाव इति एकवाक्यतेति समानकर्तृकयोरित्यादिसूत्राणां ध्यानुसंबंध्या
धिकारे पाठादिति भावः ॥ एकवाक्यता च विशेष्यविशेषणभाव ॥ मंत
रेण न संभवति विशेष्यत्वविशेषणत्वयोश्च सांसर्गिकविषयितानिरूपि
तत्वेन संबंध्यं विना विशिष्टबुद्धेरेवासंभवात्तां विना कथमेकवाक्य राम
त्वनिर्वाह इति भावः ॥ अन्वयेति ॥ विशेष्यविशेषणभावमंतरेणाप्येकवा २०८

मत्यर्थः ॥ नन्वेवं तत्र व्याप्यत्वस्यैव संसर्गता किं तु सामानाधिकरण्यस्या
पीत्याह सामानाधिकरण्यं चेति ॥ नातो विभिन्नकर्तृकसमानकालिकाध्य
यनादिमादायोक्तप्रयोगापत्तिः ॥ इदं त्ववधेयं ॥ समानकर्तृकयोरिति वि
हितक्त्वांतस्थले संसर्गमर्यादया सामानाधिकरण्यभानस्य सार्वत्रिकत्वेपू
र्वोत्तरकालिकत्वस्यापि वक्ष्यमाणरीत्या संसर्गतया भवेत्तथैव सार्वत्रि
कं जन्यत्वादीनां तु भानं क्वाचित्कमिति इद ॥ मुपलक्षणं ॥ मुखं व्यादाय स्व
स्वपितीत्यादौ व्यादानोत्तरमपि स्वापानुवृत्तेस्तदंशमादाय पूर्वोत्तरकाल
त्वसत्वात् ॥ क्त्वाप्रत्ययसंभवस्येति अन्यलभ्यत्वादिति ॥ सामाभिव्याहा

भ॰ सा रगम्यत्वात् ॥ प्रकृतस्यार्थक्रियमयोरितिप्रकृतस्यार्थोपपदार्थक्रियमयोरित्यर्थः ॥ अ
२१० नएवंति ॥ त्क्वः समानकर्तृकत्वादिद्योतकत्वादेवेत्यर्थः ॥ भाष्यप्रतीकमि ॥
210 ति ॥ इहकस्मान्नभवतिपूर्वंभुक्तेपश्चाद्व्रजतीतिस्वशब्देनोपात्तत्वान्ने
तिभाष्यंसमानकर्तृकत्वेनपूर्वोत्तरकालसत्वेनापादनेननुविषयः न
नुसमभिव्याहारगम्यः ॥ उक्तार्थानामप्रयोगइतिन्यायमात्र इतिभावः ॥ नन्वय
मयंन्यायोनुस्रियतेपूर्वंभुक्त्वापश्चाद्व्रजतीतिप्रयोगानुपपत्तिरितिवा
च्यंनेतत्क्रियापौर्वकाल्यंकिंतर्हिकर्तृपौर्वकाल्यमितिभाष्यकारेणैव
समाधानात्कर्तुर्विशेषणंपूर्वमिति ॥ तन्त्रावंमतांतरंदूषयितुमुपन्यस्य राम

ति ॥ यत्त्विति अन्येष्वेति ॥ तस्य क्त्वाप्रत्ययाद्वाच्यत्वेदित्यर्थः ॥ तृतीयाप्रसं
गादिति ॥ क्त्वाप्रत्ययेन कर्तुरनभिधानादिति भावः ॥ ननु अनभिहिते कर्त्त
रि ॥ तृतीयेत्यस्य अभिहिते कर्तरि तृतीया नेत्यर्थात् प्रकृते कर्तुराख्यातेना
भिधानान्न तृतीयापत्तिरित्याशंक्य निराचष्टे ॥ न चेति ॥ अनभिहित
इति न प्रसज्यप्रतिषेधोऽसमर्थसमासापत्त्यादिदोषात् ॥ तथा चाख्यातेना
भिधानेऽपि क्त्वाप्रत्ययेनानभिधानात्तृतीयास्यादेवेत्यभिप्रायेणाह पाक
क्रियाकर्तुरिति ॥ अभिहितभिन्नत्वादित्यर्थः ॥ अत एवेति ॥ अनभिहित
घटकनञः पर्युदासार्थकत्वादेवेत्यर्थः ॥ भाष्ये [illegible] नभिहितसूत्रस्थेत

स्वसमानकर्तृत्वस्य॥ अन्यथेति॥ एतत्सूत्रस्यकर्तृशक्तिग्राहकत्वे॥ समाने
ति तदुपादानाच्चकर्तृद्वयस्यैक्यरूपसामानाधिकरण्यलाभः॥ उक्तापत्तिं
निरस्यति तत्तीया॥ पादनं त्विति प्रधानभूतायाइतिक्रियाद्वयनिरूपितक
र्तृशक्त्योर्भिन्नत्वेपिप्रधानीभूततित्व॥ उं. तार्थक्रियानिरूपितकर्तृशा(
क्तेरभिधानेपिति अप्रधानक्त्वदंतार्थक्रियानिरूपितकर्तृशक्तेरनभिधा
नेपिगुणशक्तिः॥ प्रधानानुरोधेनाभिहितवन्दवात्तीति नप्रवृक्तेतत्तीया
पत्तिरिति भावः॥ प्रधानेतरमोभिति॥ हरिकारिकाया व्याख्यानंक्त्वतमेवए रा.म
वंप्रधानविषयेस्यापि अवयंपच्चैतदभ्युपेयं॥ अन्ययोक्तस्थलेत्वकः क २११

त्रैर्थैकत्वस्वीकारेणापत्तिवारणेऽपि पक्त्वौदनो भुज्यतेऽत्रत्यौदनपदोत्त
रं॥ द्वितीयापत्तिर्वज्रलेपायमानास्यात्॥ पाकक्रियानिरूपितकर्मत्वश
क्तेः क्त्वाप्रत्ययेनानभिधानात्तस्मादुक्तरीतिरेव द्वितीयावारणीर्थं॥ म
नुसर्तव्येत्याह किंचेति॥ तुमुनस्तादर्थ्यं द्योत्यं एवं च तुमुन्प्रकृत्यर्थक्रि
यायाः स्वेच्छाधीनेच्छाविषयत्वसमानकर्तृकत्वोभयसंबंधेन उपपदा
र्थक्रियायामन्वयः अनयैव दिशा ण्वुलर्थोऽपि बोध्यः॥ ५६ इति कृषणासार(
विवृत्तौ क्त्वाद्यर्थनिरूपणं॥ गृहीतशक्तिकत्वेन पदेन तत्तज्ज्ञानेन शा(
ब्दे बोधे जननीये आसत्तिमाकांक्षायोग्यतातात्पर्यज्ञानसहकारि

भूः सा तत्रा आसत्तिरव्यवधानेन पदार्थोपस्थितिः सा च स्वरूपसती हेतुः॥ तां विना
२१२ शाब्दबोधानुदयादस्ति शाब्दबोधे कारणत्वं २ आकांक्षा वत्तात्तद्बोधजनक
तत्त्व समभिव्याहाररूपा समभिव्याहारज्ञानेकविध तथा हि प्रकृत्यर्थ प्र
कारककर्मादि विशेषकबोधप्रकृत्यव्यवहितोत्तरमादिपदघटितसम
भिव्याहार आकांक्षा ग्रामकर्मकैककर्तृकगमनादिशाब्दबोधे द्वितीयां
व्रज तग्रामपदघटितत्वेस्यादिसमभिव्याहारः॥ व्रजसंशेपूर्वत्वोत्तर॥ त्वाघटितआ
कांक्षा क्रियाकारकवाचकपदानां षष्ठ्यंतस्य प्रातिपदिकार्थे वाचकपदानां सम
भिव्याहार॥ आकांक्षा एवमन्यत्राप्यूह्या आकांक्षायाश्च ज्ञानं कारणं बोधश्च ग्राम
२१२

स्वव्युत्पत्त्यनुसाराद्ग्राह्यः तेन घटः कर्मत्वं आनयनं कृतिरितिसमभिव्याहा
रस्थापितयाव्युत्पन्नानामतं आकांक्षा नान्येषाम तेयोग्यताचतात्पर्यविषयी
भूतसंसर्गेधर्मेसंसर्गतावच्छेदकसंबंधेनिष्ठात्वं तदभावप्रतियोगितावं
च्छेदकत्वाभावः तज्ज्ञानं कारणं संसर्गज्ञानं तु तात्पर्यविषयतयाकांक्षा
विषयतयावासुलभं ॥ यद्वाप्रति ॥ बंधकतावच्छेदकारूपा योग्यतानिश्चयो
बोध्यप्रतिबंधक इति भिन्नाभिन्नेजकानुरोधेन बाधबुद्धेरनुमितित्वादि
कं विशिष्यैवप्रतिबंधतावच्छेदकं ॥ एवंचलाघवात्संशयानिश्चयस्वरूपं
योग्यताज्ञानमेवशाब्दबोधेकारणं नतु शाब्दबोधेऽपवाधबुद्धेः पृथक्प्र

पातंजलस्फोट॰
२८

म॰सा
२१३
213

तिबंधकत्वमप्रिकल्प्यनीयमित्यपिवदंतिघटमानयेत्यादौअन्यबोध्यनेरितत्व
ज्ञानेघटादिबोधानुदयेनतस्यप्रतिबंधकत्वेगौरवात्तथाबोध्ये॥इदंनावच
मेतदर्थप्रतीतिरुच्छयावक्तोच्चारितमित्याकारस्तात्पर्यग्रहोहेतुः॥नानार्थप
दस्थलेपदविषयोपिसः॥तद्ग्राहकंचप्रकरणादिकंमौनि।श्लोकेपितस्यपस्त
कस्थमुच्चारणमस्त्येवेतिनदोषः॥केचित्तु॥शाब्दबोधेनयोग्यताभ्रमःकारण
त्वंनवायोग्यतानिश्चयःप्रतिबंधकः॥तथानवाबाधज्ञानंप्रतिबंधकंअ
यस्सेतिपतेः जन्तु [illegible] पराद्वैपरमात्मसाक्षीकृताःसंख्यायाएषवं॥
ध्यामृतोयातीत्यादितोबोधदर्शनात॥किंचवह्निनासिंचतीत्यतोबोधा॥ राम
२१३

भावेतद्वाक्यप्रयोक्तुर्द्रवेणार्वाह्ननाकर्णयेसेकंवृवीषीस्तुपहासः॥ श्रोतृभिःकि
ममाणेसंगतःस्यात् द्राविडभाषाश्रवणोत्तरंपश्चात्तस्येवमूकत्वैवस्यात्नचै
तादृशेषुनशाब्दबोधः॥ किंतुपदार्थोपस्थितिमात्रमितिवाच्यंसर्वत्रैवमेवाप
त्तेः नचप्रवृत्तिप्रतिविशिष्टज्ञानस्यहेतुत्वानुरोधेनशाब्दविशिष्टज्ञानस्यहे
तुत्वानुरोधेनशाब्दविशिष्टज्ञानसिद्धिरितिवाच्यंदुःखद्वेषेच्छासुखादावपि
तुल्यतरीस्यात्तद्धेतुत्वेनसत्यपिवाध्यमिच्छयेभिध्याभिशापगालिदानरूपका
दिकाव्यजदुःखसुखाद्यनुरोधेनतत्रापिविशिष्टज्ञानावश्यकत्वात्॥ अन्य
थाश्रुतान्नानांमुखलमाश्रयश्चंद्रत्वमाश्रयद्दत्यतोपिमुखेचंद्रइत्यादितद्व

कर्णस्फोट
५८

सू॰सा
२१४
२१४

चमत्कारापत्तिः परंतु योग्यतासत्वे तदुत्तरवाक्यजन्यशाब्दबोधे प्रामाण्यनिश्चयः
तदुत्तरप्रवृत्तिः संवादिनीति अत्रैव योग्यताज्ञानोपयोगो न तु बोधे तथा तात्पर्य
निश्चयोपि न बोधे हेतुः॥ शुकादिकोबोधो देवताप्रसादेन पूर्वजन्मसंस्कारेण वा मू
र्खबालकस्थतोत्तमकाव्यादुक्तुतात्पर्यव्यतिरेकनिश्चयेपि बोधोदयेन व्यभिचा
रात् न च शुकवाक्ये एश्वरं॥ तात्पर्यं तस्य फलेकोन्नेयत्वेन प्राक्दुर्ज्ञेयत्वात्॥ किं
चास्मादर्थ॥ इयविषयको बोधो जायते तात्पर्यं तु क्वेति न जानीम इति सर्वजना
नुभवविरोधान्न तस्य हेतुत्वमत एव पयआनयेत्युक्ते प्रकरणात्तस्य दुग्धं जलं
वानेयमिति प्रश्नः संगच्छते तात्पर्यनिर्णयोपयोगश्चतत्त्वाने प्रामाण्यनिश्चयद्वारा राम

२१४

प्रवृत्तोक्तविदनेकपदर्थस्यान्वयप्रयोगप्रत्येकस्याध्याहानन्तरमत्र चे॰ त्याहुः नै
यायिका वाक्ये शक्तिं न स्वीकुर्वन्ति मीमांसका अपि स्से लेंणामेव स्वीकुर्वन्ति त
न्मतं निराकर्तुं स्वसिद्धान्तं व्यवस्थापयितुं स्फोटनिरूपणमित्यनुशयवान्मूल
मवतारयति सिद्धान्तेति ॥ यद्वा शक्तिग्राहकेण व्याकरणेन प्रकृतिप्रत्ययादीनां
शक्तिर्बोधिता तन्न संभवति आशुतरविनाशिनां वर्णानां मेलनाभावादि
त्याशंकानिराकरणमस्फोटनिरूपणमित्याह सिद्धान्तेति ॥ तथा चोपोद्घातसं
गतिरत्रेत्यवधेयं ॥ अनर्थकमिति ॥ निष्प्रयोजनकमित्यर्थः ॥ दुरर्थकमिति
तदुपादाने तदर्त्तिनिक्तानामसंग्रहापत्तेरिति भावः ॥ समाधत्ते तन्नापीति ॥ अ

भ॰सा
२१५
25

न्यंघोवर्णादिस्फोटानामित्यर्थः ॥ तदुपादानंवाक्येत्यस्योपादानंस्फोटत्वंचस्फुटत्यर्थो
स्मादितिव्युत्पत्त्यार्थप्रकाशकत्वंतथाचार्थबोधकत्वरूपशक्तिमत्वमितिपर्यवस्य
तिप्रकृतिप्रत्ययादीनांतत्वाभ्युपगमेवर्णस्फोटः ॥ पदादीनांवाचकत्वाभ्युपगमेपदा
दिपस्फोटइतिव्यवहारः वर्णस्फोटादीनामाकांक्षानिवर्त्तकत्वाभावादवास्तव
त्वंकेवलंशास्त्रप्रक्रियानिर्वाहायतत्स्वीक्रियतेपानमार्थिकत्वंतुवाक्यस्फोट
स्यैवतस्मादेवव्यवहा ॥ सोपयोग्यर्थप्रतीतेः ॥ तत्रेतितेषुमध्येइत्यर्थतत्रेत्यस्य
वर्णस्फोटेत्यनेनान्वयः ॥ विप्रतिपत्तिरिति ॥ विरूद्धनानाधर्मावच्छिन्नाको
टितारव्यविषयताबगाहिज्ञानरूपसंशयीययावदर्थोपस्थापकंवाक्यमि

राम
२१५

त्यर्थः॥ संशयं प्रयोजकत्वाच्च त्वं वा सा असाधुशब्दांतर्गतवर्णावाचकताविचारस्याप्रस्तुतत्वं मत्वाह॥ साध्विति॥ अत्र च प्रयोगसमवायिवर्णस्मारितवर्णत्वावच्छेदेन वाचकत्वमन्येषां नशाब्दिकानां इति ध्येयं संशयस्य समानधर्मिकत्वसंपादनपूर्वकं विप्रतिपत्तिशरीरमाह॥ शब्दान्तर्गतेति॥ स ध्वंतर्गतवर्णास्मारितत्वादित्यर्थः॥ अन्येषां नैयायिकानां तैः स्मारितानामेव वाचकत्वस्वीकारादिति॥ भावः॥ यथाश्रुतं मूलोक्तविप्रतिपत्तिमनुस्याह साधुशब्द इत्यादि नन्वेतावता बोधकत्वमेवागतं न वाचकत्वं मतं आह वाचका॥ इति॥ तस्यैवेति॥ बोधकत्वस्यैवेत्यर्थः॥ नैत्विति॥ न वाचकत्वादित्यर्थः॥ नैयायिकमतं दूषयितुमादौ

वर्णस्फोटः

६०

भू·सा तन्मतमुपन्यस्यति॥ यत्त्विति॥ ननु तिबादिस्थानिनामप्यनुबन्धभेदेन भिन्न
२१६ त्वान्नोक्तरीत्या तेषामपि वाचकत्वमत आह॥ एषामिति॥ धातूत्तरप्रत्ययलोपे पित
216 दर्थबोधकानुप्रयुज्यमानोत्तरप्रत्ययेनार्थबोधान्न दोष इत्यत आह॥ ब्रवलेति
आदिना लिङ्लुगादिसंग्रहः॥ नेरिति॥ आदेशैरित्यर्थः॥ उक्तदोषमाशंक्याह
लत्वस्येति॥ वस्तुतस्तदपि न समीचीनं तत्र लत्वस्य सकललकारव्यक्तित्वादतिप्र
सक्तत्वान्न वाचकतावच्छेदकत्वमिति॥ अव्यभिचाराच्चेति॥ धात्वर्थप्रकारक
कृत्युपस्थितौ लत्वावच्छिन्नधर्मिकशक्तिग्रहस्य नियमतस्त्वे तिप्त्वादीनां शक्तता राम
वच्छेदकत्वे तु तिप्त्वावच्छिन्नशक्तिग्रहं विनापि तसादिधर्मिकशक्तिग्रहा २१६

त्कृतिबोधेनादेशवाचकत्व॥ तामतेव्यभिचारः॥ सुप्रसिद्ध एवेतिभावः॥
ननुकार्यतावच्छेदककोटावव्यहितोत्तर॥ लनिर्देशादादेशानांवाचक
त्वेपिनव्यभिचारइत्यतआह॥ लः कर्मणीति आहुरिति॥ स्थानिनोवाचक
त्वंसूत्रात्साक्षादेवायाति॥ आदेशानांतुस्थान्यर्थाभिधानेतिस्मामेनेतित
स्मादादेशिनामेववाचकत्वमस्यमितिभावः॥ स्वसाध्यकेति॥ स्वमतसाध्य
केसर्थः॥ व्यवस्थितेरिति॥ मूलंव्याचष्टेव्यवस्थानुरोधादितिपंचमपंत
त्रयस्यपूर्वकारिकास्यबोधकपदार्थेन्वयः इतिभावः॥ प्रमाणेनपदार्थ
निर्द्धारणंव्यवास्थातदन्यथानुपपत्तेरित्यर्थः॥ शक्तिभ्रमादितिलत्वावच्छि

वर्णस्फोट.
५०

भू. सा.
२१७
217

न्त निष्ठवाचकत्वस्य तत्रारोपादित्यर्थः ॥ मानाभावादिति ॥ विषमबाध्यस्यैव भ्रमत्वे
तत्र तथाप्रवृत्तेर्बोधकत्वशक्तेस्तत्राभावादिति भावः ॥ यदुक्तमादेशानां वाचक
त्वे गौरवमिति तत्राहादे ॥ शिनामिति व्यवस्थेति ॥ निर्द्धारणानुपपत्तेरित्यर्थः ॥ अ
नुशासनत्वस्य विनिगमनाविरहात्सर्वत्रैव सत्वमिति भावः ननु तथाप्यादेशाप्या
देशापेक्षया कतिपयानामादेशिनां वाचकत्वे लाघवमस्त्येवेत्यत आह ॥ व्यभि
२६ चारश्चेति ॥ आदेशिनां वाचकत्वे स्मर्त्तॄणां कल्पनीयमेतत्र गौरवं तत्राधिकमित्या
ह ॥ तथा चादेशिनामिति ॥ ननु तन्मतेन बोधकत्वरूपा शक्तिः किं तु संकेत एव
तथा च पाणिन्यादिसंकेतस्य ॥ स्थानिष्वेव सत्वान्नादेशानां वाचकत्वं तथा राम २१७

स्मारणे गौरवं तु प्रामाणिकत्वान्नदोषावहमित्यत आह॥ साध्यकांतरमिति मुख्येति
मुख्यत्वं च ग्राहकांतरानपेक्षत्वं प्रांथमिकत्वं वा सच्चेति॥ व्यवहारजन्यशक्तिग्रह
श्चेत्यर्थः॥ तिङादिष्वेवेति॥ आवापोद्वापाभ्यांपश्चात्तद्घटकनिवादिष्वेवश
क्तिनिर्णयेन तुल्यादिघुतद्घटितत्वादिति भावः॥ ननुव्यवहाराद्घोडदेघ
टितवाक्यस्यतद्घटकपदस्यवाशक्तिग्रहोभवति नतु तद्घटितवाक्यस्य
तद्घटकपदस्यवेतितत्रशक्तिग्रहोनुशासनादेवेत्येवव्याममनुशासनंचस्य
स्यान्यर्थबोधकमिति। ।स्यानिनोवाचकत्वमाप्तमेवेत्यत आह॥ किंचे
ति॥ तद्धेतोरेवत्वे किं तेनेतिन्यायः॥ उभयोर्हेतुत्वे गौरवमेवैतन्न्यायमू

वर्णस्फोट०
६०

भ॰सा त्वं तं संगमयति ॥ लकारस्येतिस्यादिति ॥ भवनकर्तृबोधः स्यादिति भावः ॥ असा
२१८ धुत्वज्ञानं तु न प्रतिबंधकमिति प्रागेवोक्तं तादृशेति ॥ एककर्तृकसत्ताबोधे इत्य
218 र्थः समभिव्याहार ॥ आनुपूर्वीति शेषः ॥ आवश्यकत्वात् ॥ लकारेण बोधजन
ने प्युक्तसमभिव्याहारस्यावश्यापेक्षणीयत्वादित्यर्थः वाचकत्वेति ॥ वाचक
त्वरूपा शक्तिरित्यर्थः ॥ अन्यथेति ॥ उक्तसमभिव्याहारस्य वाचकत्वानभ्युप
गमे इत्यर्थः ॥ गौरवमिति ॥ यद्यपि भवतीति समभिव्याहारस्य हेतुत्वं त्वकल्प
नमुभयवादिसिद्धमन्यथा भूतीत्यस्मादपि बोधापत्तेः ॥ तथापि स्थानिनां वाच
कत्वमिति ॥ मते आदेशेन स्थानिनां स्मरणं ततो बोध इति दृशं गौरवं दुःप राम
२१८

रिहत्वमेवेति भावः॥ नन्वेतावता समभिव्याहारस्य वाचकत्वमायातं न वर्णा
नामत आह॥ तथा चेति प्रयोगांतर्गतेति॥ प्रयोगांतर्गतत्वात् प्रत्ययघटका
वर्णा इत्यर्थः॥ तेषां वाचकत्वे आनुपूर्वीवाचकतावच्छेदिकेति लाघवमे
वविनिगमकमिति भावः॥ ननु तथापि लकारस्य वाचकतायां लः कर्मणी
त्यनुशासनमेव पक्षपातीत्यत आह॥ अपि चेति लत्वसिद्धेरिति॥ उभयत्रापि स्था
निभूतलकारस्यैक्यादिति भावः॥ इत्यस्त्विति॥ तथा च कृतेराश्रयतयापरशा
नजन्ये त्वयात्कृत्याश्रयरूपकर्तृलाभः॥ एकपदोपस्थितयोरपि संख्याक
र्त्रोरन्वयदर्शनादिति भावः॥ अन्यथेति॥ निराकांक्षेपि कृत्वरूपोद्देश्यता

८१

ल॰ सा २१९ नधेदकसत्त्वमात्रेणशास्त्रप्रवृत्तिस्वीकारेइत्यर्थः ॥ ८० इत्याद्यनुरोधादिति ॥ अन्य
थाशानजर्थस्यदेवदत्तादावभेदान्वयबोधः सर्वानुभवसिद्धोपह्नुवीत इति
भावः ॥ पचतिकल्पमिति ॥ यदितुसत्त्वप्रधानानिनामानीतिनिरुक्तकार ॥ इत्यवि
शेषाद्बोध्यजनकमेवनामत्वंनामत्वमित्यभिप्रायेगोणेतिबोध्यं ॥ प्रभेदान्वययो
गितेति ॥ तन्मतसंभावितनामजन्यप्रतीतिमुख्यविशेष्यकर्तृदेवदत्तादावभेदान्व
यबाधाभावादितिभावः लक्षणेस्वस्वत्वस्येतिशेषः ॥ आपन्नेति ॥ तथानिष्टापत्ते
रितिभावः नन्वादेशानांवाचकत्वेलः कर्मणीत्यादिस्थानीयस्थानिशक्तिप्रतिपा सा॰म
दकसूत्राणांवैयर्थ्यमतआहलः ॥ कर्मणीति ॥ उक्तमिति ॥ आख्यातशक्तिनिरू २१९

सखण्डपदवाक्यस्फोट

पर्यवसन्ने इतिशेषः॥ एवंच श्रूयमाणानां प्रकृतिप्रत्ययवर्णानां वाचकत्वं वर्ण
स्फोट इति पर्यवसन्नं॥ ६२ इति वर्णस्फोटनिरूपणं॥ वर्णस्फोटनिरूपणानंतरं प
दस्फोटनिरूपणे उपजीव्योपजीवकभावसंगतिरिति सूचयन्मूलमवतारय
ति॥ एवमिति॥ उक्तरीत्येत्यर्थः॥ ननु प्रयोगांतर्गतानां वर्णानां वाचकत्वे पदस्फो
टसिद्ध्युपयोगिभावार्थमाह॥ अयंभाव इति वर्णानामिति॥ आनुपूर्व्या न भि
न्नानामित्यर्थः॥ एतेषामवाचकत्वे आनुपूर्वीविशेषरूपपदस्य वाचकत्वं
दुरुपपादमिति भावः॥ ननु समुदायस्य प्रत्येकानतिरिक्ततया प्रत्येकावृत्ति
वाचकतायाः समुदायवृत्तित्वेमानाभावाद्वर्णानां वाचकत्वे नैवमिवा

भ॰सा ॰हानन्तपरवाच्चकतेत्याशंकां निरासितुं वर्णोवाच्चकतां निरस्यति ॥ प्रतिवर्णमि
२२० ति अनुभवविरुद्ध[illegible]त्वादिति ॥ घटशब्दादेतमर्थं प्रत्येमीत्येवानुभवो न तु
२०२ घकारादिभ्य इति भावः ॥ दूषणांतरमप्याह प्रत्येकमिति ॥ तथा च समुदितानां
मेव वाचकत्वं स एव चास्माकं पदशब्दव्यवहार्य इति भावः ननु वर्णानां
न प्रत्येकं वाचकत्वं गौरवात् ॥ किं तु समुदायस्य तथा च समभिव्याहृतव
र्णानां वाचकत्वोपन्यासो व्यर्थस्तत्र आह ॥ एतच्चेति ॥ समभिव्याहृतवर्णानां
वाचकतामात्रः पदस्फोटत्वे हेतुत्वं चेत्यर्थः ॥ चरमवर्णेति ॥ पदांतदींतवा साम
र्त्तीत्यर्थः ॥ अंतवर्णे एव शक्तिस्वीकारे हेतुमाह ॥ व्यासज्येति ॥ तत्त्वं च स्वाव २२०

छिन्नप्रतिमोगितात्क भेदसामानाधिकरण्ये चरमवर्णव्यवहितो नरमेववोधो

दयेनान्यत्र तत्त्वेमानाभावइतिभावः॥ननुतस्यैववोधकत्वेपूर्ववर्णाना॥

मनुपयोगेस्तावन्मात्रश्रवणादप्यर्थवोधापत्तिरत आहह॥पूर्वपूर्ववर्णेतिम

तांतरेति॥वर्णानामवाचकत्वेतत्समुदायरूपपदस्यसुतरामवाचकत्वमिति

मन्मतांतर तरखंडनायेत्यर्थः॥उक्तमिति॥मूलेइतिशेषः दूषणांतरमाह

रामोस्तीतिवोधापत्त स्येति॥पूर्वपूर्वसंस्कारसहकारोच्चारणासमयेपिसत्वा

दापत्तिरितिभावः तदानीमुद्बुद्धसंस्कारोनास्तीत्यपिशपथनिर्णेयमितिध्येयम्

ननुवर्णसमुदायः॥पदमितिपदस्फोटवादिनांमतंवर्णा॥समुदायएवतावन्न

संभवतिआशुविनाशिनांतत्रापिक्रमिकाणांमेलनाभावेनसमुदायाभा

सं.प.वा. स्फोटः ६२

भू.सा भावात्॥ नाप्यव्यवहितोत्तरत्वसंबंधेन पूर्वपूर्ववर्णविशिष्टत्वं अविद्यमानास्याव्यव
२२१ हितोत्तरसंबंधाभावात् नापि वर्णसमवेतं पदार्थोत्तरं मानाभावात्॥ कथं पद
221 स्फोटसिद्धिरित्यत आह॥ दिग्भागिति॥ तदर्थस्तु वर्णसमुदायः पदं न वर्णा
इति प्रतीतेर्वर्णातिरिक्ता न तत्समुदाया ~~व्यवहितोत्तरमेव वोध्योदय्ये नान्य च तस्य~~
~~त्वे मानाभाव इति भावः नन्वेत~~ त्वकपदसिद्धिः अत एव पदे वर्णा इति व्यवहा
रः नित्या वर्णा इति पक्षे प्युच्चारणानुसंधानवशात् पूर्वापरीभूत ~~त~~ त्वं वोध्यं तत
था च वर्णसमुदायः पदं तदेव वाचकमिति पदस्फोटनिष्कर्षः पूर्वं शाब्दं पदमि
ति मतं गृहीत्वा प्रकृतिप्रत्ययघटकवर्णसमुदायरूपपदस्य वाचकता उक्ता राम
इदानीं तु पाणिनिसंकेतितसुप्तिङं तपदघटकवर्णसमुदायस्यैवेति भेदः॥ सर्वे २२१

ति॥ वर्णानां निरूपणे स्थापनप्रस्थावेदं भाष्ये उक्तं पदं घटको प्रकृतिप्रत्ययौ न वा
चकौ विशिष्टज्ञानाभावादित्यनुमाने निश्चितसाध्यवत्वेन साध्यवता एवं दृष्टां
तत्वमिति निरूचनमव्याजेनेत्युक्तं अत्र चाप्रस्तावित्यर्थः॥ विभागः॥ पार्थक्यं क्रमप्रा
प्तं वाक्यस्फोटस्य निरूपणमित्यभिप्रेत्य मूलमवतारयति सु॥ प्तिङ् ते तिसमुदामेति
पदसमुदायरूपे वाक्ये इत्यर्थः॥ एवमिति॥ वाक्यशक्तिवदित्यर्थः विशिष्टस्य
शक्तरूपेण अज्ञायमाने पुष्पवत्कं लक्ष्येकसमुदायवृत्यन्वयैति समुदायस्य
वाचकत्वग्रहेणेत्यर्थः बोधात्॥ पूर्वपदार्थविशिष्टोत्तरपदार्थबोधात्॥ त
त्रापि॥ सुप्तिङन्तपदेष्वपि यथा नीत्या प्रकृतिप्रत्ययसमुदायात्मकपदस्फोटसिद्धि

इति पदस्फोटं दृष्टान्तीकृत्य वाक्यस्फोटं साधयतिवस्तुतस्त्विति ॥ तथा च वाक्यार्थबोध
देव प्रवृत्तिनिर्वाहात्तत्रैव व्यवहारात्तस्यामेव शक्तिनिर्णयात् ॥ प्रवृत्तिनिर्वाहक
विशिष्टज्ञानाजनकपदार्थोपस्थितिमात्रजनकपदस्फोटकल्पनानान्याय्या अतएव
वाक्यस्फोटोतिनिष्कर्षइतिमूलेष्वुक्तं ॥ अन्यथेति ॥ वाक्यशक्त्यनुपगमेइत्यर्थः
तादृशेतिका । वाक्यशक्तिज्ञानरहितस्यापीत्यर्थः तथैव व्युत्पन्नानां तस्यापिश
क्तिग्रहे बोध इष्ट एवेति भावः ॥ बोध्यप्रसंगः ॥ घटकर्मकानयनानुकूलकृतिमा
नास्तीति बोध्यापत्तिः ॥ पदवृत्तिज्ञानजन्यपदार्थोपस्थितेः सत्वादिति भावः ॥
घटमानयेत्यत्रैवेति ॥ अत्रापितादृशव्युत्पत्तिरहितस्येत्यनुषज्यते ॥ सत्यपी २२२

ति ॥ तथा च तात्पर्यज्ञानादिरूपशाब्दबोधकारणसत्त्वेऽपि वाक्यशक्तिज्ञान
रूपकारणाभावान्न बोधाभावइति वाक्यशक्तिरावश्यकेति भावः ॥ कारणताग्रा
हकं व्यतिरेकसहचारं प्रदर्श्यान्वयसहचारं प्रदर्शयति वाक्यशक्तिव्यवस्था
पयति तत्रैवेति घटमानयेत्यत्रैवेत्यर्थः ॥ विभक्तेस्तत इति पूर्वं परं चेत्यर्थः
ज्ञानवत् ॥ इति तादृशसमभिव्याहाररूपाकांक्षाज्ञानं कारणं न तु स्वरूपसत्तः
कारणत्वमिति भावः ॥ तादृशसमभिव्याहाररूपाकांक्षाज्ञानस्य बोधहेतुत्वं
तवाभिमतं यत्तदेवास्माकं वाक्यशक्तिरूपवाक्यस्फोटः ॥ परिभाषाभेदो न
वस्तुभेद इत्याशयेनाह ॥ तर्हीति ॥ ननु पदार्थोपस्थितिजनकत्वारूप।

स.प.वा. स्फो॰र॰
६३-६४

भ॰सा
२२३
223

शक्तिर्न वाक्ये किं तु पद एवेत्यत आह॥ ज्ञानकरणत्वस्यैवेति॥ न च वाक्यार्थ
स्य नानात्वाच्छक्त्यानंत्यं वाक्यस्फोटवादिमते इति वाच्यं प्रामाणिकगौरवस्या
दुष्टत्वाद्वोक्तशक्तिग्रहाव्यवहितोत्तरशाब्दप्रति वाक्यशक्तिज्ञानस्य हेतुत्वा
देव वाक्यार्थज्ञानस्य पदशक्तिज्ञानमादाय संभवेपि न व्यभिचारः॥ घटमा
नयेत्यादौ घटविशिष्टकर्मत्वविशिष्टानयनविशिष्टकृतिबोधो भवत्विति व
क्तिच्छारूपतात्पर्यज्ञानस्य हेतुत्वात्प्रकारसंसर्गादीनां पूर्वं ज्ञानमपेक्षितमिति चो
दनेयिना निर्वाहः॥ इति ध्येयं वाक्यशक्तिं प्रमाणयितुमाह युक्तं॥ चैतदिति॥ एत्त
त्वाक्यशक्तित्वव्यवस्थापनमुक्तत्वमेव प्रदर्शयति॥ मात्रे सामान्येव त्तिज्ञान

ना
२२३

स्यादिति ॥ विषयतासंबंधेनवृत्तिज्ञानजन्योपस्थितेरित्यर्थः ॥ लाघवादिति ॥ घ
टशाब्दबोधे घटपदनिष्ठवृत्तिजन्योपस्थितेर्हेतुत्वे एवं नानाशाब्दार्थयोर्ना
नात्वादनंतकार्यकारणभावप्रसंगेन गौरवादिति लाघवाद्विषयतासंबं
धेनयस्योपस्थितिर्घटादेस्तस्यैव शाब्दबोध इति नीत्या कार्यकारणभा
भा॰ ५ वः स्वीकार्य इति भावः ॥ अन्येतु अन्वयव्यतिरेकाभ्यां समभिव्याहारज्ञा
नस्यैव शाब्दधीहेतुत्वं न तन्निष्ठबोधजनकत्वरूपशक्तिज्ञानस्य
पदशक्त्यैव वाक्यार्थबोधनिर्वाहादिति क्व वाक्यस्फोटसिद्धिरिति वदं
ति प्रकारांतरं वक्तुमग्निमग्रंथस्याशयोनाह ॥ नन्विति ॥ अपूर्वत्वा

स.प.ना. स्फोट
९३-९४

भू॰ सा
२२४

त्॥ शाब्दबोधात् प्राग्वाक्यार्थस्यानुपस्थितत्वादिसर्थः॥पदेसम
मितिमूलाशसंप्रकाशमतिपदे॥एवेति॥पदानामेवान्वितपदार्थे
शक्तित्वमभ्युपगमसामान्यरूपेणाः ज्ञातः॥अतएव घटादिपदादन्वि
त घटाद्युपस्थितौ नियमेनतत्स्मृतियोग्याकांक्षासंभवति किमन्वि
तोघटः॥किमन्वितं कर्मत्वमित्याकारासामान्यप्रकारकज्ञानस्य
विशेषधर्मप्रकारकजिज्ञासाजनकत्वात्॥विशेषरूपेणाज्ञानेत्व
मादिपदसमभिव्याहारोनियामकोअतएवतस्यशाब्देभावे॥यदव
ति विषयत्वात्॥अशक्यस्यापिभानेतिप्रसंगात् १ अशक्यभानभि

राम
२२५

यात् तत्र तदभ्युपगमात्॥ तथा च पदशक्त्यैव संसर्गभानोपपत्तौ न तत्
त्र वाक्यशक्तिगुरुत्वादिति तन्मते तथा चान्विताभिधानमतेऽपि पदे
वाक्यार्थशक्तिग्रहासंभवः समानवृत्त्यर्थः॥ ज्ञातेति॥ पदार्थानां
प्रागुपस्थित्या तत्र शक्तिग्रहसंभवादिति भावः॥ अज्ञातैवेति॥ कुत्र
शक्त्यभ्युपगमस्तु वृत्तिविशिष्टस्यैव शाब्दे भानमिति नियमरक्षायै
इति भावः॥ पदार्थवदिति॥ सप्तम्यांतावृत्तिः वाक्यार्थेऽपि संसर्गेऽपीत्यर्थः
तद्ग्रहः॥ शक्तिग्रहः लक्षणशब्दस्य चिह्नादौ प्रसिद्धेः प्रकृतानुपयो
गात् प्रकृतोपयोग्यर्थे परतमात व्याचष्टे लक्ष्यत इति॥ तद्ग्रह इति
वाक्यार्थनिरूपितशक्तिग्रह इत्यर्थः॥ घटमानयेत्यादिवृद्धव्यव

स.प.वा. स्फोट०
५३-५८

न्य:सा
२२५
225

हाराद्यस्यपदे पदार्थे शक्तिनिर्णयस्तस्य तद्वाक्यश्रवणोपदैः पदार्थोपस्थिंदिस सा १
मेव ध्यानेमनस्यात्तत्संसर्गोपस्थितिर्नोनुपन्नापरं त्वनुमानमस्य संशयात्मक
स्यापि संभवान्निश्चयार्थे शब्दादनः मानमांपश्यते: ॥शाब्दबोधास्माङ्.नि
यमेनसत्वेमानाभावोत्त आह ॥वामस्तु तत्स्विजितङ्गहः ॥विशिष्टवाक्यार्थश
क्तिग्रहः तथाच व्यवहारात्पूर्वं वाक्ये एव शक्तिग्रहेण तस्यैव शाब्दबोधहेतु
त्वावधारणात्तादृशवृत्तेश्च वाक्यज्ञानेस्वाश्रयविषयकत्वस्वविषयोद्बुद्ध
संस्कारसामानाधिकरण्योभयसंबंधेन वैशिष्ट्यस्येदानीतनवाक्यज्ञानेप्य
क्षतत्वान्नवृत्तिज्ञानस्यशाब्दधीहेतुतायांव्यभिचारसंबंधचारः मध्ये वाक्या॰
र्थोपस्थितेरनपेक्षणाच्च नोक्तदोषावसानः स्वंवृत्तिः नातोनाजहीतवृ साम
२२५

त्तिकस्य बोधो नापि विस्मृतवृत्तिकस्य नापि तत्तद्वाचकपदाज्ञानवतो नापि
घटपदाश्रयत्वेनोपस्थिताकाशस्य जनकतयोपस्थितेचैत्रादेश्च बोधः
स्मृतिकल्पकोबोधः संस्कारकल्पकाचवृत्तिस्मृतिरेवेति भावः॥ ननु
तर्हि पदस्फोटस्यानिरालंबनतापत्तिस्तत आह आवापोद्वापाभ्या॥मिति॥संग्रह
त्यागाभ्यामित्यर्थः॥ तद्ग्रहः प्रत्येकपदशक्तिग्रह इत्यर्थः॥ तथा च प्रत्येकपद
शक्तिग्रहसहकारेणाकांक्षादिवशाद्वाक्यार्थविषयकोबोधस्तदा पदस्फो
टो यदा तु तन्निरपेक्षैयैव वाक्यशक्तिज्ञानादेव शाब्दबोधस्तदा वाक्यस्फो
टः॥ शास्त्रप्रक्रियामात्रोपयोगिप्रकृतिप्रत्ययात्मकवर्णस्फोटः इति विवेकः ६२-६५
भावादिति॥ तन्मते गभीरायां नद्यां घोष इत्यादौ प्रत्येकपदशक्त्यास्व शक्यसं

स·प·वा· स्फो॰८० ५५

भ॰सा वंधरूपलक्षणया नानिर्वाह इति स्ववोध्यसंवंध्यसंवंधरूपलक्षणा
२२६ भ्युपगमेन वाक्यलक्षणामंगीकुर्वंतिषयावैतत्तयोक्तं प्राक्॥ पक्षद्वय
मिति॥ पदवाक्यभेदेन पक्षद्वयमापन्नं स्फोटरूपं द्वयमित्यर्थः॥ अनुपप
त्तिमेवाह॥ उत्पत्तेरिति॥ नित्यतावादिमते त्वाहाभिव्यक्तेरिति॥ तथा-
चोत्पत्तिपक्षे ये जनकाः कंठाद्यभिघातादयस्त एवाभिव्यक्तिजनका
नित्यपक्षेऽभिव्यक्तेरपि विभुविशेषगुणतया स्वोत्तरोत्पन्नगुणनाश्यत्वा
त्तद्विशिष्टवर्णानामपि युगपदवस्थानासंभव इत्यर्थः॥ नन्वस्तु वर्णानां
युगपदानवस्थानं ततः॥ प्रकृते किमायातमत आह वर्णेति॥ समूहेति॥ स्ता राम
नासंभवंति॥ आशुविनाशिनां क्रमिकाणांमेलनासंभवेन पदवाक्यरू २२६

अखण्डपदवाक्य
स्फोट नि०
८८

पविषयस्यैवाभावेनप्रत्यक्षव्यक्तिमहयोरसंभवादित्यर्थः॥अभिव्यक्तिप
क्षमादायसमाधत्ते॥उक्तैवर्णप्रत्यक्षेति॥एतन्नयेऽभिव्यक्तिगतमेवपौ
र्वापर्यरूपाव्यवहितोत्तरत्वंवर्णेष्वारोप्यतथोक्तः॥अतएवोपस्थितिवि
शेषणतमानिवेशःकृतः॥तच्चाव्यवहितोत्तरत्वंनत्वरूपंलक्षणंचो
क्तोप्राक्‌इत्यंवपूर्वपूर्वापूर्ववर्णांशेऽलौकिकस्यवनमवर्णांशेलौकिक
प्रत्यक्षस्यसंभवात्तत्रार्थबोधकत्वरूपशक्तेःस्वग्रहत्वादुक्तपदवाक्य
स्फोटसिद्धिर्निराबाधैवेतिभावः ८५॥ इतिविवृतोसखंडपदवाक्यस्फोट
निरूपणं॥अवसरसंगत्याऽखंडस्फोटनिरूपणमितिसूचयन्नाहइ
दानीं॥मितिसखंडस्फोटनिरूपणानंतरमित्यर्थः॥अखंडमिति॥अखं

भ.ता २२७ उत्वं चाविद्यमानावयवकत्वे दृष्टांतवाक्यस्येवादिग्घटितत्वनियमात्त
द्भावात्कथं वर्णेष्वित्यादेस्तत्वमित्याशंक्य यथा शब्दांतर्भौणमूलं व्याच
ष्टे यथेति विवेकस्य भेदे पर्यवसानादाह भे॥ दइति॥ ननु पदवाक्यप्रतीतौ
वर्णानामपि प्रतीत्या कथं तदात्मत्वमत आह॥ अभेभावइति॥ एवकार
व्यावर्त्यं संस्पष्टयति नत्विति॥ ननु यदि स्फोटातिरिक्ता वर्णा न संति तर्हि क
कारो गकार इति च वर्णो वर्णावगाहिन्याः॥ प्रतीतेर्निरालंबनतापत्तिरत
आह तत्र तु गौरित्यादिकल्पेनेति वैजात्ये प्रमाणं दर्शयति वर्णजातिकतया
दित्यादि तथा च तारतम्यवैजात्यं समवायेन स्फोटांशे आरोप्योक्तप्रतीतिर्वैल
क्षण्योपपत्तौ नानुपपत्तिस्तत्साधिकेत्यर्थः॥ भामत्यां वेदांतभाष्यटी राम २२७

कावाचकत्वमितिग्रंथेदृत्यर्थः॥ वायुसंयोग इति कंठताल्वाद्यभिघातजवा
युसंयोगस्यैववर्णकार्यकारित्वमस्तु॥ एवंसतिनारोऽपिसमवायस्यवाच
कतावच्छेदकत्वमपिमेस्यतीति भावः॥ समाधत्ते प्रत्यक्षेति॥ अयंभावः
कादिवर्णानांवायुसंयोगात्मकत्वेऽतीन्द्रियत्वापत्तिः॥ नवोक्तरी
त्याकत्वस्यातीन्द्रियधर्मत्वेनसाक्षात्कारासंभवः॥ विशेषणांशस्यसुर
भिचंदनमितिचाक्षुषेसौरभवत्तस्यापिश्रोत्रग्राह्यत्वसंभवात्॥ उप
संहरति॥ तथाचेति॥ वाचकत्वानुपपत्त्येतिपदवाक्ययोर्वर्णसमूहरू
पत्वेवर्णानांयुगपदवस्थानासंभवेनवाचकत्वग्रहानुपपत्त्येत्यर्थः॥ व
र्णानामनित्यत्वेप्रत्यभिज्ञानुपपत्त्येतिदूषणमप्यस्मन्मतेनास्तीत्याह

भ॰सा तदेवेदमित्यादि तत्तत्कालीनतद्देशस्थव्यक्तय भेदाचागाहिपदादिविशेष्य
२२८ कप्रत्यभिज्ञानुपपत्त्या चेत्यर्थः ॥ अनित्यवर्णघटितपदवाक्ययोरप्यनित्य
228 तयाप्रत्यभिज्ञानुपपत्तिरेवस्याद्यद्यवं उपक्षोंगीकारो नस्यादिति भावः
एतेनेति ॥ अर्थवं उस्फोटस्य वाचकत्वस्वीकारेणेत्यर्थः ॥ अननुभवादिति
तथाच तत्सिद्धावेव प्रमाणाभावेन वाचकत्वं सुदूरगतमिति भावः ॥ तेषां
ककारादिवर्णानां स्फोटा ॥ तिरिक्तेनि कत्वादिप्रकारकप्रतीतिविषयका
दिस्फोटस्वैरटा । वास्माभिर्वाचकत्वाभ्युपगमादिति भावः ॥ आश्रुतदेति
तृतीयक्षणावृत्तिध्वंसप्रतियोगिनामित्यर्थः ॥ त्वानमिति कारणीभूतवि राम
षयस्याभावादसंभवीत्यर्थ ॥ संभवइति पूर्वपूर्ववर्णानांस्मरणात्मक २२८

मेतिमवर्णस्यप्रत्यक्षात्मकंयत्ज्ञानंसमुदितवर्णविषयकंतस्यसंभव
त्वित्यर्थः॥अतिप्रसंगइति॥सरशब्दघटितसकारअकारविसर्गजसे
स्कारैरसशब्दबोधापत्तिरित्यर्थः॥नादाभिव्यंग्यइति॥ध्वन्यनुगतवर्णाभि
व्यंग्यइत्यर्थः॥उपपादितत्वादिति॥क्रमिकवर्णसमुदायघटकांतिमवर्णांशे
लौकिकस्यपूर्वपूर्ववर्णांशेऽलौकिकस्यानतिप्रसक्तस्यासंभवेऽस्फोटनिरू
पणावसरेउपपादितत्वादित्यर्थः॥अतिरिक्तस्यवाचकत्वेदूषणमाहवर्णा
नामितिग्रामादिति॥प्रत्येकंव्यंजकत्वेएकवर्णादेवतदभिव्यक्तिसंभ
वेइतरोच्चारणवैयर्थ्यापत्तेरतिप्रसंगाच्चसमुदायस्यतूक्तरीत्यादुरुपपा
दत्वेनतद्व्यंजकत्वस्याप्यसंभवदुक्तिकत्वादित्यर्थः॥पदंलिति॥विलक्ष

णावायुसंयोगस्य गत्वप्रकारकस्फोटाभिव्यंजकत्वं विलक्षणस्यैवोत्वप्रका
रकस्फोटाभिव्यंजकत्वाभ्युपगमादेवेत्यर्थः ॥ तदतिरेकेति तत्तत्संयोगा
देवकत्वादिप्रकारककारादिप्रतीत्युपपत्तौ स्फोटातिरिक्तवर्णकल्प
नेमानाभावादिति भावः ॥ ननुस्मनोरसत्वादावतिप्रसंगस्तदवस्थः सत्वादि
रूपेणाभिव्यंजकवायुसंयोगानामनुभयत्रतौल्यादत आह ॥ एवंचेति ॥ तथा
च घटात्मके स्फोटे सत्वप्रकारकप्रतीतिविषयाव्यवहितत्वग्रहे सतः ॥ पदा-
व्यवहारविषयतेतिनस्य आत्मकस्फोटस्य नसरूपतेति भावः ॥ ननु त्वन्मते
गकारादिवर्णस्य स्फोटरूपतया नित्यत्वेन ध्वंसादिघटितोक्ताव्यवहितो
त्तरत्वासंभवात् ॥ कथमुक्तप्रकारसंभवो त आह ॥ परंत्विति ॥ तथाच

वर्णानांनित्यत्वेपितदभिव्यक्तीनांतत्त्वानानामनित्यतयातद्घटितताव्य
वहितोत्तरत्वमादायघटादिपदप्रत्ययोपपत्तिरितिभावः॥अन्तरैवेति॥अ
भिव्यक्त्यादिक्रमादायाव्यवहितोत्तरत्वस्यानुपूर्वीव्यवहारनियामकत्वा
देवेत्यर्थः॥नवीनैस्तथानभ्युपगमादाह वद्धेति॥एतेनेति॥अपास्तमित्यने
नान्वयिआनुपूर्व्यवच्छिन्नस्फोटस्यवाचकत्वव्यवस्थापनेनेत्यर्थः॥स्फो
टइतिवाचकत्वेनाभिमतोभिमतपदार्थइत्यर्थः॥आद्यपक्षेदूषणमाह
घटपदेइति॥घटइत्यनुपूर्व्यवच्छिन्नस्फोटोगृहीतशक्तिकस्येत्यर्थः॥क
लशपदादिस्वस्यागृहीततदवच्छिन्नस्फोटशक्तिकादित्यादिः॥बोधप्रसंगा
दिति॥घटबोधलक्षणकारणताकत्वकलशइत्यानुपू[illegible]र्व्यवच्छिन्नस्फोट

भ॰ सा
२३०
230

स्यात्तदानीमसत्वान्नित्यैकरूपत्वात्तस्य वर्णसमुदायरूपपदस्यवाचकत्वे
तु नोक्तदोषः॥ इति भावः॥ अर्थधीहेतुरिति उक्तस्थलेवस्फोटस्य कलशपदस्व
रूपपर्यायाभिव्यक्त्यवच्छिन्नशक्तिग्रहस्य हेतुत्वाभ्युपगमइत्यर्थः॥ शक्तिग्र
हावश्यंभावेनेति नागृहीतविशेषणान्यायेन तत्स्फोटे शक्तिग्रहस्यावश्यमभ्युपे
यत्वादिति भावः॥ उचितत्वादिति॥ औचित्यमेवाह॥ तथा सतीति शक्तिग्रहत्वे
नेति तत्पर्यायगतशक्तिग्रहत्वेनेत्यर्थः॥ लाघवादिति कारणतावच्छेदकला
घवादित्यर्थः॥ पूर्वकल्पे गौरवमाह॥ अन्यथेति॥ न हि द्वितीय कृतिपर्यायस्थले स्फो
टनानात्वमित्यपि पक्षेनेत्यर्थः॥ अनंतेति॥ प्रतिपर्यायभिन्नानां स्फोटानां कल्प
नांतेषां शक्तिश्चेत्यर्थः॥ लघुत्वादिति॥ तथा च वर्णातिरिक्तस्फोटकल्पनाति साम

२३०

रः र्थिकेति भावः ॥ सर्वसिद्धत्वादिति ॥ तथाच पर्यायेषु नानाशक्तिकल्पनाना
पूर्व्वोतिनदोषः ॥ ननु त्वन्मते वर्णानां स्फोटानतिरेकेण नित्यत्वादुत्पत्तिघटि
ताव्यवहितोत्तरत्वसंबंधेन पूर्ववर्णवत्वरूपशक्ततावच्छेदकानुपूर्व्यसंभ
वोत आह तदवच्छेदकेति ॥ प्रागिति ॥ स्वाभिव्यक्त्यधिकरणोत्पत्तीत्यादिग्रंथे
नेत्यर्थः ॥ ननु वर्णानां नित्यत्वाभ्युपगमे तत्समुदायोपि संभवति ॥ तस्यैवश
क्त्या भ्रमत्वं पदवाक्यव्यवहारोपि निर्वहत्येवं सतीति किमंतर्गडुना स्फोटे
नेत्यत आह दिगिति दिगर्थस्तु स्वतंत्रवर्णपक्षे वर्णैरेवच स्फोटव्यवहारः सि
द्धेत ॥ किंतु ॥ कत्वादिना प्रतीयमानः स्फोट एव ककारादिवर्णः ॥ इत्यभ्युपगमे
नोक्तान्यथासिद्ध्यसंभवः ॥ अत एव नानावर्णकल्पनाप्रयुक्तगौरवशंका

भू॰सा
२३१
231

पिनेति ॥ अत्र प्रासंगिकं किंचिद्विचार्य्यते ननु कोसौ स्फोटः किमर्थमभ्युपग
म्यत इति वाचकत्वस्वरूपशक्तेराश्रयणार्थमभ्युपगमः न च प्रत्येकं वर्णा एव
वाचकाः स्युः द्वितीयादिवर्णोच्चारणवैयर्थ्यापत्तेः नापि संहताः उत्पन्नप्र
ध्वंसित्वेन यौगपद्यासंभवात् ॥ अभिव्यक्तेरुत्पत्तेर्वा क्षणस्थायित्वात् एवं
चायं पूर्वोयं पर इति प्रत्यक्षविषये ऽदमभिलप्यमानपौर्वापर्यं ज्ञानस्य कोप्य
णाचीत्याद्युपयोगिनोऽसंभवान्नवस्येदमापामर्शासंभवात् ॥ एवं क्रमापगाहि
पदप्रत्यक्षस्यापत्तेः सन्निकर्षसूत्रोक्तस्यानुपपत्तिश्च न चोत्तरवर्णप्रत्यक्षक
ले उपस्थितविशिष्टतद्वर्णवत्वं तद्वत्तरवर्णे गृह्यते सुरभिचंदनमितिवदि
ति तज्ज्ञाने स्मृतिलंभसंभवसहृत्यादौ विशेषश्च ॥ अथवा पूर्वपूर्ववर्णजाः श

राम
२३१

र्णाः शब्दजशाब्दन्यायेन चरमवर्णप्रत्यक्षपर्यन्तं जायमाना एव एव संती
ति न पदप्रत्यक्षानुपपत्तिरिति वाच्यं आद्ये यं पूर्वेमेपनत्वस्य भिलापासंभ
वात्॥ न च विद्यमानयोरव्यवहितोत्तरत्वसंबंधत्वस्यैव क्रमशावस्यत्वा
च्च एवं नीत्यापरप्रत्यक्षोपपादनेपि पदस्याविद्यमानत्वेन तत्र व्वत्त्याश्रय
त्वग्रहानुपपत्तेश्च अविद्यमानेप्याश्रयत्वास्वीकारे नष्टो घटो जलावानि
त्यापत्तेः॥ किंचैकं पदमिति॥ बुद्धेस्तदेवेदं पदमिति बुद्धेश्चानुपपत्तिः प
क्षद्वयेपि न च चरमवर्णे व्यंग्यास्तत्तत्पदव्यक्तयो हि नंता जातयः शक्ततावं
छेदकत्वेन कल्प्यंते इति न दोष इति वाच्यं अनंतजातिकल्पने गौरवात् तस्याश्र
यत्वासंभवात्पदानामसत्वेन तत्र जातेरप्यसंभवाच्चेति चेत्॥ दत्रोच्यते॥ प्र

भ॰सा लयेलीनसर्वेजगत्कामामायावेततेईश्वरेसुप्तेवनिखिलकार्य्यप्रवृत्त्यभावात्
२३२ स्वप्रतिबध्यकप्रकाशस्यास्यंतनिर्विकल्पकतयात्तद्भूलाभ्दाससमानाप्यभा
२३२ तप्रोयैवततः॥कालवशात्स्वापपरिपाकैः॥प्राणिकर्मभिः स्वफलप्रदाना
यप्रेरितेश्वरस्यमायायांसिसृक्षात्मिकावृत्तिर्जायतेततोबिंदुरूपंत्रिगु
णमव्यक्तंजायते अस्माद्धिंदोः शब्दब्रह्मापरनामधेयंवर्णादिविशेष
रहितंनादमात्रमु त्पद्यते एतत्सर्वोपादानंरवपराविशब्देष्वेवहि
यतेविंदोस्तस्माद्द्वियमानाद्व्योमकात्मकोभवत् सएवश्रुतिसंप
न्नैः शब्दब्रह्मेतिमतेद्रत्युक्तेः॥प्राणिनिकायमहृदादिदेशस्थत्वाद्धलप्र राम
काशकत्वाच्चब्रह्मेतितविरूप्यतेएतत्प्राणिनांमूलाधारेसंस्कृतपवन २३२

चलनेनाभिव्यज्यतेत्तातमर्थं विवक्षोः पुंस इच्छया जातेन प्रयत्नेन
योग एव मूलाधारस्य पवनस्य संस्कारः॥ तदभिव्यक्तं पराचागित्यु
च्यते तदेव नाभिपर्यंतमागच्छता तेन वायुनाभिव्यक्तं मनोविषयं
पश्यंतीत्युच्यते एतद्द्वयं सूक्ष्मतरं योगिनिर्विकल्पसविकल्पज्ञान
गम्यमित्युच्यते ततो हृदयपर्यंतमागच्छता तेन वायुना हृदयदेशे
भिव्यक्ता तत्तच्छब्दार्थविशेषोल्लेखिन्या बुद्ध्या विषयीकृता प
रश्रोत्रग्रहणायोग्यत्वेन सूक्ष्मा मध्यमा वागित्युच्यते स्वयं तु तूर्णीपि
धाने सूक्ष्मतरवाय्वभिघातेन उपांशुशब्दप्रयोगे च श्रूयमाणासे
त्याहुः॥ एतदवस्थात्रयं सूक्ष्मप्राणावरूपं सैव वास्यपर्यंतं गच्छता

भू॰सा तेनवायुनाकंठदेशंगत्वामूर्द्धानमाहत्यपरावस्थतत्तत्स्थानेष्वभि
२३३ व्यक्तापन्नश्रोत्रेणापिग्रहणयोग्यावैखरीवागित्युच्यतेप्राणवएव
233 व्यानोदानाभ्यांसहवैखरीरूपंप्रतिपद्यतेतत्रमध्यमायामवस्थायांयो
नादांशःप्रणवरूपस्तस्यैवस्फोटात्मत्वंतस्यैवचवाचकत्वंएवंच
नपूर्वोक्तदोषःसचयद्यप्येकोखंडएकैकवर्णेनाभिव्यज्यतेतत
व६ थाप्यंत्यवर्णाभिव्यक्तःसन्बोधहेतुः॥आतोनेकवर्णजाभिव्यक्त्युत्त
रमर्थबोधः॥तत्रचव्यंजकरूपप्रतिबिंबनात्तद्रूपरूषितेवतदभि
व्यक्तिनित्यैकोपिअंतःप्रणवरूपस्फोटोनानात्वमिवापन्नोभवति राम
यथास्फटिकादेर्जवाकुसुमाद्युपाध्यावेशात्तत्तद्रूपरूषितस्वभा २३३

नेयथावामुखे कृपाणखड्गदर्पणाद्यभिव्यंजकवशाद्दैर्घ्यवर्तुला
दिभानं प्रतिबिंबसमर्पकाश्च संस्कारास्तेव स्थिरा एव उपाधिभि
न्नव्यंजकाँवान्नकदाचिद्गुणोराहित्येन तत्स्वरूपं येन क्रमेण चित्ते
संस्कारास्तेनैव क्रमेण व्यंजकरूपरूषिततातस्येतिस्वीकारान्नस
शेनसन्नस्यानयोरविशेषः॥ अयं चांतरत्वाद्धोत्रग्राह्यो वैखरीसंस्कृ
तांतः॥ करणग्राह्य एव व्यंजकरूषितस्य तस्यैवार्थसंकेतग्रहः॥ अ
तोघटादिपदमात्राभिव्यक्तेस्फोटे गृहीतश क्तिकस्य पुंसो हृत्प्रसिद्धा
र्थवदश्रवणेनार्थबोधः॥ अयमर्थ एकादशस्कंधे भागवतादौ स्फु
ट आकार एव सर्वावाक्सैषास्पर्शोष्माभिर्व्यज्यमाना नानारूपा

भवंतीति श्रुतेरित्यन्यत्र विस्तरः ॥ इति प्रतीतेरिति ॥ अन्यथा वर्णपरंपरा
रूपमालायास्तत्समूहरूपपदानतिरिक्ततया श्रूयमाणार्थस्य भावावगा
हिप्रतीत्यनुपपत्तिरिति भावः ॥ अन्यथेति ॥ प्रतीतेः पदार्थासाधक
त्वे इत्यर्थः ॥ कपाले घट इति भेदावगाहिप्रतीत्या हि कपालातिरिक्त
घटः ॥ सिद्ध्यति प्रतीतेरसाधकत्वे हि घटोपि कपालातिरिक्तो न सिद्ध्ये
दिति भावः शब्दकौस्तुभे तु इति तु नास्वरसः स्वचितस्तद्बीजं तु आनु
पूर्व्यावच्छिन्नानां मालाषट्कात्रैर्थत्वेन आनुपूर्वीरूपस्य पदस्याधास्या
ध्येय भावसंभवाद्वर्णव्यतिरिक्तस्फोटाभावेपि न क्षतिरिति एवमिति
अखंडस्फोटस्यैव वाचकत्वे इत्यर्थः ॥ प्रकृतिप्रत्ययाभ्यामिति ॥ तथा

चप्रकृतिप्रत्ययविभागेनतदर्थबोधकस्यव्याकरणस्यपदस्यार्थं
उल्लेह प्रमाणोपपत्तिरिति भावः॥मूले उपेयेति॥ उपेयस्यबोधनीय
स्य उपायाः साधकाः अव्यवस्थिता अनेके इत्यर्थः॥तस्मादुपेयप्र
तिपत्त्यर्थी एषा कल्पना समाश्रिताः॥ मुनिनेति शेषः॥उपेयप्रतिपत्त्य
र्थे त्वस्योभयस्त्रान्वयं स्वीकृत्यैवं व्याख्याते तत्र दृष्टांतमाह पंचको
शादीति दृष्टांतमेव स्फुटयति अयं भाव इति यथेति॥भृगुर्वैवारु
णिर्वरुणं पितरमुपससार॥अधीहि भो ब्रह्मेति ब्रह्म पप्रच्छवान् स उ
वाच तपसा ब्रह्म विजिज्ञासस्वेत्युपदिष्टोऽन्नं ब्रह्मेति व्यजानात्॥त
स्योत्पत्त्यादिनानित्यत्वं बुध्वा पुनः॥पृष्टो प्राणो ब्रह्मेति व्यजानादि

भृ-स्मा
२३५
235

त्तिहीवाचनस्योपपादनं बुद्ध्वा निस्सत्वमवध्यार्थ्यपञ्चोमनोब्रह्मेतित
स्याप्युपपादकं भ्रुत्वा त्सावच्छपहितत्वं ज्ञात्वा पुनः ॥ पूर्वेनोपदिष्ट
आनंदोब्रह्मेति व्यजानादित्युवाच भृगुवदानंदमयस्यैव ब्रह्म
त्वकथनमिति नोपायत्वमस्येति जानन्नानंदवद्विन्नस्यपंचकोश
स्युत्पादने हंबोतत्वेनाभ्युपैति यथावेति ॥ तत्रत्या हि पूर्वोक्ताः पंचको
शाः उपाया एवानंदमयकोशस्यापि पूर्ववदुपपादकं [illegible]भ्रुत्वा वैषयिक
त्वं बुद्ध्वा निस्सत्वेनाब्रह्मत्वं बुध्वा ब्रह्मपुच्छं प्रतिष्ठेत्यत्र अभ्रममाणब्रह्मपदस्य
वपरब्रह्मबोधकत्वं बुद्धवान् ॥ अतएवा ~~ध्याब्रह्मपुच्छं प्रतिष्ठेत्यत्र अभ्रम~~मा
धाराधेकपुच्छपदप्रयोगोपि तदुत्तरं एवं च यथानंदवल्ल्यां अन्नमयाद

साम
२३५

यः पंचकोशाः सर्वाधार ब्रह्मबोधनायोपायत्वेन प्रतिपादिता न तु तेषां वा
स्तविकत्वं तथेहाप्य वास्तवप्रकृतिप्रत्ययवाचकत्वव्युत्पादनं वास्तव
स्फोटवाचकत्वं च्युत्पादनाय इत्यर्थः ॥ अवर्णादितः इत्यादिपादान्मननादि
परिग्रहः ॥ न शास्त्रमिति ॥ तथा च व्याकरणं विनापि मननादिना स्फोटबोधा
द्व्यभिचारादिति भावः ॥ उपायास्योपायांतरादूषकत्वे हेतुमाह ॥ तथा ॥
चेति । व्याकरणाध्ययनस्य न स्फोटज्ञानत्वं कार्यतावच्छेदकं किंतु तज्ज्ञा
ननिष्ठं वैजात्यं तदवच्छिन्नं च नान्यस्मादिति न व्यभिचार इति भावः ॥ मंत्र
जन्येति ॥ मंत्रजन्यतावच्छेदकं यथापूर्वस्मारणे वैजात्यमित्यर्थः ॥ एवमग्रे
पि न तु स्फोटज्ञानेन वाच्यत्वज्ञानमात्रोपयोगी किंतु साक्षात्परंपरया ।

भ॰ सा
२३६
236

व्यापुरुषार्थोपयोग्यपीत्याह तस्यचेति ॥ स्फोटज्ञानस्येत्यर्थः दृष्टांतमाह य॰
स्नादीनामिति ॥ नित्यानांकाम्यानामपिकामनापरित्यागेनविहितानामित्य
र्थः आदिनादानतपोनाशनादेः ॥ परिग्रहः ॥ शरीरादिस्यादिनावागींद्रिया
दिपरिग्रहः साक्षात्हेतुत्वमाह ॥ साक्षात् ॥ स्वर्गेति ॥ स्वर्गहेतुत्वेच एकः
शब्दः सुप्रयुक्तइत्यादिनाप्योक्ताः श्रुतिः ॥ प्रमाणंपरंपरयामोक्षहेतुत्वेप्रमा
णं हेतुब्रह्मणावेदितं वेदइतिस्मृतिः साक्षात्तुमोक्षे आत्मतत्वज्ञानमेव
हेतुरुक्तार्थेहस्तिसंमतिमाह ॥ तदुक्तमिति ॥ तत्नादात्मकस्फोटप्रतिपादकं
व्याकरणशास्त्रं द्विप्रयोजकं चाङ्गत्वानामिति चिकित्सितमितिवा
ङ्गनः कर्मकायनयनसाधनं मनस्ततोमोक्षद्वानमित्यर्थः ॥ मनःशुद्धौय

राम
२३६

स्त्रासीनां यथोपयोगस्तथा वाक्शुद्धावस्योपयोग इति भावः॥ अधिवि
धमति॥ पवित्रं पवित्रत्वाद्धियासुदीप्यतेरित्यर्थः॥ पर्वणां मध्ये इदं प्रथमे
पदस्थित्यधिकरणमित्यर्थः॥ अत्र स्फोटे॥ अतीतविपर्यासः॥ भ्रमशून्यः
एतत्तत्त्वज्ञानवानिति यावत्॥ केवलांपरामृश्यां॥ अनुपश्यतियोगजधर्मे
ण प्रत्यक्षीकरोतीत्यर्थः॥ तथाच योगिनां त्वसिद्धौ किमवशिष्यते इत्य
र्थः॥ अलीकत्वासिद्धिरिति प्रकृतिप्रत्ययविभागस्य सांसारिकघटादिव
द्व्यावहारिकत्वेन शशशृंगादिवन्नालीकत्वमित्यादिवक्ष्यमाणत्वादि
त्यर्थः॥ अवास्तवत्वेप्येतस्यापातानुपयोगादिति भावः॥ आदिपदेनेति॥ पंच
कोशादिवदित्यन्योपात्तादिशब्देनेत्यर्थः॥ स्फोटस्य वर्णात्मकत्वे वर्णाना

भू.सा
२३७
237

मनित्यत्वस्यानुभविकत्तयास्फोटस्यापानित्यत्वंस्यादित्याशंकासमाधान
परमामूलमवतारयति नभिन्नेति ॥ वर्णजातीनां वर्णानां तन्निष्ठकत्वादिजा
तीनामित्यर्थः ॥ नस्यादिति ॥ विषमवाप्यात्प्रतीतेः प्रमात्वं नस्यादिति भावः
इत्याप नैत्याह वायुसंयोगेति ककादिबुद्धीनां ककारोगकार इत्यादिबुद्धी
नां भ्रमत्वा ॥ पत्तिरिति ॥ यथाश्रुताभिप्रायेणेदं पूर्वोक्तांतिमकल्पे भ्रमत्वा
प्रसंगात् ॥ दृष्टांतस्फुटीकरणायमीमांसकमतमाह ॥ उदात्तत्वादीति ॥ आ
दिनानुदात्तत्वसंग्रहः उदात्तत्वानुदात्तत्वयोः ॥ परस्परविरोधात्सहानव
स्थानाद्वर्णभेदेनतयोरवस्थानं भवति वर्णभेदश्चानेकत्वेसत्येव भव
तितदेवतुनसंभवतीत्याह तस्यैकत्वादित्यादिनित्यत्वेप्रमाणमाह ॥ तद्वै

राम
२३७

ति॥ नित्यत्वमेकत्वं चेत्यर्थः॥ तद्विषयः॥ प्रत्यभिज्ञाविषयः॥ व्यक्त्यंशे
ति॥ जातिवद्व्यक्तेरप्यविषयत्वायोगादित्यर्थः॥ नचेति॥ उत्पन्नः कका
र इति प्रतीतिरित्यर्थः प्रागसत्वेति स्वाधिकरणक्षणध्वंसानधिक
रणासमायसंबंधरूपउत्पत्तेरित्यर्थः॥ अतएवेति॥ अनुभवविरु
द्धत्वादेवेत्यर्थः॥ व्यवहारः॥ शब्दप्रयोगः ननूच्चारणमप्युत्पत्त्यनुकू
लव्यापारएवतथा चसैवानित्यत्वसाधिकेत्यत आहोच्चरितत्वं चेति॥
अभिव्यक्तिविशिष्टत्वं तद्विषयत्वं तथा च ताद्दशप्रतीत्याभिव्यक्ति
निबंधवर्णनिरूपितविषयित्वमेव विषयी॥ क्रमिकेति मतेन नूत्नत्तिनिष्ठ

भू॰ सा । मिति न सोऽत्यान्तसाध्येकेति भावः ॥ ननु वर्णो नित्यत्ववादिनां वर्णोमुख्यादयन्ती
२३८ त्यादिप्रयोगाद्द्वाएवेति नानुभवविरोधोपीत्यत आह किं चेति ॥ उत्पन्नत्वा
२३४ देरित्यादिनार्थविनाशापनिग्रहः ॥ परंपरयास्वाश्रयध्वनिव्यंग्यत्वरूपयानाति
त्वेति नित्यत्वसाधिके स एव ॥ नन्वन्यथैवमस्तित्यादेनन्यत्नस्वीकारे भ्रांत
त्वापत्तिरत आह परंपरयावर्तीतिलोहितः ॥ स्फटिक इतीत्वा न्यास्याभूमत्व
मिति भावः ॥ अवशिष्यते इत्यस्योत्पन्नो वर्ण इति प्रतीतेरिति शेषः ॥ ननु ता
दृशप्रतीतेर्नियमेन परंपरासंबंधविषयत्वे गौरवमत आह ॥ परे त्विति ॥ न
घाचप्रागभावादिकल्पनापेक्षया परंपरासंबंधावगाहित्वस्य नियमेन प्र राम
२३८

तीतेः कल्पनमेव लघ्विति भावः॥ वर्णस्थले ध्वनिसत्त्व एव तद्उत्पत्त्यादि
र्वर्णेष्वारोप्यत इति वक्तुं शक्यते तत्रैवमानेन पश्याम इत्याशंक्य निराच
ष्टे॥ नचेति॥ वर्णातरपृथक् ध्वनिर्नोपलभ्यत इति भावः॥ कारणाभावाद
पि तन्न संभवतीत्याह॥ तदुत्पादकेति॥ वर्णानभिव्यक्तेरित्यर्थः॥ दर्शना
दिनिदर्शितज्ञानसामान्यार्थे तस्येति ध्वनेरित्यर्थः॥ सत्त्वादिति॥ वर्णाभि
व्यक्तिस्थले ध्वनेर्नैयत्यमिति संबंधविषयकप्रतीतिर्भिन्नावाच्येति
भावः॥ तदैवेति॥ वर्णस्थले ध्वन्यसत्त्ववादिन एवेत्यर्थः॥ विपरीतमिति
जिह्वाकंठताल्वाद्यभिघातजन्यध्वनेर्वर्णोत्पादकसामग्र्याः प्रतिबं
धकत्वकल्पनाध्वन्यकल्पनप्रयुक्तलाघवापेक्षया विपरीतगौरव

स्.म २३८ 239

ग्रस्तेति यावत् ॥ तेषामिति मीमांसकनामित्यर्थः ॥ एतच्चेति ॥ उक्तस्याद्दीनां
वर्णोव्यक्तिव्येत्यर्थः ॥ प्रतिबंधेवेति ॥ परा भिमतस्स मा[illegible]स्स समा[illegible]मुक्तं
प्रतिबंधिसत्ययेत्यर्थः ॥ तथाच मीमांसकैरुत्पन्नः ककारइ[illegible]दप्रतीते
: प्रमात्वेमायुक्तिना श्रितासाए वास्माभिरप्याश्रयितव्यादित्यर्थः ॥ तथाचैव
उस्फोटस्वीकरेन किं—ह्याप्यकमिति भावः ॥ पूर्वमीमांसायांवाक्यघटकदार्थ
विचारस्तुसत्यप्रामयेउ[illegible]मीमांसायां कल्पितश्रुत्यादिप्रतिपाद्यपंचकोशा
दिविचारवत् ॥ कल्पितवंजकानुपूर्व्यावच्छिन्नपदार्थविचारपरः इत्य
मिति ॥ पूर्वोक्तयुक्त्यो पंचध्येति वर्णपदवाक्यखेडपदाखंडवाक्यभेदभि स्म
न्नाइत्यर्थः ॥ इति भगवत्समविवृतोव्यक्तिस्फोटनिरूपणं ॥ ॥ अवस्सं २३९

गत्मा जातिस्फोटनिरूपणमित्याशयेनाह जातीति ननुस्फोटातिरिक्तव
र्णानामस्वीकारात्तज्जातेर्वाचकत्वविचारो निरर्थकोत आह ॥ अ
मेनावद्गति अभेदेसाधकमाह स्फोट ॥ स्यैकत्वादितित दभिन्नाभिन्नस्म
तदभिन्नत्वानियमेन हकारात्मकस्फोटाभिन्नगकारे तदभेदावगाहि
बुद्धेः प्रमात्वाप्रसक्तिरित्यर्थः ॥ अनापत्तेश्च इति ॥ अभेदादेवचात्तादृशाभे
दावगाहिबुद्धेः प्रमात्वानुपपत्तेरित्यर्थः ॥ ननुवर्णात्मकस्फोटस्यैकत्वे
पिगत्वादिविरुद्धधर्माध्यासमूलकभेदप्रतीतेर्नानुपपत्तिः ॥ प्रामाण्ये
तुतस्यावर्णात्मत्वादिमते दूषणापास्तयेवेत्यत आह ॥ किंचेति ॥ उपाधिवे

क

म॰सा
२४०
240

नाभिमतगत्वादीत्यर्थः ॥ तद्देवगत्वमेवननुगत्वादेर्वर्णाधर्मेतयाक
र्थंवर्णात्मकस्फोटरूपत्वमत आह ॥ वर्णनित्यत्वेतिमीमांसकादिभिरित्य
र्थः ॥ अतिरिक्तानंगीकारादिति ॥ धर्मधर्मिणोर्भेदाभ्युपगमादित्यर्थः
गौरवामिति ॥ ककारादिप्रतीतीनां गत्वविशिष्टविषयकत्वेनोपपत्ति
संभवादिति भावः ॥ अंत्यस्फोटे गत्वाद्यनभ्युपगमपक्षे इत्यर्थः ॥ गत्वेति
धर्मस्य गत्वस्य स्फोटावृत्तित्वेन गादिप्रतीत्यनुपपत्तिरिति भावः ॥ नू
मत्वाद्योगादिति ॥ साक्षात्संबंधेन प्रमात्वेपपत्तावप्युक्तसंबंधविष
यकत्वे प्रमाणाभावादिति भावः ॥ नन्वनेकवर्णकल्पनापेक्षया प्रती

गम
२४०

तेर्धर्मत्वमेवन्याप्यमत आह॥ अस्त्वेति॥ तावतैवप्रतीतेः प्रामाण्यनिर्वा

हे लंस्फोटकल्पनयेति भावः॥ तत्संयोगस्य अतीन्द्रियत्वमपिलौकिक

विषयित्वानिरूपकत्वाभाववदित्यर्थः॥ अतीन्द्रियत्वापच्यानवायुसं

योगात्मकत्वंगकारस्येति भावः॥ प्रतिबंधोत्तरमतिधर्मवदिति॥ यथातीं

द्रियमात्रवृत्तिधर्मोनसाक्षात्कारविषयत्वव्याप्यइतित्वयाभ्युपेयते

तथातीन्द्रियसंयोगगतविशेषस्यममापीत्यर्थः॥ यद्यतीन्द्रियस्यैंद्रियकत्वंवि

रुद्धं तद्दातादृशवैजात्यस्यस्फोट धर्मत्वमपितथैवप्रत्यक्षानुपपत्तेरिति

भावः॥ ककार इतिप्रत्ययेकत्वंसाक्षात्करोमीत्यनुव्यवसायेनतत्रानल

भू॰सा
२५१
२-५१

क्षणव्याप्तिनिर्वाह इति ध्येयं॥ उपसंहरति तस्मादिति॥ कत्वादिविशिष्टस्या
क्षाकारानुपपत्तिरूपप्रमाणस्य स्फोटवादित्यर्थः॥ संसेवेति॥ स्फोटानित्याभि
व्यक्ताः कादयो वर्णाः संत्वेवेत्यर्थः॥ परं तु किं स्थितमित्यर्थः॥ गौरवात्तत्तद्व्यक्ति
भेदेनानंतशक्तिकल्पने गौरवादित्यर्थः॥ ननु तावद्वर्णगतपदत्वादि
जात्यनुगतीकृतेषु एकस्या एव शक्तेरभ्युपगमान्न नानाशक्तिकल्पन
प्रयुक्तगौरवमत आह आकस्मिकेति॥ ननु ताह शाजातौ मानाभावोत आह॥ हरिपदमितीति॥ अनुगतधर्मं विनानुगताकार प्रती
तेरनुपपत्तेरिति भावः॥ नन्वनुगतप्रतीतिमात्रस्य जातिसाधकत्वे

नाम
२५१

विभुमुत्वादेरपिलापत्तिरतः कारणतावच्छेदकत्वादिनैव तत्सिद्धि
र्वाच्यात्तदभावात्स्वरूपत्ते कथं तस्य जातित्वमत आह हर्षेपस्थितित्व
वच्छेदेनेति कार्यतावच्छेदकप्रदर्शकमिदं ॥ अवश्येति ॥ अन्यथातावत्स्व
दानां तत्तद्व्यक्तित्वेन हेतुताया व्यभिचारेणासंभवादिति भावः ॥ प्रतीत्य
वच्छेदेति ॥ अनुगतप्रतीत्यवच्छेदकत्वयोरित्यर्थः ॥ वर्णानुपूर्व्येति तादृश
जात्यभिव्यंजकत्वेनावश्यकल्पनीयतयेत्यर्थः ॥ निर्वाह इति ॥ अवश्य
क्लृप्तानुपूर्व्यैवानुगतप्रतीतिकारणतावच्छेदकत्वयोः संभवेन तद्रू
पविशिष्टपदोपस्थितित्वेन हेतुत्वमन्यथासिद्धेरिति भावः ॥ अन्यथेति

न च सेव्याप्यत्वक्षयविरोध्यादिति भावः ॥ ननु जातेर्वाचकत्वे जातित्वं वाच
कतावच्छेदकं वाच्यं तस्य च तदितरावृत्तित्वादिरूपत्वेन गोमवाच्य
त्वासंभवादत आह ॥ तादात्म्येनेति ॥ अभेदेनेत्यर्थः ॥ तथा च नोक्तदो
ष इति भावः ॥ जातयोरिति ॥ सननसपदयोरेकजातीयाक्रमनघटितत्वेन त
योर्जात्योर्विनिगमकाभावान्न तो विलक्षणार्थबोधानुपपत्तिरित्यर्थः
वाशब्दस्य पक्षांतरत्वभ्रमं निराकरोति वात्वर्थ इति ॥ अवधारणे इत्य
र्थः ॥ जातिविशेषस्य स्नत्वावच्छिन्नबोधकजातेरित्यर्थः ॥ भेद इति त
था च वर्णसाम्येप्यानुपूर्वीवैलक्षण्यरूपोपाधिवैलक्षण्येन रस

त्वावच्छिन्नवाचकतावच्छेदकजातेर्व्यंजकतया तदभावेन न स्मरः
पदात्तादृशार्थबोधापत्तिरिति भावः॥ मूले तानभेदशब्दो धर्मपर्योत्तथ्या
च वर्णानां नित्यैकत्वमते वा मुखं योगगतत्वैजात्येन तानत्वादिना भेदप्र
तीतिस्तद्वदित्यर्थः॥ वर्णनिष्ठकत्वादिजातिस्फोट भित्यभिप्रेत्यशंकते
नन्विति॥ जातेरर्थबोध जातेरित्यर्थः॥ प्रत्येकेति॥ पदान्तर्गततत्तद्वर्णाभि
त्यर्थः बोध्यस्यादिति अभिव्यंजकवर्णास्तत्वादित्यर्थः योगार्थतयेति
स्फुटत्वार्थो यस्मादितिव्युत्पत्त्येत्यर्थः॥ एतेवेति॥ तत्पदघटकयावद्वर्णा
व्यक्तजातेर्वाचकत्वांगीकारेणेत्यर्थः॥ सर्वदापदाश्रवणेपिपरास्तमि

भू.मा तित्र जातेर्नित्यत्वेऽपि व्यंजकासमवधानादभिव्यक्त्यभावेनोक्तस्थले
२४३ बोधापादनं न संभवतीति भावः ॥ पदघटकमात्रवर्णगतजातीनामेव
243 स्फोटत्वमस्तिदोक्तदोषस्तदवस्थ एवेत्यत आह अयं भाव इति ॥ वर्ण
गतजातिर्वर्णस्फोटस्तल्लक्षे ॥ कथितेति ॥ तथाच दुर्बलत्वात्तस्यक्षोना
श्रयणीयइति भावः ॥ तत्रेति ॥ पदे वाक्ये च तस्याः ॥ पदत्वादिजातेः व्यास
ज्यवृत्तित्वस्येति पर्याप्तिसंबंधेन वृत्तित्वस्येत्यर्थः नन्वेतस्यापि जाति
त्वेनसमवायेन वृत्तित्वमेव कुतो नेत्यत आह धर्मिग्राहकेति धर्मी
जातिस्तद्ग्राहकं मानं वर्णसमुदायरूपपदवृत्तिजातेर्वाच्यत्वकल्पनानुप नाम
कल्पेवाच १ २४३

पत्तिस्तत्सिद्धत्वादित्यर्थः॥ एकैकव्यक्तावपि घट इति सर्वजनसिद्धव्य
वहारवशाद्घटत्वादेः॥ प्रत्येकमात्रवृत्तित्वव्याप्तिकत्वावच्छेदेन प
र्याप्तिः सिद्ध्यतीति प्रकृते तु प्रत्येकं घकारादौ घटपदव्यवहाराभावा
त्तन्मात्रवृत्तिधर्मावच्छेदेन न पदत्वपर्याप्तिः॥ किन्तु वर्णे च तु ष्टयवृ
त्तिधर्मावच्छेदेनैव पदत्वादिपर्याप्तिः सिद्ध्यतीति भावः॥ अनेकव्यक्त
त्त्याभिव्यंग्यत्वस्यानुपूर्व्यवच्छिन्नवर्णाभिव्यंग्यत्वमित्यर्थः॥ नात्ते सरोर
स इत्यादावर्थभेदबोधानुपपत्तिः व्यज्यते नयेति व्युत्पत्त्याभिव्यक्तिपदा
र्थो वर्णादृत्वमभिप्रेत्याह ध्वनिवर्णयोरिति वर्णाभिव्यक्तो ध्वनेर्नैयत्या

भ॰सा॰
२४५
244

म र्व
द मे दोषपञ्चाशतो न एवमस्य शास्त्रार्थापि ध्वनिर्णीत इति प्रतिपादितं शेषार्थ इति
कारिकोदन्तनार्थ इत्यर्थः ॥ वर्तो बुध्वनित्यव्यवहारेसे मतिमाह ॥ उक्तो ही ७०
ति इदमुक्तममतिशायिनीति कारिकाव्याख्यापुकरणे इत्यर्थः ॥ तत्त्वेताव
ता ॥ पदत्वादेर्जातित्ववाचकत्वयोर्व्यवस्थापनमफलं पुरुषार्थानुप
योगित्वादित्याशंकासमाधानपरतयामूलमवतारयति ननु कासेति ॥
सावाच्यकत्वेनाभिमता सत्त्वो शेतिसत्त्वलं कालत्रयाबाध्यत्वं तद्धि प
रीतमसत्त्वत्वं पर्यवसितार्थमाह तत्तद्व्यक्तीति ॥ तत्तद्व्यक्त्युपहितं ब्रह्मै राम
वेत्यर्थः ॥ जातिरिति ॥ तद्व्यवहार्यं इत्यर्थः ॥ असत्योपाधीति व्यक्त्युपाधी २४५

स्यर्थः ॥ तदवच्छिन्नं तदुपलक्षितमित्यर्थः ॥ द्रव्यशब्देति गवादिशब्देत्य
र्थः लिंगसंख्यान्विनीर्थप्रतिपादकशब्दवाच्यमित्यर्थः ॥ शब्दस्वरू
पतयेति ॥ श्रुत्यात्मकशब्दरूपतेयास्फोटात्मकप्रत्तावरूपतयावेत्य
र्थः ॥ सर्वैरर्वाल्यदं ब्रह्मेति सर्वस्यनामरूपात्मकजागतोब्रह्मरू
पत्वप्रतिपादनान्तमस्तूपज्ञानजनकशास्त्रस्यब्रह्मपरिचायक
नामरूपनिरूपणाद्वानोपयोगइतिभावः ॥ कथमिति ॥ संगच्छतेइ
त्यनेनान्वयः पूर्वापरविनोधादितिभावः ॥ अविद्या अज्ञानेनत
स्यजातित्वंसंभवतीत्याह ॥ विद्यकइति ॥ अविद्यापरिकल्पितइ

भ॰ सा
२८५
245

त्यर्थः॥ तद्व्यक्तित्वादिवारणाय विशेषेति तत्र घाचमत्त भेदेनार्थह
यकत्वमिति॥ न विरोध इति भावः॥ नादात्मकस्फोटकल्पशास्त्र
स्य परमपुरुषार्थोपयोगित्वपरं परमा जातिस्फोटकल्पे तु स्वास्वादेवे
तितस्यैव मुमुक्षुत्वमित्याशयेन मूलमवतारयति॥ तमेवेति॥ तत्सत्य
स आत्मा इत्यादिश्रुतिसिद्धं यत्सत्यं सा जातिरित्यनेनोक्तमेवेत्यर्थ
मूले इत्यमिति॥ पूर्वोक्तप्रकारेण अध्यस्तवाचकत्वेभ्यः॥ प्रकृत्या
दिभ्यः॥ पृथक्क्रियमाणं अतएव निरंजनं उपाधिविनिर्मुक्तम
क्षरमविनाशि अविनाशित्वे हेतु निरंजनेति प्राक्तत्वेनाम

राम
२८५

रूपोयादानादिकारणभूतं यत्तद्ब्रह्मैव जन्माद्यस्येत्याद्युक्तेः॥ए
वकारेणाब्रह्मतादात्म्याभावव्यावर्तनद्धु एब्रह्मतादात्म्यंद्रढयतिप्राहुः
प्रकर्षेणवदंतीत्यर्थः॥सकलशब्दप्रकृतिभूतानादात्मकमध्यमाख्यनि
प्रणवप्रतिपाद्यब्रह्माभेदेनवाचकत्ववशाज्ज्ञानंतीतिपर्यवसितोऽर्थः॥
ननुशब्दोपादानत्वंगगनस्यैवनब्रह्मणइत्याशंकायामाह॥अयमर्थइति
नामरूपइति॥अनेनजीवेनानुप्रविश्यनामरूपेव्याकरवाणीतिसिद्धस्य
र्थः॥इयंनामरूपात्मकेतत्रस्वपिद्वयमध्येरूपस्यआकाशाद्यर्थस्यैवेत्य
र्थः॥नत्वन्नःशब्दस्यापीत्यर्थः॥तदेवब्रह्मैवतत्वमुपादानकारणमित्यर्थः २१

भू.सा
२५६
256

तस्मादेतस्माद्ब्रह्मणो आकाशः संभूत इत्यादिश्रुतेः॥शब्दतन्मात्ररूपस्या
काशस्योपादानत्वमात्मनः प्रतिपादनाच्छब्दाकाशयोर्द्वयोरप्युपादानं ब्रह्मैव
अतएव तयोरभेदसिद्धिः तदभिन्नाभिन्नेतिन्यायात्॥उपादानत्वं च विवर्त
त्वेन व्यावहारिकप्रातिभासिकपदार्थनिभासेन ब्रह्मैवावशेषीक्रिय
ते ननु ब्रह्माभिन्नस्य मिथ्यात्वे कथं व्यवहारो लोकानामत आह प्रक्रियांश
स्त्विति॥प्रकृतिप्रत्ययादिव्यवहारस्त्वित्यर्थः॥विजृंभतेति॥अज्ञानवि
लासइत्यर्थः॥तथा चाधिष्ठानतत्त्वसाक्षात्कारं विहाय कृताध्यासस्य तत्सा र
क्षात्कारात्पूर्वमनिवृत्तेर्नानात्वव्यवहारहानिरिति भावः॥अथवाप्यं राम

२५६

चकोशादिव्युत्पादनवच्छास्त्राणांपरंपरयोपयोगः ॥ नसाक्षादिति वर्ण्यते तद्
त्समानंतरं वाक्यपदीये उपायाः शिक्षमाणेति श्लोकः ॥ समारंभस्त्वेतस्य पू
र्वोर्द्ध्वं घटादिदर्शनान् लोकः परिच्छिन्नोवसीयत इति अर्थस्तु यथा घटा
दिकं दृष्ट्वा लोकः ॥ प्रपंचः कार्यत्वेन सकारणकोनुमीयते एवं भावा
नामाकाशादीनां समारंभादुपादानात्तादात्म्येन हेतुः ॥ भावोपादानत्वादि
ति फलितोर्थः ॥ शाश्वतं नित्यमपि ब्रह्मादिमत्सकारणकमिवावसीयते मा
लायां फणीव नित्यमुद्भवदुद्भवपर ब्रह्मणि प्रपंचः ॥ कल्पितो विवर्त्तोपादानत्वा
त् ॥ ब्रह्मणः ॥ ननु नादेपि ब्रह्मशब्दप्रतिपाद्यत्वदर्शनात्पुरुषार्थोनुपयोगि

तदभेदसंपादनमत आह ॥ ब्रह्मैवेति ॥ तथा प्रकृते ब्रह्मपदस्य स्वप्रकाशब्र॰
परत्वान्नोक्तानुपपत्तिरिति भावः ॥ न तत्र सूर्यो भाति न चंद्रतारकं नेमा
विद्युतो भांति कुतोयमग्निरित्यनेन परप्रकाश्यत्वं प्रतिषिध्य स्वात्मकनित्य
ज्ञानविषयत्वरूपस्वप्रकाश्यत्वमाह स्वयं ज्योतिरित्यादि ॥ नानित्यं विज्ञान
मानंदं ब्रह्मेति ॥ श्रुत्या ब्रह्मणो नित्यज्ञानात्मकं प्रकृत श्रुतिः ॥ स्वयमेवात्म
नात्मानं वेत्थ त्वं पुरुषोत्तम इति स्मृतिश्च स्वप्रकाशत्वेन तन्मद्भासयते सूर्य
इत्यादिस्मृतिश्च परप्रकाश्यत्वे प्रमाणमनुसंधेयमिति ॥ सूचयतीति स्फो
टस्वप्रकाशशब्दयोः ॥ पर्यायत्वं बोधयतीत्यर्थः ॥ तथा च जातिस्फोटवा

रिमते उपाधिनिरासद्वाराभ्युद्वत्त्वलक्षणः स्वप्रकाशस्वरूपेण पुरुषार्थो
पयोगिनिज्ञानेव्याकरणस्योपयोग इति सिद्धं निर्विघ्नेति ॥ निर्विघ्न
पूर्वकग्रंथप्रचारार्थमित्यर्थः ॥ अंतेसमाप्तौमंगलमिति ॥ मंगलादीनिमं
गलमध्यानिमंगलांतानि शास्त्राणिप्रथंते इति भाष्योक्तेरिति भावः ॥ पूर्ण
त्वमपरिच्छिन्नत्वंमखंडानंदत्वंवातेनरूपेणानतिश्चस्याभिलषितपू
र्णायअभिलाषविषयश्च अप्रतिबद्धग्रंथप्रचाररूपइष्टसिद्धिः ॥ यस्मि
न्निदं यतश्चेदं विश्वं विपरिवर्तते ॥ नानेवभातिविश्वात्मास्तशिवः सोप
तांमम कूर्माहार्यैसिमलाभिजनगुरुगणास्त्वाम+नामेश्वमारव्यस्ततलुवो

र० २

नं० ८१

भ०सा
२५८

नल्पकल्पार्णवं तरणिपतिः॥श्री महानन्द नामा तेनेदं निर्मिता भूषणा
विवृतिरिला भूषणानां मुदे स्तान्नमस्ता गंगाधमोर्वीधरवरतनया नाथ
पादाब्जयुग्मे॥ भुज्यग्नि भूमिध्वर भूमि शाके सुनम्ये संवज्जं गवस्तु
भूमिपुते च पौषे भूल्के व्यलोवि विवृतिर्लघु भूषणस्य निर्मायसाय
कति थ्यावजशत्रुपुर्याम्॥ २॥इति श्री लोकत्रयाख्यादितप्रतापकीर्ति गो
रक्षेश्वराश्रीनश्रीमामेश्वर सूनु महानंद पंडितकृता भूषणसारे विवृ
तिः समाप्ता॥ ॥शुभं भूयात् श्रीरस्तु॥ रघुदर्पणम् इदं पाठको पारव्यराम
चंद्रशर्मणः॥ संवत् १९८ ७२ मि॰ मीमाघ शुदी ५

राम
२५८

४०००